Bhairo Prasad Pathak
Shiva rahasya – V. 6
शिव रहस्य – षष्ठांश
Sanskrit
Handwritten on paper
138 years old
53 folios
13.4"x7"
Complete

श्री शिवरहस्य षष्ठांश प्रारंभ:

 श्रीगणेशायनमः श्रीशिवरहस्यषष्ठांशप्रारंभः हेमाद्रिंकिलमातुलिंगफलमित्यादायमोदाधिकोमौढ्यान्नाकनिवासिनोभयप
 रैर्वाक्यैरिवप्रार्थितः नीलीशंवरनीलमंबरतलंजंबूफलंभावयनंतंमुंचनुगिरिमंवरंपरिमृशन्नूलंबोदरःपातुमां १ वामंयस्यवपुःसमस्त
जगतांमातापिताचेतरत्यत्पादांवुजनूपुरोद्भवरवःशब्दार्थवाक्यास्पदं यन्नेत्रत्रितयंसमस्तजगतामालोकहेतुःसदापायाद्देवतसा
१ र्वभौमगिरिजालंकारमूर्तिःशिवः २ सूतउवाच जैगीषव्यःपुनर्नत्वाषण्मुखंशिवसंभवं पप्रच्छहृष्टस्तंतत्रमुनिभिर्गणपुंगवैः ३
जैगीषव्यउवाच करुणाकरसर्वज्ञशरणागतपालक अरुणाधिपतेत्राज्ञचरणस्मरणोन्मुख ४ करुणावरुणांभोधेतरणिद्युति
भास्वर दिव्यद्वादशलिंगानांमहिमासंश्रुतोमया ५ त्वत्तोमयश्रोतुमिच्छामिशिवाख्यानमनुत्तमं त्वद्वाक्यकंजपीयूषधाराभिःपावयाशुमां
६ सूतउवाच इतितस्यगिरातुष्टःषण्मुखःप्राहतंमुनिं षण्मुखउवाच शृणुत्वमगजाकांतेनोक्तंज्ञानमहार्णवं ७ ऋभवेयत्पुराप्राह
कैलासेशंकरस्स्वयं ब्रह्मसूनुःपुराविप्रोगत्वानत्वामहेश्वरं ८ ऋभुर्विभुंतदाशंभुंतुष्टावप्रणतोमुदा ऋभुरुवाच दिवामणिनिशा
पतिस्फुरत्कृपीटयोनिस्फुरल्ललाटभसितोल्लसद्वरत्रिपुंड्रभागोज्ज्वलं भजामिभुजगांगदंविधृतसामिसोमप्रभाविराजितकपर्दकं
करटिकृत्तिभूषणत्कारं ९ कालाक्षाध्वरदक्षाशिक्षवृषभोउक्षेशवाहोत्तमत्र्यक्षाक्षय्यफलप्रदावभसितालंकाररुद्राक्षधृक्
चक्षुश्रोत्रवरांगहारसुमहावक्षस्थलाध्यक्षमांभस्मीभूतगरप्ररक्षभगवन्भिक्षार्च्यपादांवुज १० गंगाचंद्रकलाललामभगव
न्भूभृत्कुमारीसखस्वामिन्तेपदपद्मभावमतुलंकष्टापहंदेहिमे तुष्टोहंशिपिविष्टहृष्टमनसाप्रष्टान्नमन्येहरिब्रह्मेंद्रानमरान्
त्रिविष्टपगतान्निष्ठांहिमेतादृशी ११ नृत्ताडंवरसज्जयापटलिकाभ्राम्यन्महोडुच्छयातुष्यत्सोमकलाललामकलिकाशम्याक
मौलीनतं उग्रानुग्रभवोग्रदुर्गजगदुत्थारोग्रपादांवुजंरक्षोवक्षकुठारभूतमुमयावीक्ष्यैद्यकामप्रदं १२ फालंमेभसितत्रिपुंड्र
चितंत्वत्पादपद्मानतंपाहीशानदयानिधानभगवन्कालानलाक्षप्रभो कंठेमेशितिकंठनामभवतोरुद्राक्षधृक्पाहिमेकर्णौमे
भुजगाधिपोरुसुमहाकर्णप्रभोपाहिमे १३ नित्यंशंकरनामबोधितकथासारप्रदौशंकरोवाचंरुद्रजपादरांसुमहतींपंचास्यरौमिदं शिवम्
१

धक् वाहूमेशशिभूषणोत्तममहालिंगार्चनायोद्यतौपाहिप्रेमरसार्द्रयाद्यसुदृशाशंभोहिरण्यप्रभ १५ भास्वद्धाहु चतुष्टयोज्वलसदाने
त्रेत्रिनेत्रप्रभो त्वल्लिंगोत्तमदर्शनेनसुतरांतृष्णौसदापाहिमे पादौमेहरिनेत्रपूजितपदद्वंद्वावनित्यंप्रभो त्वल्लिंगालयप्रक्रमणप्रण
तिभिःमान्योचधन्यौविभो धन्यस्त्वल्लिंगसंगोप्यनुदिनगलितानंगसंगांतरंगः पुंसामर्थैकसत्तापमनियमवरैः विश्ववंद्यप्रभोते १६
दत्वाविल्वदलंसदंबुजवरंकिंचिज्जलंवामुहुः प्राप्नोतीश्वरपादपंकजमुमानाथाद्यमुक्तिप्रदं उमारमणशंकरत्रिदशवर्यवेदेड्यहृत्
त्वदीयपरभावतोममसदैवनिर्वाणकृत् १७ भवार्णवनिवासिनांकिमुभवत्पदांभोरुहप्रभावभजनादरंभवतिमानसंमुक्तिदं संसारशैल
पादवल्यजनतासंमोचनंभर्गतेपादद्वंद्वहसुमासनाथभजतांसंसारसंभर्जकं त्वन्नामोत्तमगर्जनादघकुलंसंतर्जितंवैभवेदुःखानांपरिमा
र्जकंतवकृपावीक्षावतांजायते विधिमुंडकरोत्तमोस्मरुकोदंडखंडितपुरांडजवाहवाण पाहिस्मारयविकर्षसुवेदवाजिहेषानदर्शि
तपदांबुजविश्वनाथ १९ विभूतीनामंतोनहिखलुभवानीरमणतेभवेभावःकश्चित्तवयिभवहिभावेनलभते अभावंचाज्ञानंभवतिजन
नाद्यैश्वरहिताउमाकांतस्वांतेभवदभयपादंकलयतः २० वरंशंभोभावैःभवभजनभावेनिततरांभवांभोधिर्नित्यंभवतिविततःपांसुवहुलः
विमुक्तिंभुक्तिंचश्रुतिकथितभस्माक्षवरधृक्भवेभक्तःसर्वोभवतिचसदानंदमधुरः सोमसामिगजसुकृत्तिमौलिधृक्सामसोमशिरसि
स्तुतपाद सामिकायगिरिजेश्वरशंभोपाहिमामखिलदुःखसमूहात् भस्मांगरागभुजगांगमहोक्षसंगगंगांबुसंगसुजटानिटिलस्फुलिंग
लिंगांगभंगितमनंगविहंगवाहसंपूज्यपादसदसंगजवांतरंग २२ वात्सल्यमथितादृशंतवनचेत् चंद्रार्धचूडामणेधिक्त्वापिविमुंचवात
यियतोधन्योधरण्यामहं संसारंलवणार्णवस्यसलिलंधाराधरेण क्षणात् आदायोज्झितमाक्षिनोहिजगतामास्वादनीयंदशा २३ त्वत्के
लासवरेविशोकहृदयाक्रोधोज्झिताश्चांडजाः सस्मान्मामपिभेदवुद्धिरहितंकुर्वीसतेनुग्रहात् त्वद्वक्त्रामलनिर्झरोज्झितमहासंसा
रसंतापहाहंविज्ञानदिशमेदृशाद्यभगवन् लोकावनायप्रभो २४ सारंगीसिंहशावंस्पृशतिसुतधियानंदिनीमाघ्रपोत्तमार्जारीहंसवालंप्र
णयपरवशाकेकिकांताभुजंगं वैराण्याजन्मजातान्यपिगलितमदाजंतवोन्येत्यजंतिभक्तास्त्वत्पादपद्मेकिंमुभजनवतःसर्वसिद्धिंलभंते २५

शिवरहस्य ष० ६ स्कंदउवाच इत्थंऋभुस्तुतिमुमावरजानिरीशः श्रुत्वातमाहगणनाथवरोमहेशः ज्ञानंभवामयविनाशकरंसदेवस्तस्मैततेदेवकथयेश्रृणुयाशमुक्तो
अ०२ २६ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेऋभुस्तुतोप्रथमोध्यायः १ श्रीईश्वरउवाच श्रृणुपद्मजसंभूतमतःसूत्रविधिक्रमं ज्ञानोत्पादेकहे
तूनिश्रुतिसाराणितत्वतः १ आसामन्वंतरेषुप्रतियुगजनिताःशांभवज्ञानसिध्यैभस्माभ्यक्तसमस्तगात्रनिवहाः रुद्राक्षमालाधराःकैलासंस
२ मवाप्यशंकरपदध्यानेनसूत्राण्युमाकांतात्प्राप्यवितन्वतेस्वकधियाप्रामाण्यवादान्यहो २ जिज्ञास्यंब्रह्मएवेत्यथपदविधितःसाधनप्राप्ति
पायैर्योगैःर्यागाद्युपायैःयमनियममहासांख्यवेदांतवाक्यैः श्रोतव्योभगवानरूपगुणतोमंतव्यइत्याहहिवेदोद्बोधवाक्यहेतुकरणैःध्येयः
ससाक्षात्कृतैः ३ जन्माद्यस्ययतोस्यचित्रजगतोमिथ्यैवतत्कारणंब्रह्मब्रह्मात्मनैवप्रकृतिपरसदावर्तमानंविवर्त्तात् श्रुत्यायुक्त्यायतोवाइति
पदघटतोवक्तिशंभुनाणुःकालविपाककर्मजनितंसाचोदनावैमृषा ४ योनिःशास्त्रस्यवेदस्तदुभयमननाद्ब्रह्मणःप्रत्यभिज्ञानिश्वासाद्वेद
जालंशिववरवदनाद्ब्रह्मणाप्राप्तमेतत् तस्मात्तर्कैर्वितर्ककर्कशधियानातिक्रमेत्ताधियंस्वाम्नायक्रिययातदाप्रकरणेयोनिर्महेशोध्रुवं ५
तत्वस्यापिसमन्वयात्श्रुतिगिरांविश्वेश्वरेचोदनासाचानिर्वचनीयतामुपगतावाचोनिवृत्ताइति आत्मैवेषइतीववाक्यानुवृत्तिः वृत्तिंविध
त्तेधियावेदांतादिषुएकएवभगवानुक्तोमहेशोध्रुवं ६ नासद्वादीक्षतेयज्जडमितिकरणैःगंधरूपादिहीनंशब्दस्पर्शादिहीनंजगदनुगतम
पितद्ब्रह्मकिंरूपमीशे गौणंचेदपिजाड्यतोजगदिदंयन्नामरूपात्मकंतत्त्वात्राविशदीश्वरोर्थवचसामोक्षस्यनिष्ठाक्रमः ७ हेयत्वावचनाच्च
ततूश्रुतिगिरांस्थूलप्रदृष्टंभवेद्रूपंनारूपतोपिप्रकरणवचनंवाकुविकारःकिलेदं स्वाप्यायादितितत्ध्रुवापिपरमानंदोहृदीस्यपरःसाम
न्याच्चगतेरथाप्यनुभवेविद्यानतेशंकरः ८ श्रुतत्वाद्वेदांतप्रतिपदवचःकारणमुमासनाथोनाथानांसचकिलनकश्चिज्जनिभवः सएवानं
दात्माश्रुतिकथितकाशादिरहितोविकारःप्राचुर्यान्नहिभवतिकार्यंचकरणं तत्धेतुव्यपदेशतोपिशिवएवएवेतिचानंदइत्थंमंत्रेर्वर्णित
तत्क्रमेणभगवान्सत्याद्यनंतोच्यते ९ नैरंतर्यनुपत्तितोपिसुखिताचानंदभेदोर्थतःकामाज्ञानुभावतोबहुभवेस्यदभिदाजायइत्यंस शिवम्
स्ततःपुच्छंब्रह्मप्रतिष्ठितेतिवचनाच्छेषीमहेशोव्ययः १० आकाशांतरतोपिभौतिकहृदाकाशात्मतावाक्यतोब्रह्मैवप्रविभातिचेदकलने
२

चाकल्यनानत्यतः सुषुप्युक्तोत्योर्वासहिखलुनभेदः परशिवे अतोस्यानंदैतेनभवतिपरेवैविलयने ११ तदहंयत्सहंमजगदिदमनाकार

मरसंनगंधंनस्पर्शभवतिपरमेशेविलयिने अधीनंचार्थतद्भवतिपुनरेवेक्षणपरंस्वतंत्रेच्छोः शंभोःनखलुकरणंकार्यमपिन १२ ज्ञेय

त्वावचनाच्चशंकरपरानंदेप्रमोदास्पदेनप्रज्ञानहिकारणंप्रकृतिकंप्रश्नत्रयस्यार्थवत् नविशेयंदेहप्रविलयशतोस्यानगणनासमृ

त्योर्मृत्युस्तद्भवतिकिलभेदेनजगतः १३ महद्व्याणीयोभवतिचसमोलोकसुहृशातथाज्योतिस्त्वेकंप्रकरणपरंकल्पितवतः नसंरम्भाभे

देनजगतः १३ महद्व्याणीयोभवतिचसमोलोकसुहृशातथाज्योतिस्त्वेको त्रिभुवनविभावादितिकरस्वभावोयंशश्वन्मुखरयतिमोहायजगतां

प्राणाद्भूतपंचसंख्यजनितातद्वृत्तिवच्चक्षुषांश्रोत्रंयत्मनसोन्नमिस्थपरमानंदैकजन्यंमहः ज्योतिःकारणदर्शितेचकरणेसत्तासदित्य

त्वहंचाकर्षाभवतिप्रकर्षजनकंत्वस्तीतिवाक्योत्तरं १५ जाग्रत्तावचनेननजीवजगतोभेदःकथंकल्पतेलिंगंप्राणगतंनचेश्वरपरंज्योतिः

किस्वेकप्रदं अन्यार्थात्व्यतिरेकतोर्थगतिकंचाकल्प्ययद्वाक्यतःप्रज्ञामित्यपरःक्रमस्थितिनिरसोवन्मावदंतन्मृषा १६ प्रकृत्यैवंविसित्थं

भवतिपरमानंदविधुरंअभिध्योपादेशात्सभवतिउभयान्म्नायवचनैः भवत्यात्माकर्त्ताकृतिविरहितोयोनिरपिचप्रतिष्ठानिष्ठाचत्रिभुव

नगुरुःप्रेमसदनः १७ अभिध्योपादेशात्सबहुभवदीक्षादिवशतःसमाक्षाच्चोभाभ्यांप्रकृतिजडसषाम्नायवचनात् अतोह्यात्माशुध्दः

प्रकृतपरिणामेनजगतांसदीवमायारेभवतिपरिणामेषुचशिवः १८ आनंदाभ्यासयोगाद्विकृतजगतानंदजगतोअतोहेतोर्धर्मोन

भवतिशिवःकारणवरः हिरण्यात्मादित्सेक्षिणिउदेतीहभगवान् नतेश्चाधाराणांश्रवणवचनैःगोपितधियः १९ भेदादित्यपदेशतो

स्तिभगवानन्योभवेत्किंततःआकाशादिशरीरलिंगनियमाद्व्याप्यंहिसर्वंततः तज्ज्योतिःपरमंमहेश्वरसुमाकांतारव्यशांतंमहोवेदांतेषु

नितांतनवाक्यकलनेछंदोभिधानादपि भूतादिव्यपदेशतोपिभगवत्यस्मिन्महेशेध्रुवंयस्माद्भूतवराणिजायतइतिश्रुत्याशलेशांशनः

विश्वंविश्वपतेरभूत्तदुभयंप्रामाण्यतोदर्शनात्प्राणस्यानुगमात्सएवभगवानन्यःकथंविद्यते २१ नवक्तुश्चात्मोवैसखलुशिवभूमादि

विहितःतथैवायुर्देहेअरनिवहच्चक्रागमहो अदृश्योप्यात्मावैसहिसुहृशतःशास्त्रनिचहैःशिवोदेवोवामामुनिरपिचसावोस्यमभजत् २२

शिवरहस्यषं प्रसिद्धिःसर्वत्रश्रुतिषुविधिवाक्यैःभगवतोमहाभूतेःजातंजगदितिचतज्ज्ञादिवचनैः अतोणीयान्ज्यायानपिद्विविधभेदमपगताःवि
अ०२ वस्थानोस्तीतिप्रथयतिगुणैरेवहिशिवः २३ संभोगप्राप्तिरेवप्रकरजगतःकारणतयासदाव्योमैवेत्थंभवतिहृदयेसर्वजगतां अतोत्वावैश
वैःचरमचरभूतंजगदिदंमहामृत्यूदंशोभवतिशिवरंनारइतिच २४ प्रकरणवचनेनवेदजातेभगवतिभवनाशनेमहेशे प्रविशतिशिव
३ एवभोगभोक्तृनियमनदर्शनतोहिवाक्यजातं २५ विशेषणैःशंकरमेवनित्यंद्विधावदत्येवमुपाधियोगात् अतोंतरावाक्यपदैःसमर्थितः
स्थानादियोगैःभगवानुमापतिः २६ सुखाभिधानात्सुखएवशंभुःकंब्रह्मखंब्रह्मइतिश्रुतिरितः श्रुतोपवाक्योपनिषत्प्रचारतोगतिंप्रप
द्येतबुधोपिविद्यया २७ अनवस्थितितोपिनेतरोभगवानेवसचक्षुषिप्रबुध्येत् भयभीताःकिलयस्यसोमसूर्यानलवाय्वंबुजसंभवा
भ्रमंति २८ अंतर्यामितयैवलोकमखिलंजानात्युमायाःपतिःभूतेष्वंतरगोपिभूतनिवहंनोजानतेशंकरं नतत्स्मृतसाधर्मैःअभिलपन
तोभेदविधुरंनशारीरंभेदंभवतिअविज्ञातायकवरे २९ अदृश्यत्वाद्धर्मैःनखलुभगवानन्यदितिचापरादिस्त्यंव्यामतिरपिचभेदप्रकलने
भेदादेश्चविशेषणंपरशिवेरूपंननामप्रभाभावोवाभवतिप्रभाविरहितंब्रह्मात्मनावाहतत् ३० स्मृतमानंशंभोभगवतिनतत्साधनतया
प्यतोदैवंभूतंनभवतिचसाक्षात्परशिवे अभिव्यक्तौचान्यःस्मृतिमपितथान्यापिमनुतेतथासंपत्तिर्वैभुविभवतिकिंशंभुकलने ३१ यं
मुक्तिव्यपदेशतःश्रुतिशिखाशाखाशतैःकल्पितेभिद्यंग्रंथिरपिप्रकीर्णवचनासास्येववाह्यांतरा शब्दोब्रह्मतयैवनप्रभवतेप्राणप्रभेदे
नचतस्याप्युत्क्रमणस्थितिप्रविलयेमुक्तोप्यसौशंकरः ३२ तंभूमासंप्रसादात्शिवमजरमात्मानमधुनाशृणोतीक्षेद्वापिक्षणमपितथान्यंन
मनुते तथाधर्मापत्तिर्भवतिपरमाकाशजनितंप्रशस्तंव्याहृतंदहरमपिदध्योव्यपदिशत् ३३ अलिंगंलिंगस्थंवदतिविधिवाक्यैःश्रुतिरियं
ध्वंतेएकाशास्यामहिमनिप्रसिद्धेर्विमृशतः अतोमर्शान्नायंभवतिभवभावात्मकतयाशिवाविर्भावोवाभवतिचनिरूपेगतधियां ३४ परा
मर्शेचान्यद्भवतिदहरंकिंश्रुतिवचोनिरुक्तंचाल्पयत्ननुक्ततितदीयेन्हिमहस्याविभातीदंशश्वत्प्रमतिवरशब्दैःश्रुतिभवैः योव्यापकोपिभ
गवान्पुरुषोंतरात्मावालाग्रमात्रहृदयेकिमुसंनिविष्टः प्रत्यक्षानुभवप्रमापणपरंवाक्यंकिलेकार्यदंमानेनापिचसंभवाभ्रमपरोवर्णतेये शिवः

३

वाह्हि शब्दंचापिन्नथैवनित्यमपि तत्साम्यानुपपत्तिक्रियामध्यादिघनधीकृतोपिपुरुषोज्योतिष्वभावोभवेत् भावंचापिस्तुगस्यतश्रवणतोज्ञात्व
तरासंभवात् संस्काराधिकृतोपिशंकरपदंयेवक्तुकामामनाकु ३७ ज्योतिर्दर्शनतः प्रसादपरमादस्माच्छरीरात्परं ज्योतिश्चाभिनिविश्यव्योम
परमानंदंपरंविंदंति ३८ स्मृतीनांवादोत्रश्रुतिविभवदोषान्यवचसासएवात्मादोषैः विगलमततायः परशिवः सविश्वंविश्वात्माभवतिस
हि विश्वाधिकत्तयासमस्तेषुप्रोतोभवतिसहिकार्येषुकरणं ३९ प्रधानानांतेषांभवतिइतरेषामनुपमोप्यलब्धोप्यात्मायंश्रुतिशिरसिचोक्तोपुर
हितः सदृशोपिचित्सात्माभवतिवरकार्येषुकरणं असद्वासद्वाप्यसदितिनदृष्टांतवशगं ४० असंगोलसंण्यानभवतिहिपंचस्वपिसुधाअभीम
मानोदृशादनुगतिरथास्रादिरहितः स्वपक्षादेदोषाश्रुतिरपिनईशेपरमतंतत्वनिर्मोसोभूयादनुमितिकुतर्कैर्नहिभवेत् ४१ भोक्तापत्तेर
पिविषयतोलोकवेदार्थवादोनेनंशास्तिप्रभुमतिपरंचाविचारंभणेभ्यः भोक्ताभोगविलक्षणोहिभगवान्भावोपलब्धोभवेत् सलाच्चापिपरस्य
कार्यविवशंसद्वाक्यवादान्वयात् ४२ पुक्तेः शब्दात्प्राच्चासदितिनहिकार्यंचकरणंप्रमाणैर्युक्त्यावानभवतिविशेषेणमनसा परःप्राणोदृशा
हृत्तकरणदोषाभिरधियातयाश्माद्योदिग्माद्योतंतिदेवाभुविदिवि ४३ प्रसक्तिर्वाकृत्स्नाश्रुतिवरबलादात्मनिचिरंस्वपक्षेदोषाणांप्रभवतिच
सर्वादिसुदृशाद्विकाराणांभेदोनभवतिनियोज्योगणधियां अतोलोकेलीलापरविषमनैर्घृण्यविधुरंनकर्मारंभाद्वामुपलभतियद्येतच्चपरं ४४
सर्वैर्धर्मैपदैरयुक्तवचनापत्तेःप्रवृत्तेर्भवेत् भूतानांगनिजोपयुज्यपयसिक्षारंयथानोपयुक् अवस्थानंनैवप्रभवतितृणेषूद्यतमतेस्तथाभावा
त्पुंसिप्रकटयतिकार्यंचकरणं ४५ अंगिलानुपपत्तितोप्यनुमितौशक्तिस्तहीनंजगत्प्रतीषिद्धेसिद्धेप्रसभमितिमोनहिशरणं महद्दीर्घेहूस्व
उभयमपिकर्मैवकरणंतथासाम्येस्थित्याप्रभवतिस्वभावाच्चनियतं ४६ नस्थानतोपिश्रुतिलिंगसमन्वयेनप्राकाश्यवैयर्थ्यमतोहिमात्रा स्व
यौपमाप्रमतिचत्वतथांबुदत्वान्तद्दर्शनाच्चनियतंप्रतिबिंबरूपं ४७ तदव्यक्तंननतोलिंगमेनत् तथोभयमपदेशाच्चतेजः प्रतिषेधात्परमो
सेतुरीसः सामान्यतस्थानविशेषबुध्या विशेषतश्चोपपतेस्तथान्यत् अतःफलंचोपपद्येतयस्मान्महेश्वरात् श्रुतिभिश्चोदितंयत् धर्मपरेचे
श्वरंचेतिचान्येनकर्मवच्चेश्वरेभेदधीर्नः ४९ भेदान्नचेतिपरतः परमार्थदृष्ट्यास्वाध्यायदर्ष्यादुपसंहारभेदः अथान्यथात्वंवचसासोवरी

यान्तंसज्ञानंचेत्प्राप्तिरेवप्रमाणं ५० सर्वत्रभेदादनयोस्तथान्यत्प्राधान्यमानंदमयःशिरस्त्वं तथेतरेत्वर्थसामान्ययोगात्प्रयोजनाभावत्तयाध्य

यायते ५१ शब्दात्तथात्मात्मगृहीत्रुत्तरात्तथान्वयादितरस्मानपूर्वं अशब्दत्वादेवमेतत्समानं एवंचसंविद्वचनाविशेषात् ५२ तद्दर्शनात्संभ
तंचैवमेवोअनाम्नायाद्वैद्यभेदात्परेति गेतरर्थोरूपपन्नार्थलोको शब्दानुमानैःसगुणोप्ययात्मा ५३ यथाधिकारंस्थितिरेवचांतरात्तथात्मनः
४ तत्रैवभेदाद्विशिषंतीहतांतरत् अन्यत्तथासत्पक्कत्वानर्थकेकामादिरत्रायतनेषुचादरात् ५४ उपस्थितेतद्वचनात्तथाग्नेःसंलोपएवाग्निभवः
प्रदाने अतोन्यचिंतार्थभेदलिंगवलीयःक्रियापरंचासमानाज्ञहृष्टैः ५५ श्रुतेर्बलादनुबंधेनरवैवैभावापत्तिश्चात्मनःश्चैकएव तद्भावभावा
दुपलब्धिरीशेसद्भावभावादनुभावतश्च ५६ अंगावबद्धास्तुहितेथैवमंत्रतोभून्मोक्षत्तार्जायतेदर्शनेन रूपादेश्चविपर्ययेणात्तुदृशादोषाभयत्रा
प्ययंअग्राह्याःसकलानपेक्षकरणंप्राधान्यवादेर्नहिं तत्प्राप्तिःसमुदायकेपिइत्तरेप्रत्याइके नापियत्तविद्याविद्याअसतिवलतोधुर्यमार्याभिशंशी
५७ दोषोभयोरपितदावगमाभ्युपेयात्सत्पासतोहृशिउदासिनवद्भजेत नाभावादुपलब्धितोपिभगवद्धैधर्म्यस्वप्नादिवद्भावेनाप्युपलब्धि
रीशितुरहोसावैक्षण्यंकल्प्यते सर्वार्थानुपपत्तितोपिभगवत्येकाद्वितीयेपुनःकार्त्स्न्येनात्मनिनोविकारकत्वंनंनिलंपतेस्वधर्मतः ५९ संबंधानु
पपत्तितोपिसमधिष्ठानोपपते रपितश्चेवाकरणंचभोगदिधुरंत्वंनत्वसर्वैत्तयाँ उत्पत्तेरपिकर्तुरेवकारणतयाविज्ञानभावोयदि प्रापेधप्रति
पत्तितोपिमरुतःश्चाकाशतःप्राणतः ६० अस्तितेत्वदपीतिगौणपरतावाक्येषुभिन्नाक्रियाकार्यद्रव्यसमन्वयायकरणंशब्दाश्चब्रह्मैवतत्
शब्देभ्योप्यमतंश्रुतंभवतिततज्ज्ञानंपरंशंभवंयावल्लोकविभागकल्पनवशाभूतक्रमात्सर्जति ६१ तस्मात्संभवतोभवेज्जगदिदंतेजःप्रसूतंश्रु
तिःचापश्चामरुदेवरवात्मकथयतल्लिंगसंज्ञानतः विपर्ययेणक्रमतोतंततएहिविज्ञानमानक्रमतोविशेषात् नचात्मनःकारणताविपर्ययोचरा
चरव्यापकतोहिभावैः ६२ नात्माश्रुतोनित्यताशक्तियोगाज्ज्ञानेवभासत्यविकल्पितोहि संतानएवात्रगतागतानांस्वात्मानचोत्तारणेनाणुरेव
६३ स्वशब्दोन्मानाभ्यांसुखयतिसदानंदनतनुर्विरोधश्चांद्रैवद्रवइवसदात्मानिखिलगः गुणाद्वालोकेषुव्यतिरिकवतोगंधवहतःपरोदृष्टो
ह्यात्माव्यपदिशतिप्रज्ञानुभवतः ६४ यावच्चात्मानेवदृश्येतदोषैःपुंस्त्वादिवत्त्वस्यसतोव्यक्तियोगात् मनोन्यत्रापदिकार्येषुगौणंविमुखःकर्ता शिवम्
४

शास्त्रतोविहरतिउपादानवशतः ६५ अस्मात्मव्यपदेशतः श्रुतिरियंकर्तृत्ववाहंवदत् उपालब्धुंशक्तैः विपरतिसमाध्यास्तुभिन्नया परान्तु

श्रुत्याप्यनुकृतिसुपत्नसुभिनया परोमंत्रोवर्णैः भगवतिअनुज्ञापरिहरौ तनोः संबंधेनप्रविशतिपरंज्योतिकलने ६७ आसतंतेअतिकरंपरू

पभेदेआभासएवसुहृशानियतोनियमात् आकाशवत्सर्वगतोमयात्माआसंधिभेदात्प्रतिदेशभावात् ६८ तथाप्राणोगौणः प्रकृतिविधि

पूर्वार्थकलनादेधस्तायोसज्यः प्रथितगतिशेषेणकथितः हस्तादयस्त्वणवः प्राणवायोः चक्षुस्तथाकरणत्वान्नदोषः ६९ यः पंचवृत्तिर्भेन

वश्वहृश्यतेतथाणुतोज्योतिरसुभ्यखानि भेदश्रुतेर्लक्षणाविप्रयोगात् आत्मादिभेदेतुविशेषवादः ७० आत्मेकत्वात्प्राणगतेश्चवन्हेः तेजो

गतीवाश्रुतत्वान्नचेष्टा भोक्तुर्नचात्मन्यविदीकृतायेते धूममार्गेणकिलप्रयांति चरणादितिचान्यकल्पनांस्मरंतिसप्तैवगतिप्ररोहात् मापा

रवैधूर्यसमूहविद्यातेकर्मणेवेहतृतीयलब्धा ७२ तद्दर्शनंनतद्दृतोप्यविद्यासमोपपत्तेः उक्तहेविशेषात् चिरंतपः श्रुयिरतोविशेषातेस्था

वरेचाविशेषार्थवादः ७३ संध्यांशस्त्याकिलनिर्ममेजगत्पुत्रेषुमायामयतोमयात्मा कृत्स्नंमायामयंतत् जगदिदमसतोनामरूपंतुजा

तंजाग्रत्स्वप्नसुषुप्तितोपिपरमानंदंतिरोधानकृत् देहायोगाद्वासतेवर्धनेयतत्रैवान्यत्सश्यतेसोपवोधात् ७४ सशोशुचानः स्मृतिशब्द

वेधोनानाशब्दादिभेदाफलविविधमहाकर्मवैचित्र्ययोगात् ईश्वेतागुणधारणांश्रुतिहितांतदर्शनोद्बोधतः तद्दर्शनात्स्थितएवसिध्यते

एचारयोगाद्दततच्छ्रुतेश्च ७६ वाचासमारंभणतोनियामतः तस्याधिकाप्रात्वकस्योपदेशात् तुल्यंदृशासर्वतस्याद्विभागः आध्यापया

त्रान्नविशेषतः स्तुते ७७ कामोपमर्देनतदूर्ध्वरेतसोविमर्शतोयातिसतत्वतोमः अनुष्ठेयंचान्यः श्रुतिशिरसिनिष्टाभ्रमवशाद्विधिस्तुत्या

भावंप्रवदतिरथाग्रेराधानंमनुवदतिज्ञानांगमपिच ७८ प्राणात्ययेवापिसमंतथान्नअवाधतः स्मृतितः कामकारेविहिताश्रमकर्मतः

सहैवकार्यातथोभयोः लिंगभवंचदर्शयेत् तथांतराचापिस्मृतेः विशेषतः ज्यायोपिलिंगाभयभावनाधिकासैवाधिकासैवाधिकारादशना

तदुक्तं आचारतः स्वामिनईज्यकृत्यास्मृतेऋत्विक्सहकार्यंचकृत्स्नं ८० तन्मौनवाचावचनेनकुर्वन्तदेहिकंतदवस्थाधृतेश्च

आहृत्याप्यसकृत्तथोपदिशतिप्यात्मंनुपागच्छनिग्राहंयातिचशास्त्रतोप्रतीककलनात्साब्रह्मदृष्टिः प्रभोः आदित्यादिकृतीषुतथासति

रपिकर्मगताध्माननोतस्माच्चास्थिरतांस्मरंतिचपुनः यत्रैवतत्रश्रुता ८१ आप्रयाणात्तत्रदृष्टंहियत्रतत्रागमापूर्वयोः श्लेषनाशौ तथेतरस्यापि
पतेदसंस्तत्तौअनारब्धादग्निहोत्रादिकार्ये अतोन्येषामुभयोर्यत्रयोगाविद्याभोगेनवाङ्मनसीदर्शनाच्चसर्वाण्यनुमनसाप्राणएवसोध्यक्षेतउप
दर्शनकश्चित् ८३ समानवृत्याक्रमतेचासुतत्वात्संसारतोव्यपदेशोपपत्तेः सूक्ष्मोप्रमाणोपलब्धोपमर्दः स्थितिश्चतत्रोपपत्तेरेषउष्मास्येकेत्र
स्मर्यनानुपरताविधिवाक्यसिद्धेर्वैयासिकिः मुनिरेवोग्ययात्मा ८४ अविभागोवचनाद्धार्दएवरश्म्यनुसारीनिशितोदक्षिणेयने योगिनः प्रति
स्मृतेः तथार्चिरादावायुमहद्वितोवरुणेन ८५ आतिवाहिकविधेस्तद्लिंगात्ततहृदतउभयोरपिसिद्धिः तद्वैतेनगतिरणुयाचतोविशेषसामीप्यसका
र्येहेतौ ८६ स्मृतिस्तथान्योपिचदर्शनेनकार्येनतथाप्रतिपत्तिप्रतीकः विशेषदृष्टासंपद्याविर्भवेनस्वेनांशत्वान्मुक्तिविज्ञानतोहि ८७ आत्मप्रका
शाद्विभागेनदृष्टः तद्ब्रह्मणोन्यद्युतितन्मात्रतोन्यः उपन्यासादन्यसंकल्पभूतारथवान्योप्युथाह ८८ भावमन्योउभयंनस्वभावाभावेसंपत्ति
रेवंस्वाप्यसंपत्तिरेवंजगत्स्यात् प्रत्यक्षेणोपदेशास्थितिरपिजगतोर्यक्तिभावादुपासाभेदाभासस्थितिरविकारावर्त्तिरीरितिच ८९ तथादृष्टेः दृष्टुः
विपरीतिरदृष्टेः श्रुतिवशात्तथाबुद्धेः बोधोभवतिअनुमानेनहिबुधः भोगेसामान्यलिंगाच्छिवभजनभवेमान्यमनस्याअनावृत्तिः शब्दोभवति
विधिवाक्येननियतं ९० तवोक्तः सूत्राणांविधिरपिचसामान्यमुभयः मन्त्रदृष्टश्रुत्यैवप्रभवतिमहानंदसदने स्कंदउवाच त्रिनेत्रवक्त्रसुच
रित्ररूपमंत्रार्थवारांबुजमित्ररूपाः मदृष्टरूपामुनयोविनेनिरेमतानुसारिण्यथसूत्रितानि नतानिबुध्युद्भवबोधदानिविश्वेशपादांबुजभक्ति
दानि ९१ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेसूत्रोपदेशोनामद्वितीयोध्यायः २॥ ॥ सूतउवाच॥ ततोमहेशान्तंसंश्रुत्यसूत्राणिऋभुर्वहि
कैलाशेशंमहादेवंतुष्टावविनयांजलिः १ लब्धज्ञानोमहादेवात्सुनिम्भःकपयश्चनत्त् तत्स्तुतिंचश्रृणुष्वेतिजगाददगिरिजासुतः जैगीषव्यं
महात्मानंजितषड्वर्गमुत्तम स्कंदउवाच संस्तुत्यसांबमीशानंऋभुर्ज्ञानमविंदत ३ शांभवः समहायोगीतुष्टावाष्टतनुंहरं ऋभुरुवाच
गंधद्विपवरवृंदत्वचिरुचिरंधोद्धतपरगंधप्रमुखमदांधव्रजदरिहरिमुखरनरवोद्यस्कंदोद्यतसुखवंधसुरनिभनिर्यद्रसगरभिंदन्न
गधरविंध्यप्रभशिवमेध्यप्रभुरेवमेदांधव्रजदध्योत्तमशिवभेद्याखिलजगदुद्यद्द्रविगतवेद्यागमशिखगद्यस्तुतपदपद्यप्रकरहृदुद्यभवगदवे

द्योतमपाहिशंभो ४ चंडद्विपकरकांडप्रभभुजदंडोद्यतनगखंडत्रिपुरमहांडस्फुरदुडुपशिखंडद्युतिवरगंडद्वयकोदंडांतकदंडितपदपाहि
शंभो ५ किंचिज्जललववर्षिचद्विजकुलमुंचद्वृजिनकुलंचद्विजपतिचंचच्छविजरकुंचत्पदनखमुंचन्नतवरकरुणापाहिशंभो ६ देवशंकर
हरमहेश्वरपापतस्करामरभयस्करशिवदशंकरपुरहरेश्वरपाहिशंभो ७ अंगजभंगतुंगरथांगजलधिनिषंगधृतभुजगांगदशिशुपतंगकरसु
कुरंगजटधृतगंगंयमिहृदिसंगंभजशिवलिंगंभवभयभंगं ८ शंवरकरशरदंवरवरचरडंवरघोषणोडुंवरफलजगन्निकुरंवभरणहरविवितहृदि
चिरलंवितपदयुगलंवोदरजनकांतकहरशिवविंदुवरासनलिंदुगाहनशरदिंदुवदनचरकंदधवलगणवृंदविनतभवभयहरपरवरकरुणाक
रफणिवरभूषणस्मरहरनगधरपरिपाहि ९ रासभवृषभेभश्वखानननगभगुणनंदितत्रिगुणपथातिगशरवणभवनुततरणिस्थितवरुणालयकृत
पारणमुनिशरणायितपदपद्मारुणपिंगजटाधरकुरुकरुणाकरशंकरशंकररमे १० जंभप्रहरणांकुंभोद्भवनुतशुंभप्रमथनिशुंभद्युतिहरभिंदद्र
णगणडिंभाद्दृतसुरत्तारकहरसुतकुंभ्युद्यतपदविंध्यस्थितदितिमांद्यप्रहरमंदाधद्विपवरकृत्तिप्रवरसुधांधस्सुनतपदवुध्यागमशिवमेध्या
तिथिवरदममावंध्यंकुरुदिवसंनवपूजनतः परिपाहिशंभो ११ कुंदसदृशमकरंदनिभसुरवृंदवितुतकुरुविंदमणीगणवृंदनिभांघ्रिजमंदरव
सदिंदुमकुटशरदंजकृशगरनिंदनगलसुंदरगिरितनयाकृतीदेहवरांकगविंदुकलितशिवलिंङ्गगहनसुतसिंदुरवरमुखवंधुरवरसिंधुनदीत
टलिंगनिवहवरदिग्वसपाहिशंभो १२ दक्षाध्वरवरशिक्षप्रभुवरत्र्यक्षप्रवलमहोक्षस्थितसितवक्षस्स्थलकुलचक्षुश्रवसवराक्षस्त्रजहरवी
क्षानिहितअधोक्षजात्मजवरकक्षाश्रयपुरपक्षविदारणलीक्षायितसुरभिक्षाशनहरपद्माक्षार्चनतुष्टभगाक्षिहराव्ययशंकरमोक्षप्रदपरि
पाहिमहेश्वर १३ अक्षयफलदस्तुभाक्षहरांतकस्तनतक्षककरगरभक्षपरिस्फुरदक्षक्षितिरथसुरपक्षाव्ययपुरहरभवहरहरिशरशिववि
वशंकरकुरुकरुणांशशिमौले १४ भजाम्यगसुताधवंपशुपतिंमहोक्षध्वजंवलक्षभसितोज्वलंप्रकटदक्षदाहाक्षिकं भगाक्षिहरणंशि
वंप्रमथितोरुदक्षाध्वरप्रपक्षसुरतामुनिप्रमथशिक्षिताधोक्षजं १५ श्रीनाथाक्षिसरोजराजितपदांभोजैकपूजोत्सवैः नित्यंमानसमेतद
स्तुभगवन्रुद्राक्षमौलेहर १६ भूषाभूतभुजंगसंगतमहाभस्मांगनेत्रोज्वलज्वालादग्धमनंगदंगुमाकांतांवुगंगाधर स्वात्मानंदपरायणं
वुजभवस्तुत्याघुनापाहिमां १७ गिरिजामुखसन्मुखषण्मुखपंचमुखोद्यतदुर्मुखमुखहरआखुवहोन्मुखलेखगणोन्मुखशंकरखगगमपरिपू

शिवरहस्यप० ६ १८ कोटिजन्मविप्रकर्मस्तुस्थचित्तवर्त्मनां श्रौतसिद्धशुभ्रभस्मदिग्धसर्ववर्ष्मणां १९ रुद्रशुक्तमेध्यभुक्तिदग्धसर्वपाप्मनां रुद्रसूक्तिउक्ति
भक्तिभुक्तिदायिनां पुरहरइष्टतुष्टिमुक्तिलासवासभक्तिभासकैलासमीशआशुलभ्यते २० स्कंदउवाच तत्स्तुत्यातोषितः शंभुः तमाहरूद्र
अ०२ भुमीश्वरः प्रसन्नः करुणांभोधिरंभोजसुतमोदने २१ श्रीईश्वरउवाच वेदांतपाठपठनेनहठादियोगैःश्रीनीलकंठपदभक्तिविकुंठभावाः
येकर्मठायतिवराहरिसौरिगेहेसालान्टकैःवरकठोरकुठारघातैः २२ भिन्नोत्तमांगहृदयाश्चभुसुंठिभिर्स्तैर्भिक्षाशनाजरठरासभवह्नमंति विघु
६ च्चंचलजीवितेपिनमनागुपसन्नव्यतेशांभवेभक्तिर्भीमपदांबुजोत्तमपदेभस्मत्रिपुंड्रेपिच रुद्राक्षामलरुद्रसूक्तजपनेनिष्ठाकनिष्ठात्मनांविश्वविष्टकुनि
ष्टकष्टकुधियांदुष्टात्मनांसर्वदा २४ अष्टनांदुरदृष्टतोजनिजरानाशेननष्टात्मनांजेष्टश्रीशिपिविष्टचारुचरणांभोजार्चनानादरः तेनानिष्ट
परंपरासमुदयैःअस्ताङ्कतेर्नस्मृतिःविष्ठापूरितदुर्मुखेषुनरकेष्वाष्ट्रैचिरंसंस्थितिः २५ अज्ञायतेष्वभिज्ञाःस्सुरवरनिकरस्तोत्रशस्त्रादितुष्टसत्रा
शंमंत्रमात्रैःविधिविहितधियासोमभागैर्यजंति आस्येश्रस्याहरणभरणभ्रांतरूपानुपितृस्तेततश्रस्थासमुदितमनाःस्वांतराशंभुमीशंनाभ्यर्च
तिप्रणतशरणंमोक्षदंमामहेशं २६ आर्याःशर्वसमर्चनेनसततंदूर्वादलैःकोमलैःविल्वारवर्वदलैश्चशंकरमहाभागंहृदंतःसदा पर्वस्वप्यवि
शेषितेनमनसागर्वंविहायादरात् दुर्गाण्याश्रुतरंतिशंकरकृपापीयूषधारारसैः २७ श्रीचंद्रचूडचरणांबुजपूजनेनकालंनयंतिपशुपाशविमुक्ति
हेतौ भावाःपरंभसितफाललसत्त्रिपुंड्ररुद्राक्षकंकणलसत्करदंडयुग्माः २८ पंचाक्षरश्रवणसक्तधियावदंतिनामानिशांभवमनोहरदानिशंभोः
मुक्तिप्रदानिसततंशिवभक्तवर्याःयोविल्वमूलशिवलिंगसमर्चनेन २९ कालंनयेद्विमलकोमलविल्वपत्रैःनोतस्यकालजभयंभवतापपापं स्वंता
पभूपजनितंभजतांमहेशं ३० शम्वद्विश्वेशपादेयमशमनियमैःभूतिरुद्राक्षगात्रोविश्वत्रस्तोभुजंगागदगिरिजानायकेलब्धभक्तिः मुग्धोप्यध्या
त्मविद्योभवतिभवहरस्यार्चयाप्राप्तकामः ३१ शब्दैरब्दशतेपिनैवसुलभेतज्ज्ञानंनतर्कभ्रमैः मीमांसाहृयतोद्वयपदंकिंसारसंसारवत् योगाया
सपरंपरादिविहितैःवेदांतकांतारकभ्राम्यन्मुक्तिविवर्जितेनमनसाशंभोःपदंमुक्तये ३२ किंगंगयावामकरेप्रयागस्नानेनवायोगमखक्रियाद्यैः
यत्रार्च्यतेलिंगवरंशिवस्यतत्रैवसर्वार्थपरंपरास्यात् ३३ श्रीशैलेहिमभूधरेरुणगिरिःहस्त्यद्रिगोपर्वतौश्रीमद्देमसभाविहारभगवन्नरत्नत्रिनेत्रो शिवम्
गिरिः ३४ कैलासोत्तरदक्षिणोचभगवान्यत्रार्च्यतेशंकरः लिंगेसंनिहितोवसत्यनुदिनंशांगस्यहृत्पंकजे ३५ तत्राविमुक्तशशिचूडवासमोंकार ६

लेजरुद्रकोटिंगंगांबुधेःसंगमंमंविकापतिप्रियंतुगोकर्णकसह्यजातरं ३६ यत्राभ्यर्णगतंमहेशकरुणापूर्णंतुतूर्णीहृदा लिंगंपूजितमप्यपास्त
दुरितंतीर्थानिगंगादयःपुण्याश्चाश्रमसंघकागिरिवरक्षेत्राणिशंभोःपदं भक्तिर्युक्तभजनेनमहेशेशुक्तिवज्जदिदंपरिभाति ३७ कर्मादिहृद्भाव
पिवेदमौलिसिद्धांतवाक्यकलनेपिभवंतिमंदाः कामादिवश्यहृदयाःसितभस्मपुंड्ररुद्राक्षशंकरसमर्चनतोविहीनाः ३८ हीनाभवंतिसुबुधाप्य
बुधाभ्रमंतिमत्प्रेमवासस्सदनेषुविहीनवासाः अष्टम्यामष्टमूर्तिंनिशिशशिदिवसेसोमचूडंतुमुक्त्यैभूतायांभूतनाथंधृतभसिततनुःवीतदोषंप्रदोषे
गव्यैःपंचामृताद्यैःफलवरजसैःविल्वपत्रैश्चलिंगेतुंगेशांगेषुसंगोभजतियतहृदानऋभुस्त्वेवभक्तः ३९ ज्ञानानुत्पत्तिपत्तत्थरिविधिसमतावुद्धि
रीशानमूर्तौभस्माक्षाद्यतिरीशलिंगभजनाभूत्पूर्वदुर्मानसं शंभोस्तीर्थमहत्सुतीर्थवरकेनिंदावरेशांभवेद्रोहःतदर्थेषुचश्रीमद्रुद्रजपाद्यकार
णात्ज्ञानंनचोत्पद्यते ४० ईशोत्कर्षधियैकलिंगनियमादभ्यर्चनंभस्मधृक्रुद्राक्षामलनारमंत्रसुमहापंचाक्षरेजापिनाईशस्थाननिवासश्र
भवकथाभक्तिश्चसंकीर्त्तनंभक्तस्यार्चनतोभवेत्सुमहाज्ञानंपरंमुक्तिदं आद्यंतयोर्यःप्रणवेनयुक्तंश्रीरुद्रमंत्रंप्रजपेदघघ्नं तस्यांघ्रिरेणुं
शिरसावहंतिब्रह्मादयःस्वाघनिवृत्तिकामाः ४२ अपूर्वाथर्वोक्तश्रुतिशिरसिविज्ञानमनघंमहात्स्वर्वाज्ञानप्रशमनकरंयोविरचयेत् मुनेरह
त्पर्वाणांविशसनकरंसप्तमनुभिःव्रतंशीर्षण्यंयोविरचयतितस्येदमुदितं ४३ गुरोर्यस्यप्रेमश्रुतिशिरसिसूत्रार्थपदगंमयिश्रद्धाहृत्स्याभवति
किलतस्यैषसुलभः अनन्योमार्गोयंअकथितमिदंत्वय्यपिसदायदागोप्योमुग्धेषुविहितमुनिषेधंवदिश्यै ४४ स्कंदउवाच इतिश्रुत्वाशंभोःप्र
मुदितमनास्तत्वषसऋभुःमुनिर्नत्वाहेदंनगमगमदीशस्यनिलयं यतोगंगातुंगाप्रपततिहिमाद्रेःशिखरतोमुनींद्रेषाहेदंतदपिश्रृणुविप्रोत्तम
हृदा ४५ ऋभुरुवाच पतंत्वश्मानयोमुहुःगिरिवरैःसमुद्रोर्वीराभवत्वधरसंप्लवागृहगणाःसुराणांत्वधः भवज्ज्ञानिमपूजनान्ममनोनयात्व
न्यतःशपामिप्रपदेप्रभोःतवसरोरुहाभेहर ४६ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेशिवऋभुसंवादेतृतीयोध्यायः ३॥ स्कंदउवाच हिमा
द्रिशिखरेतत्रकेदारेसंस्थितंऋभुं केदारेशंपूजयंतंशांभवंमुनिसत्तमं १ भस्मरुद्राक्षसंपन्नंनिस्पृहंमुनयोब्रुवन् मुनयऊचुः पद्मा
द्भवसुतश्रेष्ठत्वयाकैलासपर्वते आराध्यदेवमीशानंतस्मात्तत्त्वंश्रुतीरितं २ ज्ञानंलब्धंमुनिश्रेष्ठतंनोब्रूहिविमुक्तये येनसंसारवाराशेःसमु

 त्तीर्णभवामहे ३ सूतउवाच ऋभुर्मुनीनांवचसातुष्टःशिष्यान्समीक्ष्यतान् अष्टमूर्तिपदध्याननिष्ठांस्तानभ्युवाचह ४ ऋभुरुवाच नागोप्यंभ
वतामस्तिशांभवेषुमहात्मसुत्रिनेत्रप्रेमसदनान्युष्मान्वीक्ष्यवदामितत् ५ शांकरंसूत्रविज्ञानंश्रुतिशीर्षमहोदयं शृणुध्वंब्रह्मविच्छ्रेष्ठाःशिवज्ञान
 महोदयं ६ येनतीर्णास्यसंसारात्शिवभक्त्याजितेंद्रियाः नमस्कृत्यमहादेवंवक्ष्येविज्ञानमैश्वरं ७ ऋभुरुवाच विश्वस्यकारणमुमापतिरेवदेवो
विद्योतकोजडजगत्प्रमुदेकहेतुः नतस्यकार्यकरणंमहेशितुःसएवतत्कारणमीश्वरोहरः ८ सूतःसायकसंभवःसमुदिताःसूतानतेभ्योहयाः
नेत्रेतेरथिनोरथांगयुगलीयुग्यांतमृग्योरथी मौर्वीमूर्ध्निरथःस्थितोरथवहेचापःशरंमंत्रयंयोस्तुकेशचराःसएवनिखिलस्यापोरणःपातुवः ९
 निदाघमथसंबोध्यततोऋभुरुवाचह अध्यात्मनिर्णयंवक्ष्येनास्तिकालत्रयेष्वपि १० शिवोपदिष्टंसंक्षिप्यगुह्याद्गुह्यतरंसदा अनात्मेतिप्रसंगा
च्चअनात्मेतिमनोपिवा ११ अनात्मेतिजगद्वापिनास्त्यनात्मेतिनिश्चिनु सर्वसंकल्पशून्यत्वात्सर्वाकारविवर्जनात् १२ केवलंब्रह्मभावत्वान्नास्त्यना
त्मेतिनिश्चिनु चित्ताभावेचिंतनीयोदेहाभावेजरानच १३ केवलंब्रह्ममात्रत्वान्नास्त्यनात्मेतिनिश्चिनु पादाभावाद्गतिर्नास्तिहस्ताभावात्क्रियानच १४
केवलंब्रह्ममात्रत्वान्नास्त्यनात्मेतिनिश्चिनु ब्रह्मभावाज्जगन्नास्तितदाभावेहरिर्नच १५ केवलंब्रह्ममा० मृत्युर्नास्तिजराभावेलोकवेदगुराधिकं
केवलंब्रह्म० धर्मोनास्तिशुचिर्नोस्तिसत्यंनास्तिभयंनच १७ केवलंब्रह्म० अक्षरोच्चारणंनास्तिअक्षरंसजडंममं १८ केवलंब्रह्ममा० गुरुरित्यपिना
स्येवशिष्योनास्तीतितत्वतः १९ एकाभावाद्द्वितीयंननद्वितीयान्नचैकता सत्यत्वमस्तिचेत्किंचित्सत्यत्वंचनसंभवेत् २० असत्यत्वंयदिभवेत्त
त्सत्यत्वंनघटिष्यति शुभंयद्यशुभंविद्धिअशुभंशुभमस्तिवा २१ केवलंब्रह्ममात्रत्वा० भयमद्यभयंविद्धिअभयाभययापतेत् २२ केवलंब्रह्ममा०
वंधत्वमस्तिचेन्मोक्षोवंधाभावेनमोक्षता २३ मरणंयदिचेज्जन्मजन्माभावेमृतिर्नहि त्वमित्यपिभवेच्चाहंत्वंनोचेदहमेवन २४ इदंयदितदेवा
पितदभावेइदंनच अस्तिचेदितितंनास्तिनास्तिचेदस्तिकिंचन २५ कार्यंचेत्कारणंकिंचित्कार्याभावेनकारणं द्वैतंयदितदाद्वैतंद्वैताभावेद्वयंनच
दृश्यंयदिदृगप्यस्तिदृश्याभावेदृगेवन अंतर्यदिवहिःसत्यंअंताभावेवहिर्नच २७ पूर्णत्वमस्तिचेत्किंचित्अपूर्णत्वप्रसज्यते किंचिदस्तीतिचे
च्चित्तेसर्वंभवतिशीघ्रतः २८ यत्किंचित्किमपिक्वापिनास्तिचेन्नप्रसज्जति तस्मादेतत्क्वचिन्नास्तित्वन्नाहंवाइमेइदं २९ केवलंब्रह्मभावत्वान्ना० शिवम्

नास्तिदृश्यंतिकंसत्येनास्तिदार्श्यतिकिंक्वचित् ३० केवलंब्रह्म० परंब्रह्माहमस्मीतिस्मरणस्यमनोनहि ३१ ब्रह्ममात्रंजगदिदंब्रह्ममात्रत्वमाप्य
हि चिन्मात्रेकेवलंचाहंनास्तिनात्मेतिनिश्चिनु ३२ इत्यनात्मनिर्णयंप्रोक्तंभवतेसर्वसंग्रहं सकृच्छ्रवणमात्रेणब्रह्मैवभवतिस्वयं ३३ ऋभुरुवाच
निदाघकोभवान्कोनुवदमेवदतांवर यच्छ्रुत्वातत्क्षणान्मुच्येतमहासंसारसंकटात् ३४ अहमेवपरंब्रह्मअहमेवसुखंपरं अहमेवाहमेवाहमहंब्र
ह्मास्मिकेवलं ३५ अहंचैतन्यमेवास्मिंदिव्यज्ञानात्मकोह्यहं सर्वाक्षरविहीनोस्मिअहंब्रह्मास्मिकेवलं ३६ अहमर्थविहीनोस्मिइदमर्थविवर्जितः
सर्वानर्थविमुक्तोस्मि० ३७ नित्यशुद्धोस्मिनित्योस्मिबुद्धोस्म्यत्यंतनिर्मलः नित्यानंदस्वरूपोस्मिआद्यहीनोस्म्यनंतकः ३८ अप्राकृतस्वरूपोस्मिअ
हंब्रह्म० स्वस्वसंकल्पहीनोहंसर्वाविद्याविवर्जितः ३९ सर्वमस्मितदेवास्मि० सर्वनामादिहीनोहंसर्वरूपविवर्जितः सर्वसंगविहीनोस्मिअहं०सर्वे
वाचांविधिश्चास्मिसर्ववेदान्तयीपरः ४१ सर्वकालविधिश्चास्मीत्यहंब्रह्मास्मि० सर्वरूपावधिश्चाहंसर्वनामावधिःसुखं ४२ सर्वकल्पावधिश्चास्मि०
अहमेवसुखंनान्यत्अहमेवचिदव्ययः अहमेवास्मिसर्वत्रअहं० केवलंब्रह्ममात्रात्माकेवलंशुद्धचिद्घनः ४४ केवलाखंडसारोस्मि० केवलंज्ञा
नरूपोस्मिकेवलाकाररूपवान् ४५ केवलात्यंतसारोस्मीत्यहं० सत्स्वरूपःकेवलोस्मिस्वरूपोस्म्यहमेवहि ४६ अर्थानर्थविहीनोस्मि०अप्रमेयस्व
रूपोस्मिअप्रतर्क्यस्वरूपवान् ४७ अग्राह्यःस्वरूपोस्मीत्यहं० अरसस्सुतरूपोस्मिअनुतापविवर्जितः ४८ अनुस्यूतप्रकाशोस्मीत्यहंब्र० सर्वक
र्मविहीनोयोसर्वभेदविवर्जितः ४९ सर्वसंदेहहीनोस्मिकेशवत्वादिनक्वचित् शंकरादिविहीनोस्मित्यहंब्र० ५० तूष्णीमेवावभासोस्मीत्यहंब्र०
किंचिन्नास्तिपरोनास्तिकिंचिदस्तिपरोस्मिच ५१ नशरीरप्रकाशोस्मिजगद्भासकरोनच चिद्घनोस्मिचिदंशोस्मिसत्स्वरूपोस्मिसर्वदा ५२ मुदामु
दितरूपोस्मिअ० नबालोस्मिनवृद्धोस्मिनयुवास्मिपरात्परः ५३ नचनानास्वरूपोस्मीत्यहं० इदंस्वानुभवंप्रोक्तंसर्वोपनिषदांरसं ५४ योवाकोवा
श्रृणोतीदंब्रह्मैवभवतिस्वयं सूतउवाच नस्थूलोप्यनणुःनतेजमरुत्तामाकाशहृदयाद्याकाशमात्राक्रमैः उद्धृत्यश्रुतिशास्त्रसूत्रकरणैःकिंचि
त्सर्वंज्ञात्वाबुध्यामोहितमाययाश्रुतिशतैःनैजानतेशंकरं ५६ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेऋभुनिदाघसंवादोनामचतुर्थोध्यायः॥४॥

शिवरहस्य० ६ निदाघउवाच॥ त्वमेवब्रह्मएवासित्वमेवपरमोगुरुः त्वमेवाकाशरूपोसित्वंब्रह्मासिनसंशयः २ एवंस्थितेऋभोकोवैब्रह्मभावायकल्पते तन्मेवद
अ०४ विशेषेणज्ञानंशंकरवाक्यजं १ ऋभुरुवाच त्वमेवसर्वभावोसित्वमेवार्थस्त्वमव्ययः त्वंसर्वहीनःत्वंसाक्षात्साक्षिहीनोसिसर्वदा ३ कालस्त्वंस
र्वहीनस्त्वंसाक्षिहीनोसिसर्वदा कालहीनोसिकालोसिसदाब्रह्मासिचिद्घनः ४ सर्वतत्त्वस्वरूपोसित्वंब्रह्मासिनसंशयः सत्योसिसिद्धोसिसनातनो
८ सिसत्यादिवाक्यैःप्रतिपादितोसि ६ सर्वांगहीनोसिसदास्थितोसिब्रह्मासि० सर्वप्रपंचभ्रमवर्जितोसिसर्वेषुभूतेषुसदोदितोसि ७ सर्वत्रसंकल्प
विवर्जितोसिब्रह्मा० सर्वत्रसंतोषसुखासनोसिसर्वत्रइत्येवविवर्जितोसि ८ सर्वत्रकार्यादिविवर्जितोसिब्रह्मा० चिदाकारस्वरूपोसिचिन्मात्रोसिनि
रंकुशः आत्मन्येवास्थितोसित्वंत्वंब्रह्मासिनसंशयः ९ आनंदोसिपरोसित्वंसर्वशून्योसिनिर्गुणः एकएवाद्वितीयोसित्वंब्रह्मासि० १० चिद्घनानं
दरूपोसिचिदानंदोसिसर्वदा परिपूर्णस्वरूपोसित्वंब्रह्मासिनसंशयः ११ तदसित्वमसिज्ञोसिसोसिजानासिवीक्ष्यसि चिदसिब्रह्मभूतोसित्वं
ब्रह्मा० १२ अमृतोसिविभुश्चासिदेवोसित्वंमहानसि चंचलोस्यकलंकोसित्वंब्रह्मा० १३ सर्वोसिसर्वहीनोसिशांतोसिपरमोह्यसि कारणंत्वंप्र
शांतोसित्वंब्रह्मा० १४ सत्तामात्रस्वरूपोसिसत्तासामान्यकोह्यसि नित्यशुद्धस्वरूपोसित्वंब्रह्मा० १५ ईषन्मात्राविहीनोसिअणुमात्रविवर्जितः
अस्तित्ववर्जितोसित्वंनास्तित्वादिविवर्जितः १६ योसिसोसिमहांतोसित्वंब्रह्मा० लक्ष्यलक्षणहीनोसिचिन्मात्रोसिनिरामयः १७ अखंडैकरसो
नित्यंत्वंब्र० सर्वाधारस्वरूपोसिसर्वतेजःस्वरूपकः १८ सर्वार्थभेदहीनोसित्वंब्र० ब्रह्मैवभेदशून्योसिविष्णुत्वादिविवर्जितः १९ शिवेतिभेदहीनो
सित्वंब्र० प्रज्ञानज्ञानहीनोसिस्वस्वरूपंप्रपश्यसि २० स्वस्वरूपस्थितोसित्वंत्वंब्र० स्वस्वरूपावशेषोसिस्वस्वरूपामृतोह्यसि २१ स्वानंदसिंधु
मग्नोसित्वंब्र० स्वात्मराज्येत्वमेवासिस्वयमात्मतमोह्यसि २२ स्वयंपूर्णस्वरूपोसित्वंब्र० स्वस्मिन्सुखेस्वयंचासिस्वयंसर्वत्रपश्यसि स्वस्मिन्
स्वयंस्वयंभुंक्षेत्वंब्रह्मासिनसंशयः २३ सूतउवाच तदानिदाघवचसातुष्टोऋभुरुवाचतं शिवप्रेमरसेपात्रंतंवीक्ष्याशुजनंदनः २४ ऋभुरुवाच
कैलासेशंकरःपुत्रंकदाचिदुपदिष्टवान् तदेवतेप्रवक्ष्यामिसावधानमनाःशृणु २५ इदंप्रपंचंनास्त्येवनोत्पन्नंनस्थितःक्वचित् चित्तंप्रपंचमि

शिवः
८

स्याहुः नास्तिनास्त्येवसर्वदा २६ नप्रपंचंनचित्तादिनाहंकारोनजीवकः केवलंब्रह्ममात्रत्वान्नास्तिनास्त्येवसर्वदा २७ मयाकार्यादिकं
नास्तिमायाकार्यभयंनहि केवलंब्रह्ममात्रत्वान्नास्तिनास्त्येवसर्वदा २८ कर्तानास्तिक्रियानास्तिकारणंनास्तिपुत्रक केवलंब्रह्ममात्रत्वा० २९
एकंनास्तिद्वयंनास्तिमंत्रतंत्रादिकंनच केवलंब्रह्म० ३० श्रवणंमननंनास्तिनिदिध्यासनविभ्रमः केवलंब्रह्म० ३१ समाधिर्द्विविधंनास्तिमात
मानादिनास्तिहि केवलंब्रह्म० ३२ अज्ञानंचापिनास्त्येव अविवेककथानच केवलंब्रह्म० ३३ अनुबंधचतुष्कंनसंबंधत्रयमेवन केवलंब्रह्म० ३४
भूतंभविष्यंनक्वापिवर्त्तमानंनवैक्वचित् केवल० ३५ गंगागयातथासेतुः व्रतंवानान्यदस्तिहि केवलंब्रह्ममा० ३६ नभूमिर्नजलंवन्हिःनवायुर्नचखं
क्वचित् केवलंब्रह्म० ३७ नैवदेवानदिक्पालाः नपितानगुरुःक्वचित् नदूरंनांतिकंनांतंनमध्यंनक्वचित्स्थितिः ३८ नाद्वैतद्वैतसत्यत्वंअस
त्यंवाइदंनच नमोक्षोस्तिनबंधोस्तिनवार्त्तावसरोस्तिहि ३९ क्वचिद्दुःखंकिंचिदेवंवासद्दुःखासद्दुःखासुखानिच द्वंद्वंवातीर्थधर्मादिआत्मानात्मेतिनक्व
चित् ४० नदृष्टिर्नोदयंमृत्युःनिगमागमविभ्रमः इहनास्तिपरंनास्तिनगुरुर्नचशिष्यकः ४१ सदसन्नास्तिभूर्नास्तिकार्यंनास्तिकृतंनच जाति
र्नास्तिगतिर्नास्तिवर्णोनास्तिनलौकिकं ४२ शमादिषट्कंनास्त्येवनियमोवायमोपिन सर्वमिथ्येतिनास्त्येवब्रह्मइत्येवनास्तिहि ४३ चिदित्येवहि
नास्त्येवचिदहंभाषणंनहि अहमित्येवनास्त्येवनित्योस्मीतिचनक्वचित् ४४ केवलंब्रह्ममात्रत्वान्नास्तिनास्त्येवसर्वदा वाचायदुच्यतेकिंचिन्म
नसामनुतेचयत् ४५ बुध्यानिश्चीयतेयच्चचित्तेनज्ञायतेहियत् योगेनयुज्यतेयच्चइंद्रियाद्यैश्चयत्कृतं ४६ जाग्रत्स्वप्नसुषुप्तंचस्वप्नवान्
तुरीयकं सर्वंनास्तीतिविज्ञेयंयदुपाधिविनिश्चितं ४७ स्नानाच्छुद्धिर्नहिक्वापिध्यानाच्छुद्धिर्नहिक्वचित् केवलंब्रह्ममात्रत्वान्नास्तिनास्त्येव
सर्वदा ४८ गुणत्रयंनास्तिकिंचित्पुरत्रयमथापिवा एकद्वित्वपदेनास्तिनबहुभ्रमविभ्रमः ४९ भ्रांतिभ्रांतिनचास्त्येवकिंचिन्नास्तीतिनि
श्चिनु केवलंब्रह्ममात्रत्वान्नकिंचिदवशिष्यते ५० इदंशृणोतियःसम्यक्सब्रह्मभवतिस्वयं ईश्वरउवाच वाराश्यंबुनिबुद्बुदाइवघनानंदां
बुधौमय्युमाकांतेनंतजगद्भूतंसुरनरंजातंचतिर्यक्मुहुः भूतंचापिभविष्यतिप्रतिभवंमायामयंचोर्मिजंसम्यक्मामनुपश्यतामनुभवैःनास्ते
वतेषांभवः ५१ हरंविज्ञातारंनिखिलतनुकार्येषुकरणंनजानंतेमोहाद्यमितकरणाअप्यतितरां उमानाथाकारंहृदयदहरांतर्गतसरःपयोजा

शिवरहस्य०६ नेद्रास्वद्व्भुजगनाशांडजवरं ५२ इतिश्रीशिवरहस्ये शंकराख्ये षष्ठांशे कुमारज्ञानकथनंनामपंचमोध्यायः ५॥ ईश्वर उवाच व्रतानिमि
थ्याभुवनानिमिथ्याभावादिमिथ्याभवनानिमिथ्या भयंचमिथ्याभरणादिमिथ्याभुक्तंचमिथ्यावहुवंधमिथ्या १ वेदश्चमिथ्यावचनानिमिथ्या
अ०६ वाक्यानिमित्याविविधाचमिथ्या विज्ञानमिथ्याविषदादिमिथ्याविधुश्चमिथ्याविषयादिमिथ्या २ गुरुश्चमिथ्यागुणदोषमिथ्यागुह्यंचमिथ्यागणनाच
मिथ्या गतिश्चमिथ्यागमनंचमिथ्यासर्वंचमिथ्यागदितंचमिथ्या ३ वेदशास्त्रपुराणंचकार्यकारणमीश्वरः लोकोभूतंजनंचैवसर्वंमिथ्यानसंशयः ४
९ वंधमोक्षसुखदुःखध्यानंचित्तसुरासुराः गौणमुख्यपरंचान्यत्सर्वंमित्यानसंशयः ५ वाचावदतियत्किंचित्सर्वंमिथ्यानसंशयः संकल्पात्कल्पतेय
द्यत्सर्वंमिथ्येतिनिश्चयः ६ श्रोत्रेणश्रूयतेयद्यत्यन्नेत्रेणनिरीक्ष्यते नेत्रंश्रोत्रंगात्रमेवसर्वंमिथ्यानसंशयः ७ इदमित्येवनिर्दिष्टंइदमित्येवकल्पितं
यद्यद्वस्तुपरिज्ञातुंसर्वंमिथ्यानसंशयः ८ कोहंकिंतदिदंसोहंअन्योवाचयतेनहि यद्यत्संभाव्यतेलोकेसर्वंमिथ्येतिनिश्चयः ९ सर्वभ्याससर्वगोप्यं
सर्वकारणविभ्रमः सर्वभूतेतिवार्ताचमिथ्येतिचविनिश्चयः १० सर्वभेदप्रभेदोवासर्वसंकल्पविभ्रमः सर्वदोषप्रभेदश्चसर्वंमिथ्येतिनिश्चयः ११ र
क्षकोविष्णुरित्यादिब्रह्मासृष्टेस्तुकारणं संहारेशिवइत्येवंसर्वंमिथ्येतिनिश्चयः १२ स्नानंजपोतपोहोमःस्वाध्यायोदेवपूजनं मंत्रस्तोत्रंचसत्संगः
सर्वं० १३ सर्वंमिथ्याजगन्मिथ्याभूतंभव्यंभवत्तथा नास्तिनास्तिविभावेनसर्वंमिथ्येतिचोच्यते १४ चित्तभेदंजगद्भेदंअविद्यायाश्चसंभवः अनेकको
टिब्रह्मांडंसर्वंब्रह्मेतिनिश्चिनु १५ लोकत्रयेषुसद्भावोगुणदोषादिजृंभणं सर्वंदेशिकवार्त्तोक्तिःसर्वं० १६ उत्कृष्टंचनिकृष्टंचउत्तमंमध्यमंचयत्
ओंकारंचाप्यकारंचसर्वंब्रह्मेति० १७ यद्यज्जगतिदृश्येतयद्यज्जगतिवीक्षते यद्यज्जगतिवर्त्तेतेसर्वंब्रह्मेति० १८ येनकेनापिनीतंतत्सर्वंब्र० येनके
नापिगदितंयेनकेनापिमोहितं १९ येनकेनापिचप्रोक्तंसर्वंब्र० येनकेनापियद्दत्तंयेनकेनापियत्कृतं २० यत्रकुत्रजलेस्नानंसर्वंब्रह्मे० यत्रयत्रशुभंक
र्मयत्रयत्रचदुष्कृतं २१ यद्यत्करोषिसत्येनसर्वंमिथ्येतिनिश्चिनु इदंसर्वमहंसर्वंसर्वंब्रह्मेतिनिश्चिनु २२ यत्किंचित्प्रतिभानंचसर्वंमिथ्येतिनिश्चिनु
ऋभुरुवाच पुनर्वक्ष्येरहस्यानांरहस्यंपरमाद्भुतं शंकरेणकुमारायप्रोक्तंकैलासपर्वते २३ तन्मात्रमेवचिन्मात्रंअखंडैकरसंसदा एकवर्जितचिन्मात्रं
सर्वंचिन्मयमेवहि २४ इदंचसर्वंचिन्मात्रंसर्वंचिन्मयमेवच आत्माभासंचचिन्मात्रंसर्वं० २५ सर्वलोकंचचिन्मात्रंसर्वं० त्वत्तामत्ताचचिन्मात्रंचिन्मात्रात्ना शिवम्
९

स्तिकिंचन २६ आकाशोभूर्जलंवायुःअग्निर्ब्रह्माहरिःशिवः यत्किंचिदन्यत्किंचित्त्वसर्वंचिन्मयमेवहि २७ अखंडैकरसंसर्वंयद्यच्चिन्मात्रमेवहि भूतंभव्यंच
चचिन्मात्रंसर्वं० २८ द्रव्यंकालंचचिन्मात्रंसर्वं० ज्ञानंचिन्मयमेवच ज्ञेयंज्ञाताचचिन्मात्रंसर्वं० २९ संभाषणंचचिन्मात्रंवाक्यचिन्मात्रमेवहि असच्चसच्चचि
न्मात्रंसर्वं० ३० आदिरंतंचचिन्मात्रंअस्तिचेच्चिन्मयंसदा ब्रह्मायद्यपिचिन्मात्रंविष्णुःचिन्मात्रमेवहि ३१ रुद्रोपिदेवाःचिन्मात्रंनरत्तिर्यक्सुरासुरं गुरुशिष्या
दिसन्मात्रंज्ञानंचिन्मात्रमेवहि ३२ दृक्दृश्यंचापिचिन्मात्रंज्ञातृज्ञेयंध्रुवाध्रुवं सर्वाश्चर्यंचचिन्मात्रंदेहंचिन्मा० ३३ लिंगंचापिचचिन्मात्रंकारणंकार्यमेवच मू
र्तामूर्तंचचिन्मात्रंपापंपुण्यमथापिवा ३४ द्वैताद्वैतंचचिन्मात्रंवेदंवेदांतमेवच दिशोपिविदिशश्चैवचिन्मात्रंतस्यपालकाः ३५ चिन्मात्रंव्यवहारादिभूतंभव्यं
भवत्तथा चिन्मात्रंनामरूपंचभूतानिभुवनानिच ३६ चिन्मात्रंप्राणएवेहचिन्मात्रंसर्वइंद्रियं चिन्मात्रंपंचकोशादिचिन्मात्रानंदमुच्यते ३७ नित्यानित्यंचचि
न्मात्रंसर्वंचिन्मात्रमेवहि चिन्मात्रंनास्तिनित्यंचचिन्मात्रंनास्तिसत्यकं ३८ चिन्मात्रमपिवैराग्यंचिन्मात्रकमिदंकिल आधारादिहिचिन्मात्रंआधेयं
चमुनीश्वर ३९ यच्चयावच्चचिन्मात्रंयच्चयावच्चदृश्यते यच्चयावच्चदूरस्थंसर्वंचिन्मात्रमेवच ४० यच्चयावच्चभूतानियच्चयावच्चवक्ष्यते यच्चयावच्चवे
दांतंसर्वंचिन्मात्रमेवहि ४१ चिन्मात्रंनास्तिबंधंचचिन्मात्रंनास्तिमोक्षकं चिन्मात्रमेवसन्मात्रंसत्यंसत्यंशिवंस्पृशे ४२ सर्ववेदत्रयंप्रोक्तंसर्वंचिन्मात्रमे
वहि शिवप्रोक्तंकुमारायतदेतत्कथितंत्वयि ४३ यःशृणोतिसकृद्वापिब्रह्मैवभवतिस्वयं सूतउवाच ईशावास्यादिमंत्रैर्वरगगनतनोःक्षेत्रवासार्थवा
दैः तल्लिंगागारमध्यस्थितसुमहदीशानलिंगेषुपूजा ४४ अर्घ्यंद्येचाभिषेकोदिग्वसेवासदानंनेगंधघ्राणहीनेरूपदृश्याद्दृहीनेगंधपुष्पार्पणानि॥
स्वभासेदीपदानंसर्वभक्ष्यमहेशेनैवेद्यंनित्यतृप्तेसकलभुवनगेप्रक्रमोवानमस्याकुर्यांकेनापिभावैर्ममनिगमशिरोभावएवप्रमाणं ४५ अविच्छिन्नेच्छि
न्नेःपरिकरवरैःपूजनधियाभजंत्यज्ञाःतज्ज्ञाःविधिविहितबुध्यागतधियः तथापीशोभावैःभजतिभजतांमात्मपदवींददातीशोविश्वंभ्रमयतिगताज्ञाश्च
कुरुते ४६ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेऋभुनिदाघसंभसंवादोनामषष्ठोध्यायः ६॥ ऋभुरुवाच अत्यद्भुतंप्रवक्ष्यामिसर्वलोकेषुदुर्लभं
वेदशास्त्रमहासारंदुर्लभंदुर्लभंसदा १ अखंडैकरसंमंत्रअखंडैकरसंफलं अखंडैकरसंजीवमखंडैकरसक्रिया २ अखंडैकरसंब्रह्मअखंडैक
रसंव्रतं अखंडैकरसंभूमिःअखंडैकरसंजलं अखंडैकरसंगंधअखंडैकरसंवियत् ३ अखंडैकरसंब्रह्मअखंडैकरसंव्रतं अखंडैकरसोविष्णुःअखं

शिवारहस्य ६ डैकरसः शिवः ४ अखंडैकरसं शास्त्रं अखंडैकरसं श्रुतीः अखंडैकरसं वाच्यं अखंडैकरसं महः ५ अखंडैकरसं देहं अखंडैकरसं मनः अखंडैकरसं चित्तं अखंडै
करसं सुखं ६ अखंडैकरसो विद्या अखंडैकरसोव्ययः अखंडैकरसो नित्यं अखंडैकरसः परः ७ अखंडैकरसात्किंचिदखंडैकरसादहं अखंडैकरसं स्थूलं
अ०७ अखंडैकरसं जनः ८ अखंडैकरसं सूक्ष्मं अखंडैकरसं हृद्यं अखंडैकरसं नास्ति अखंडैकरसं वलं ९ अखंडैकरसाद्विष्वं अखंडैकरसादणुः अखंडै
करसं नास्ति अखंडैकरसाद्भवान् १० अखंडैकरसोह्येव अखंडैकरसादितं अखंडैकरसाज्ञातं अखंडैकरसात्स्थितं ११ अखंडैकरसालीना अखंडै
करसं पिता अखंडैकरसा भक्ता अखंडैकरसः पतिः १२ अखंडैकरसा माता अखंडैकरसो विराट् अखंडैकरसं गात्रं अखंडैकरसः शिवः १३ अखंडै
१० करसं घ्राणं अखंडैकरसं वहिः अखंडैकरसं पूर्णं अखंडैकरसामृतं १४ अखंडैकरसं श्रोत्रं अखंडैकरसं गृहं अखंडैकरसं गोप्यं अखंडैकरसः शिवः
१५ अखंडैकरसो नाम अखंडैकरसो रविः अखंडैकरसः सोमा अखंडैकरसो गुरुः १६ अखंडैकरसः साक्षा अखंडैकरसः सुहृत् अखंडैकरसं मंत्रं अ
खंडैकरसो जपः १७ अखंडैकरसं ध्यानं अखंडैकरसं पदं अखंडैकरसं ग्राह्यं अखंडैकरसं महान् १८ अखंडैकरसं ज्योतिः अखंडैकरसं परं अखंडैक
रसं भोज्यं अखंडैकरसं हविः १९ अखंडैकरसो होमं अखंडैकरसो जयः अखंडैकरसं स्वर्गं अखंडैकरसः स्वयं २० अखंडैकरसाकाराद्न्यं नास्ति
नहि किंचित् ऋभुरुवाच भूपः श्रृणु महाश्चर्यं नित्यानुभवसंपदं दुर्लभं दुर्ल्लभं लोकं सर्वलोकेषु दुर्लभं अहमस्मि परं चास्मि प्रभास्मि प्रभवोस्म्यहं
सर्वरूपगुरुश्चास्मि सर्वरूपोस्मि सोस्म्यहं २२ अहमेवास्मि शुद्धोस्मि शुद्धोस्मि परमोस्म्यहं अहमस्मि सदा सोस्मि सत्योस्मि विमलोस्म्यहं २३ विज्ञानो
स्मि विशेषोस्मि साम्योस्मि सकलोस्म्यहं शुभ्रोस्मि शोकहीनोस्मि चैतन्योस्मि समोस्म्यहं २४ मानावमानहीनोस्मि निर्गुणोस्मि शिवोस्म्यहं द्वैताद्वैतविही
नोस्मि द्वंद्वहीनोस्मि सोस्म्यहं २५ भावाभावविहीनोस्मि भाषाहीनोस्मि भास्म्यहं शून्याशून्यप्रभावोस्मि शोभनोस्मि महोस्म्यहं २६ तुल्यातुल्यविहीनोस्मि
तुच्छाभावोस्मि नास्म्यहं सदा सर्वविहीनोस्मि सात्विकोस्मि सदास्म्यहं २७ एकसंख्याविहीनोस्मि द्विसंख्या नास्ति नास्म्यहं सदसद्भेदहीनोस्मि संकल्पर
हितोस्म्यहं २८ नानात्मभेदहीनोस्मि यत्किंचिन्नास्ति सोस्म्यहं नाहमस्मि न चान्योस्मि देहादिरहितोस्म्यहं २९ आश्रयाश्रयहीनोस्मि आधाररहि
तोस्म्यहं बंधमोक्षादिहीनोस्मि शुद्धब्रह्मादि सोस्म्यहं ३० चित्तादि सर्वहीनोस्मि परमोस्मि परोस्म्यहं सदा विचाररूपोस्मि निर्विचारोस्मि सोस्म्यहं ३१

अकारादिस्वरूपोस्मिउकारोस्मिमुदोस्म्यहं ध्याताध्यानविहीनोस्मि ध्येयहीनोस्मिसोस्म्यहं ३२ पूर्णात्पूर्णोस्मिपुण्योस्मिसर्वपूर्णोस्मिसोस्म्यहं स
र्वातीतस्वरूपोस्मिपरंब्रह्मास्मिसोस्म्यहं ३३ लक्ष्यलक्षणहीनोस्मिलयहीनोस्मिसोस्म्यहं मातृमानविहीनोस्मिमेयहीनोस्मिसोस्म्यहं ३४ सर्वातीत
स्वरूपोस्मिपरंब्रह्मास्मिसोस्म्यहं जगत्सर्वंचदृष्टोस्मिनेत्रादिरहितोस्म्यहं ३५ प्रवृद्धोस्मिप्रबुद्धोस्मिप्रपन्नोस्मिपरोस्म्यहं सर्वेंद्रियविहीनोस्मिस
र्वकर्मरहितोस्म्यहं ३६ सर्ववेदांततृप्तोस्मिसर्वदासुलभोस्म्यहं मुदामुदितशून्योस्मिसर्वमौनफलोस्म्यहं ३७ नित्यंचिन्मात्ररूपोस्मिसद
सच्चिन्मयोस्म्यहं यत्किंचिदपिहीनोस्मिस्वल्पमप्यापिनाहितं ३८ हृदयग्रंथिहीनोस्मिहृदयाब्धापकोस्म्यहं षड्विकारविहीनोस्मिषट्कोशरहितो
स्म्यहं ३९ अरिषड्वर्गमुक्तोस्मिअंतरादंतरोस्म्यहं देशकालविहीनोस्मिदिगंबरसुखोस्म्यहं ४० नास्तीहास्तिविमुक्तोस्मिनकाररहितोस्म्यहं
सर्वचिन्मात्ररूपोस्मिसच्चिदानंदमस्म्यहं ४१ अखंडाकाररूपोस्मिअखंडाकारमस्म्यहं प्रपंचचित्तरूपोस्मिप्रपंचरहितोस्म्यहं ४२ सर्वप्रका
ररूपोस्मिसद्भावावर्जितोस्म्यहं कालत्रयविहीनोस्मिकामादिरहितोस्म्यहं ४३ कायकार्यविमुक्तोस्मिनकाररहितोस्म्यहं मुक्तहीनोस्मिमुक्तो
स्मिमोक्षहीनोस्म्यहंसदा ४४ सत्यासत्यविहीनोस्मिसदासन्मात्रनास्म्यहं गंतव्यदेहहीनोस्मिगमनारहितोस्म्यहं ४५ सर्वदासमरूपोस्मिशांतो
स्मिसुहितोस्म्यहं एवंस्वानुभवंप्रोक्तंएतत्प्रकरणंमहत् ४६ यःश्रृणोतिसकृद्वापिब्रह्मैवभवतिस्वयं पिंडांडसंभवजगद्गतखंडनोद्यद्वेतंडशुंडा
निभवाहुदंडं ४७ ब्रह्मोरुमुंडकलितांडजवाहवाणकोदंडभूधरधरंभजतामखंडं विश्वात्मन्यद्वितीयेभगवतिगिरिजानायकेकाशरूपेनीरूपे
विश्वरूपेगतदुरितधियःप्राप्नुवंत्यात्मभावं अन्येभेदधियःश्रुतिप्रकथितैःवर्णाश्रमोत्थश्रमैःतांतांःशांतिविवर्जिताविषइणोदुःखभजंत्यन्वहं
४८ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेसप्तमोध्यायः ७ ॥ ऋभुरुवाच वक्ष्येप्रपंचशून्यत्वंशशशृंगेणसंमितं दुर्लभंसर्वलोकेषुसावधा
नमनाःश्रृणु १ इदंप्रपंचंयत्किंचिद्यःश्रृणोतिचपश्यति दृश्यरूपंचदृग्रूपंसर्वंशशविषाणवत् २ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच अहंका
रश्चतेजश्चसर्वंशशविषाणवत् ३ नाशंजन्मचसत्यंचलोकंभुवनमंडलं पुण्यपापंजयंमोहःसर्वंश० ४ कामक्रोधौरागलोभौमदमोहोरतिर्धृतिः गुरुशि

शिवरहस्य ६ ष्योपदेशादिसर्वंशशविषाणवत् ५ अहंत्वंजगदित्यादिआदिरंतिममध्यमं भूतंभव्यंवर्तमानंसर्वंश० ६ स्थूलदेहंसूक्ष्मदेहंकारणंकार्यमव्ययं दृश्यं
चदर्शनंकिंचित्सर्वंश० ७ भोक्ताभोज्यंभोगरूपंलक्ष्यलक्षणमद्वयं शमोविचारःसंतोषःसर्वंश० ८ यमंचनियमंचैवप्राणायामादिभाषणं गमनं
अ० ८ चलनंचित्तंसर्वंश० ९ श्रोत्रंनेत्रंगात्रगोत्रंगुह्यंजाड्यंहरिःशिवः आदिरंतोमुमुक्षाचसर्वंशशविषाणवत् १० ज्ञानेंद्रियंचतन्मात्रंकर्मेंद्रियगणं
चयत् जाग्रत्स्वप्नसुषुप्त्यादिसर्वं ११ चतुर्विंशतितत्वंचसाधनानांचतुष्टयं सजातीयंविजातीयंसर्वंश० १२ सर्वलोकंसर्वभूतंसर्वधर्मंसततंकं
११ सर्वाविद्यासर्वविद्यासर्वंशशविषाणवत् १३ सर्ववर्णंसर्वजातिःसर्वक्षेत्रंचतीर्थकं सर्ववेदंसर्वशास्त्रंसर्वंशश० १४ सर्वबंधंसर्वमोक्षंसर्वविज्ञा
नमीश्वरः सर्ववाकंसर्वबोधंसर्वंश० १५ सर्वास्तित्वंसर्वकर्मसर्वसंगयुतिर्महान् सर्वद्वैतस्यसद्भावंसर्वंशश० १६ सर्ववेदांतसिद्धांतसर्वशास्त्रा
र्थनिर्णयं सर्वजीवत्वसद्भावंसर्वंश० १७ यद्यत्संवेद्यतेकिंचित्यद्यज्जगतिदृश्यते यद्यच्छृणोतिगुरुणासर्वंश० १८ यद्यद्ध्यायतिचित्तेचयद्यत्सं
कल्प्यतेक्वचित् बुध्यानिश्चीयतेयद्यत्सर्वंशश० १९ यद्यद्वाचाव्याकरोतियद्वाचाचार्थभाषणं यद्यत्सर्वेंद्रियैर्भोज्यंसर्वंश० २० यद्यत्संत्यज्य
तेवस्तुयच्छृणोतिचपश्यति स्वकीयमन्यदीयंचसर्वं० २१ सस्त्वेनचयद्भाविवस्तुत्वेनरसेनच यद्यत्संकल्प्यतेचित्तेसर्वं० २२ यद्यद्दात्मेतिनि
र्णीतंयद्यन्नित्यमितंवचः यद्यद्विचार्यतेचित्तेसर्वं० २३ शिवोरक्षतिमांनित्यंविष्णुःपातिजगत्त्रयं स्रष्टासृजतिलोकान्वैसर्वंशश० २४ जीवद्
त्यपियद्यत्तिभाषयत्यपिभाषणं संसारइतियावार्त्तासर्वंशशवि० २५ यद्यदस्तिपुराणेषुयद्यद्वेदेषुनिर्णयः सर्वोपनिषदांभावंसर्वंश० २६
शशशृंगवदेवेदमुक्तंप्रकरणंतव यःशृणोतिरहस्यंवैब्रह्मैवभवतिस्वयं २७ भूयःशृणुनिदाघत्वंसर्वंब्रह्मेतिनिश्चयं सुदुर्लभमिदंनृणांदे
वानामपिसत्तम २८ इदमित्यपियद्रूपमहमित्यपियत्पुनः दृश्यतेयत्तदेवेदंसर्वंब्रह्मेतिकेवलं २९ देहोहमितिसंकल्पःतदेवभयमुच्यते
कालत्रयेपितंनास्तिसर्वंब्रह्मेतिकेवलं ३० देहोहमितिसंकल्पःतदंतःकरणस्मृतं कालत्रयेपितंनास्तिसर्वंब्रह्मेतिकेवलं ३१ देहोहमि
तिसंकल्पःसहिसंसारमुच्यते कालत्रयेपितंनास्तिसर्वंब्रह्मेतिकेवलं ३२ देहोहमितिसंकल्पःतद्बंधमितिसंकल्पःचोच्यते कालत्रयेपितं शिवम्
११

देहोहमितिसंकल्पः तद्दुखमितिनिश्चयः कालत्रयेपितेना ३४ देहोहमियतज्ज्ञानंनदेवनरकंस्मृतं कालत्रयेपितं ३५ देहोहमितियतज्ज्ञानंजग
त्सर्वमितीर्यते कालत्रये० ३६ देहोहमियत्ज्ञानंहृदयग्रंथिरीरितं कालत्रये० ३७ देहत्रयेपियंभावंतद्देहज्ञानमुच्यते कालत्र० ३८ देहोहमितिय
त्द्भावंसदसद्भावमेवच कालत्रये० ३९ देहोहमितिसंकल्पंतत्प्रपंचमिहोच्यते कालत्र० ४० देहोहमितियद्भावंतदेवाज्ञानमुच्यते कालत्रये ४१
देहोहमितियाबुधिर्मलिनावासनोच्यते कालत्रये० ४२ देहोहमितियाबुधिसत्संजीवःसएवसः कालत्रये० ४३ देहोहमितियद्भावंमहानरक
मीरितं कालत्रये० ४४ देहोहमितियाबुधिमनएवेतिनिश्चयं कालत्रये० ४५ देहोहमितियाबुधिमनएवेतिनिश्चयं कालत्रये० ४५ देहोहमिति
याबुधिःपरिछिन्नमितीर्यते कालत्रये ४६ देहोहमितियत्ज्ञानंसर्वशोकमितीरितं कालत्रये० ४७ देहोहमितियत्ज्ञानंसंस्पर्शमितिकथ्यते का
लत्रये० ४८ देहोहमितियाबुधिःतदेवमरणंस्मृतंकालत्रये० ४९ देहोहमितियत्ज्ञानंमहापापमितिस्मृतं कालत्रये ५० पियाबुधिस्तदेवाशो
भनंस्मृतं ५० देहोहमितियाबुधिस्तृष्णासैवहिचोच्यते कालत्रये० ५१ देहोहमितिसंकल्पःसर्वदोषमितिस्मृतं कालत्रये० ५२ देहोहमितियाबुधिः
स्तदेवमलमुच्यते कालत्रये० ५३ देहोहमितिसंकल्पःमहत्संशयमुच्यते कालत्र० ५४ देहोहमितियत्ज्ञानंसर्वमिथ्येतिनिश्चितं कालत्रयेपि० ५५
यत्किंचित्स्मरणंदुखंयत्किंचित्स्मरणंजगत् यत्किंचित्स्मरणंकामोयत्किंचित्स्मरणंमलं ५६ यत्किंचित्स्मरणंपापंयत्किंचित्स्मरणंमनः यत्किं
चिदपिसंकल्पंयत्किंचित्ज्ञानमुच्यते ५७ यत्किंचिदपिसंकल्पंमहारोगेतिकथ्यते यत्किंचिदपिसंकल्पंमहामोहेतिकथ्यते ५८ यत्किंचि
दपिसंकल्पंतापत्रयमुदाहृतं यत्किंचिदपिसंकल्पंकामक्रोधंचकथ्यते ५९ यत्किंचिदपिसंकल्पंसंबंधंनेतरत्क्वचित् यत्किंचिदपिसंक
ल्पंसर्वदुःखेतिनेतरत् ६० यत्किंचिदपिसंकल्पंजगत्सत्यत्वविभ्रमं यत्किंचिदपिसंकल्पंमहद्दोषंचनेतरत् ६१ यत्किंचिदपिसंकल्पंकाल
त्रयमुदीरितं यत्किंचिदपिसंकल्पंनानारूपमुदीरितं ६२ यत्रयत्रसंकल्पंतत्रतत्रमहज्जगत् यत्किंचिदपिसंकल्पंतदेवासत्यमेवहि ६३
यत्किंचिदपिसंकल्पंतत्तन्नास्तिनसंशयः यत्किंचिदपिसंकल्पंतत्सर्वंनेतिनिश्चयः ६४ मनएवजगत्सर्वंमनएवमहारिपुः मनएव

शिवरहस्यष०६ हिसंसारोमनएवजगत्त्रयं ६४ मनएवमहद्दुःखंमनएवजरादिकं मनएवहिकालंचमनएवमलंसदा ६५ मनएवहिसंकल्पंमनएवहिजी
अ०८ वकं मनएवाशुचिर्नित्यंमनएवेंद्रजालकं ६६ मनएवसदामिथ्यामनोवंध्याकुमारवत् मनएवसदानास्तिमनएवजडंसदा ६७ मनएवहि
चित्तंचमनोहंकारमेवच मनएवमहद्बंधंमनोंतःकरणंक्वचित् मनएवहिभूमिश्चमनएवहितोयकं मनएवहितेजश्चमनएवमरुन्महान् ६९
मनएवहिचाकाशंमनएवहिशब्दकं मनएवस्पर्शरूपंमनएवहिरूपकं ७० मनएवरसाकारंमनोगंधःप्रकीर्तितः अन्नकोशंमनोरूपंप्राणको
१२ शंमनोमयं ७१ मनःकोशंमनोरूपंविज्ञानंचमनोमयः मनएवानंदकोशंमनोजाग्रदिवस्थितं ७२ मनएवहिस्वप्नंचमनएवसुषुप्तिकं मनएवहि
देहादिमनएवयमादयः ७३ मनएवहियत्किंचिन्मनएवमनोमयः मनोमयमिदंविश्वंमनोमयमिदंपुरं ७४ मनोमयमिदंभूतंमनोमयमिदंद्वयं
मनोमयमिदंजातिर्मनोमयमिदंगुणं ७५ मनोमयमिदंदृश्यंमनोमयमिदंजडं मनोमयमिदंयद्यन्मनोजीवइतिस्थितं ७६ संकल्पमात्रमज्ञानं
भेदःसंकल्पमेवहि संकल्पमात्रंविज्ञानंनित्यसिद्धोस्म्यहंसदा ७७ निर्गुणोस्मिनिरीहोस्मिइत्येवंमंत्रमुत्तमं हरिर्ब्रह्मादिरुद्रोस्तिएतद्देपिना
स्म्यहं ७८ केवलंब्रह्ममात्रोस्मिकेवलोस्म्यजयोस्म्यहं स्वयमेवस्वयंभास्यंस्वयमेवहिनान्यतः ७९ स्वयमेवात्मनिस्वस्थःइत्येवंमंत्रमुत्तमं
स्वयमेवस्वयंभुक्तेस्वयमेवस्वयंरमे ८० स्वयमेवस्वयंज्योतिःइत्येतत्स्वयमेस्वयं स्वस्यात्मनिस्वयंरंस्येस्वात्मन्येवावलोकये ८१ स्वात्मन्येवसु
खंचास्तिइत्येवंमंत्रमुत्तमं स्वचैतन्येस्वयंस्थास्येस्वात्मराज्येसुखंरमे ८२ स्वात्मसिंहासनेतिष्ठेइत्येवंमंत्रमुत्तमं स्वात्ममंत्रंसदापश्येत्स्वात्म
ज्ञानंसदाभ्यसेत् ८३ अहंब्रह्मास्म्यहंमंत्रोस्वात्मपापंविनाशयेत् अहंब्रह्मास्म्यहंमंत्रोद्वैतदुःखंविनाशयेत् ८४ अहंब्रह्मास्म्यहंमंत्रोभेददुःखं
विनाशयेत् अहंब्रह्मास्म्यहंमंत्रोचिंतारोगंविनाशयेत् ८५ अहंब्रह्मास्म्यहंमंत्रोबुद्धिव्याधिंविनाशयेत् अहंब्रह्मास्म्यहंमंत्रोआधिंव्याधिंवि
नाशयेत् ८६ अहंब्रह्मास्म्यहंमंत्रोसर्वशोकंविनाशयेत् अहंब्रह्मास्म्यहंमंत्रोकामदोषंविनाशयेत् ८७ अहंब्रह्मास्म्यहंमंत्रोक्रोधदोषंवि
नाशयेत् अहंब्रह्मास्म्यहंमंत्रोचिंतादोषंविनाशयेत् ८८ अहंब्रह्मास्म्यहंमंत्रोसंकल्पंचविवर्जयेत् अहंब्रह्मास्म्यहंमंत्रोइदंदुःखंविनाशयेत् ८९ शिवः
१२

अहंब्रह्मास्म्यहंमंत्रो अविवेकमलं दहेत् अहंब्रह्मास्म्यहंमंत्रो अज्ञानध्वंसमाचरेत् ९० अहंब्रह्मास्म्यहंमंत्रो कोटिदोषविनाशयेत् अहंब्रह्मास्म्यहं
मंत्रो सर्वतंत्रविनाशयेत् ९१ अहंब्रह्मास्म्यहंमंत्रो देहदोषविनाशयेत् अहंब्रह्मास्म्यहंमंत्रो दृश्यादृश्यविनाशयेत् ९२ अहंब्रह्मास्म्यहंमंत्रो इ
दं सर्वं विवर्जयेत् अहंब्रह्मास्म्यहंमंत्रो आत्मज्ञानप्रकाशकं ९३ अहंब्रह्मास्म्यहंमंत्रो आत्मलोकजयप्रदं अहंब्रह्मास्म्यहंमंत्रो असत्तादिवि
नाशकं ९४ अहंब्रह्मास्म्यहंमंत्रो अन्यत्सर्वविनाशकं अहंब्रह्मास्म्यहंमंत्रो अप्रतर्क्यसुखप्रदं ९५ अहंब्रह्मास्म्यहंमंत्रो अनात्मज्ञानमाहरेत्॥
अहंब्रह्मास्म्यहंमंत्रो ज्ञानानंदं प्रयच्छति ९६ सप्तकोटिमहामंत्रं जन्मकोटिशतप्रदं सर्वमंत्रान्समुत्सृज्य जपमेनं समभ्यसेत् ९७ सद्यो मोक्षमवाप्नोति
नात्र संदेह अस्ति मे मंत्रप्रकरणं प्रोक्तं रहस्यं वेदकोटिषु ९८ यः शृणोति सकृद्वापि ब्रह्मैव भवति स्वयं नित्यानंदमयः स एष परमानंदोदयः शाश्वतः
यस्मात्त्वाम्यदतो मदात्तमखिलं तज्जं जगत्सर्वदा ९९ योवाचामनसेंद्रियातिगगणैर्देहोपि वेद्योनवैः अच्छेद्यो भववेद्य ईशदितियासाधीःपरंयुक्तये
१०० इति श्रीशिवरहस्ये शंकराख्ये षष्ठांशे ब्रह्मोपदेशवर्णनं नामाष्टमोध्यायः ८ ॥ ऋभुरुवाच नित्यतर्पणमाचक्षे निदाघ शृणु मे वचः वेदशास्त्रे
षु सर्वेषु अत्यंतं दुर्लभं नृणां १ सदा प्रपंचं नास्त्येव इदमित्यपि नास्ति हि ब्रह्ममात्रं सदा पूर्णं इत्येवं ब्रह्मतर्पणं २ सद्रूपमात्रं ब्रह्मैव सच्चिदानंदमप्य
हं आनंदघन एवाहं इत्येवं त्र॰ ३ सर्वदा सर्वशून्योहं सदात्मानंदवानहं नित्यानित्यस्वरूपोहं इ॰ से॰ ४ अहमेव चिदाकाशो आत्माकाशोस्ति नित्यदा आ
त्मनात्मनि तृप्तोहं इ॰ से॰ ५ एकत्वसंख्याहीनोस्मि अरूपोस्म्यहमद्वयः नित्यशुद्धस्वरूपोहं इ॰ से॰ ६ आकाशादपि सूक्ष्मोहं अत्यंताभावकोस्म्यहं सर्वप्र
काशरूपोहं इ॰ ७ परब्रह्मस्वरूपोहं परावरसुखोस्म्यहं सत्तामात्रस्वरूपोहं दृक्दृश्यादिविवर्जितः ८ यत्किंचिदप्यहं नास्ति तूष्णीं तूष्णीमिहास्म्यहं
शुद्धमोक्षस्वरूपोहं इ॰ ९ सर्वानंदस्वरूपोहं ज्ञानानंदमहं सदा विज्ञानमात्ररूपोहं इ॰ १० ब्रह्ममात्रमिदं सर्वं नास्ति नास्त्यत्र ते शपे तदेवाहं न संदेह इ॰ ११ ल
मित्येतत्तदित्येतन्नास्ति नास्तीति किंचन शुद्धचैतन्यमात्रोहमित्येवं ब्रह्मतर्पणं १२ अत्यंताभावरूपोहमहमेव परात्परः अहमेव सुखं नान्यदि॰ से॰ १३ इदं देहम
यं किंचित् नास्ति नास्त्येव ते शपे निर्गुणानंदरूपोहं इ॰ १४ साक्षिवस्तुविहीनत्वात्साक्षित्वं नास्ति मे सदा केवलं ब्रह्मभावत्वादि॰ से॰ १५ अहमेवाविशेषोहमहमे

 त्वहिनामकं अहमेवविमोहंवेइ० १६ इंद्रियाभावरूपोहंसर्वभावस्वरूपकं बंधमुक्तविहीनोस्मिइ० १७ सर्वानंदस्वरूपोहंसर्वानंदघनोस्म्यहं नित्यचे
 तन्यमात्रोहमित्ये०१८ वाचामगोचरश्चाहंवाङ्मनोनास्तिकिंचन चिदानंदमयश्चाहंइ० १९ सर्वत्रपूर्णरूपोहं सर्वत्रसुखमस्म्यहं सर्वत्राचिंत्यरूपो हमित्ये
वंब्रह्मतर्पणं २० सर्वत्रतृप्तिरूपोहंसर्वानंदमयोस्म्यहं सर्वशून्यस्वरूपोस्मिइत्येवंब्रह्मतर्पणं २१ सर्वदामत्स्वरूपोहंपरमानंदवानहं एकएवाहमे
 वाहमित्येवं०२२ मुक्तोहंमोक्षरूपोहंसर्वमौनपरोस्म्यहं सर्वनिर्वाणरूपोहमित्ये० २३ सर्वदामत्स्वरूपोहंसर्वदातुर्यवानहं तुर्यातीतस्वरूपोहमित्येवं०२४
सत्यविज्ञानमात्रोहंसन्मात्रानंदवानहं निर्विकल्पस्वरूपोहंइ० २५ सर्वदाह्यजरूपोहंनिरीहोहंनिरंजनः ब्रह्मविज्ञानरूपोहंइ०२६ ब्रह्मतर्पणमेवोक्तमेत
तस्मकरणेमया यच्छृणोतिसकृद्वापिब्रह्मैवभवतिस्वयं २७ नित्यंहोमंप्रवक्ष्यामिसर्ववेदेषुदुर्लभं सर्वशास्त्रार्थमध्येतंसावधानंमनाःशृणु २८ अहंब्रह्मा
स्मिशुद्धोस्मिनित्योस्मिप्रभुरस्म्यहं ओंकारार्थस्वरूपोस्मिएवंहोमंसुदुर्लभं २९ परमात्मस्वरूपोस्मिपरानंदपरोस्म्यहं चिदानंदस्वरूपोस्मिएवंहोमं
सुदुर्लभं ३० नित्यानंदस्वरूपोस्मिनिष्कलंकमयोह्यहं चिदाकारस्वरूपोस्मिएवं ३१ नहिकिंचित्स्वरूपोस्मिनाहमस्मिनसोस्म्यहं निर्व्यापारस्वरू
पोस्मिएवं· ३२ निरंशोस्मिनिराभासोनमनोनेंद्रियोस्म्यहं नबुद्धिर्नविकल्पोहंएवं· ३३ नदेहादिस्वरूपोस्मित्रयादिपरिवर्जितः नजाग्रस्वप्नरूपोहंए०३४
श्रवणंमननंनास्तिनिदिध्यासनमेनहि स्वगतंचनमेकिंचिदे० ३५ असत्संहिमनोसत्ताअसत्यंबुद्धिरूपकं अहंकारमसद्विद्धिकालत्रयमसत्सदा ३६
गुणत्रयमसद्विद्धिए० श्रुतंसर्वमसद्विद्धिवेदंसर्वमसत्सदा शास्त्रंसर्वमसद्विद्धिएवं० ३७ मूर्तित्रयमसद्विद्धिलोकत्रयमसत्सदा सर्वलोकमसद्विद्धिइत्ये·३८
यत्तदृश्यमसद्विद्धिसर्वभूतमसत्सदा सर्वतत्वमसद्विद्धिएवं० ३९ नानारूपमसद्विद्धिनानावर्णमसत्सदा नानाजातिमसद्विद्धिएवं०४० शास्त्रज्ञानमसद्वि
द्धिवेदज्ञानंतपोप्यसत् सर्वतत्वमसद्विद्धिएवं ४१ गुरुशिष्यमसद्विद्धिगुरुर्मंत्रमसत्ततः यदृश्यंतदसद्विद्धिए०४२ सर्वान्भोगानसद्विद्धियच्चिंत्यंसदसत्सदा
यदृश्यंतदसद्विद्धिए० सर्वेंद्रियमसद्विद्धिसर्वमंत्रमसत्विति सर्वप्राणानसद्विद्धिए० ४४ जीवंदेहमसद्विद्धिपरेब्रह्मणिनैवहि मयिसर्वमसद्विद्धिए०४५
दृष्टंश्रुतमसद्विद्धिओतप्रोतमसन्मयि कार्याकार्यमसद्विद्धिएवं०४६ दृष्टंप्राप्तंमसद्विद्धिसंतोषमसदेवहि सर्वकर्माण्यसद्विद्धिएवंहोमंसुदुर्लभं शिवम्

सर्वासर्वमसद्विद्धिपूर्णापूर्णमसत्परे सुखदुःखमसद्विद्धिएवं० ४८ यथाधर्ममसद्विद्धिपुण्यापुण्यमसत्सदा लाभालाभमसद्विद्धिदानंदे
हमसत्सदा सदाजयमसद्विद्धिसदागर्वमसत्सदा मनोमयमसद्विद्धिसंशयंनिश्चयंतथा ५० शब्दंसर्वमसद्विद्धिस्पर्शंसर्वमसत्सदा रूपंसर्वम
सद्विद्धिरसंसर्वमसत्सदा ५१ गंधंसर्वमसद्विद्धिसर्वंज्ञानमसत्सदा सर्वज्ञानमसद्विद्धिअसत्प्रकृतिरुच्यते भूतंभव्यमसद्विद्धिअसत्प्रकृतिरुच्यते
असदेवसदासर्वंअसदेवभवोद्भवं ५२ असदेवमसद्विद्धिगुणंसर्वमसत्सदा शशशृंगवदेवेदंशशशृंगवदंतरं ५३ शशशृंगवदेवत्वंशशशृंगवदस्म
हं इत्येवमात्ममहोमाख्यंप्रोक्तंप्रकरणंमया यःशृणोतिसकृद्वापिब्रह्मैवभवतिस्वयं ५४ स्कंदउवाच यस्मिन्संचविचेतिविश्वमखिलंद्योततिसूर्यंदेवा
विद्युद्वान्हिमरुद्गणाःसवरुणाःभीताःभजंतीश्वरं भूतंचापिभवत्यदृश्यमखिलंशंभोःसुखांशंजगत् जातंचापिजनिष्यतिप्रतिभवंदेवासुरैरीरितं
नेहास्तिनकिंचिदत्रभगवद्ध्यानान्नकिंचित्प्रियं ५५ यःप्राणापानभेदैःमनमननधियाधारणापंचकाद्यैः मध्येविश्वजनस्यसन्नपिशिवोनोदृश्यते
सूक्ष्मयाबुध्याहृद्व्यातयापिश्रुतिवचनशतैःदर्शिकोक्तैकसूत्त्यायोगेभक्तिसमन्वितैःशिवतरोदृश्योनचान्यत्तया ५६ इतिश्रीशिवरहस्येशंक
राख्येऋभुनिदाघसंवादोनामनवमोध्यायः ९॥ ऋभुरुवाच ब्रह्मज्ञानंप्रवक्ष्यामिजीवन्मुक्तस्यलक्षणं आत्ममात्रेणयस्तिष्ठेत्सजीवन्मुक्त
उच्यते १ अहंब्रह्मवदेवेदं अहमात्मानसंशयः चैतन्यात्मेतियस्तिष्ठेज्जीवन्मुक्तःसउच्यते २ चिदात्माहंपरात्माहंनिर्गुणोहंपरात्परं इत्येवंनिश्च
योयस्सजीवन्मुक्तःस० ३ देहत्रयातिरिक्तोहंब्रह्मचैतन्यमस्म्यहं ब्रह्माहमितियस्यांतःसजी० ४ आनंदघनरूपोस्मिपरानंदपरोस्म्यहं यश्चिदेवंपरा
नंदंस० ५ यस्यदेहादिकंनास्तियस्यब्रह्मेतिनिश्चयः परानंदपूर्णोयःसजी० ६ यस्यकिंचिदहंनास्तिचिन्मात्रेणावतिष्ठते परानंदोमुदानंदःसजी० ७
चैतन्यमात्रयस्यांतंचिन्मात्रैकस्वरूपवान् नस्मरत्यन्यकलनंस० ८ सर्वत्रपरिपूर्णात्मासर्वत्रकलनात्मकः सर्वत्रनित्यपूर्णात्मास० ९ परमात्मप
रोनित्यंपराप्रज्ञेतिनिश्चितःआनंदाकृतिरव्यक्तोस० १० शुद्धकेवल्यजीवात्मासर्वसंगविवर्जितःनित्यानंदप्रसन्नात्मास० ११ एकरूपःप्रशांतात्मा
अन्यचिंताविवर्जितः किंचिदस्तित्वहीनोयजीव० १२ नमेचित्तंनमेबुध्दिःनाहंकारोनचेंद्रियं केवलंब्रह्ममात्रात्माजी० १३ नमेदोषःनमेदेहःनमेप्राणः

शिवरहस्यष०६ नमेक्वचित्तदृढनिश्चयवान्यांतजीव० १४ नमेमायानमेकामोनमेक्रोधोपरोस्म्यहं नमेकिंचिदिदंवापिजीव० १५ नमेदोषोनमेलिंगंनमेवस्थःक्वचिज्जगत्
यत्तुनिसंसदानंदःजी० १६ नमेश्रोत्रंनमेनासानमेचक्षुःनमेमनः नमेजिह्वेतियस्तांतःजीव० १७ नमेदेहोनमेलिंगंनमेकारणमेवच नमेतुर्यमितिस्व
अ०१० स्थःसजी० १८ इदंसर्वंनमेकिंचिदयंसर्वंनमेक्वचित् ब्रह्ममात्रेणयस्तिष्ठेज्जीव० १९ नमेकिंचिन्नमेकश्चिन्नमेकश्चित्क्वचिज्जगत् अहमेवेतियस्ति
ष्ठेत्सजीव० २० नमेकालोनमेदेशोनमेवस्तुनमेस्तुतिः नमेस्नानंनमेप्राज्ञोजी० २१ नमेतीर्थंनमेसेवानमेदेवानमेस्थलं नक्वचिद्भेदहीनोयंजीव० २२
१४ नमेबंधंनमेजन्मनमेज्ञानंनमेपदं नमेवाक्यमितिस्वस्थोजी० २३ नमेपुण्यंनमेपापंनमेकायंनमेशुभं नमेदृश्यमितिज्ञानीजी० २४ नमेशब्दंनमेस्पर्शोनमे
रूपंनमेरसः नमेजीवइतिस्वात्माजी० २५ नमेसर्वंनमेकिंचिन्नमेजीवन्नमेक्वचित् नमेभावंनमेवस्तुजी० २६ नमेमोक्षोनमेद्वैतंनमेवेदोनमेविधिःनमे
दूरमितिस्वस्थोजी० २७ नमेगुरुर्नमेशिष्योनमेबोधोनमेपरः नमेश्रेष्ठंक्वचिद्वस्तुजी० २८ नमेब्रह्मानमेविष्णुःनमेरुद्रोनमेरविः नमेकर्मक्वचिद्वस्तुजी० २९
नमेपृथ्वीनमेतोयंनमेतेजोनमेवियत् इदंहसंकल्पमेवंहिजी० ३० संकल्पमात्रंकालंचदेशंसंकल्पमेवहि संकल्पमात्रंदेहंचप्राणंसंकल्पमात्रकं॥
संकल्पमात्रमननंसंकल्पंश्रवणंसदा संकल्पमात्रंनरकंसंकल्पस्वर्गमित्यपि ३२ संकल्पमेवचिन्मात्रंसंकल्पंचात्मचिंतनं संकल्पनामनोकिंचित्
ब्रह्मसंकल्पमेवहि ३३ संकल्पमेवयत्किंचित्तन्नास्त्येवकदाचन नास्तिनास्त्येवसंकल्पंनास्तिनास्तिजगत्त्रयं ३४ नास्तिनास्तिगुरुर्नास्तिनास्तिशि
ष्योपिवस्तुन नास्तिनास्तिशरीरंचनास्तिनास्तिमनःक्वचित् ३५ नास्तिनास्त्येववाकिंचिद्वानास्तिनास्त्यखिलंजगत् नास्तिनास्त्येवभूतंवासर्वंनास्तिनसं
शयः ३६ सर्वंनास्तिप्रकरणंमयोक्तंचनिदाघते यःशृणोतिसकृद्वापिब्रह्मैवभवतिस्वयं ३७ सूतउवाच वेदांतैरपिचंद्रशेखरपदांभोजानुरागादरोदारो
दारकुमारदारनिकरैःप्राणैर्धनैरुज्झितः त्यागाद्योमनसासकृच्छिवपदध्यानानुयत्प्राप्यतेतन्नैवाप्यतिशब्दतर्कनिवहैःशांतंमनस्तद्भवेत् ३८ अ
शेषदृश्योज्झितदृक्मयानांसंकल्पवर्जेनसदास्थितानां नजाग्रतःस्वप्नसुषुप्तिभावःनजीवनंनोमरणंचचित्रं ३९ इतिश्रीशिवरहस्येशंकराख्ये
षष्ठांशेदशमोध्यायः १० निदाघउवाच कुत्रवाभवतास्थानंकरोतिनिरंतरंगुरोः स्नानंमंत्रंस्नानकालंतर्पणंचवदस्वमे १ ऋभुरुवाच आत्मस्ना

शिवम्

नंमहास्नानंनित्यस्नानंनचान्यतः इदमेवमहास्नानमहंब्रह्मास्मिनिश्चयः २ परंब्रह्मस्वरूपोहंपरमानंदमस्म्यहं इदमेवमहास्नानंअहंब्रह्मेतिनिश्चयं ३
केवलंज्ञानरूपोहंकेवलंपरमोस्म्यहं केवलंशांतरूपोहंकेवलंनिर्मलोस्म्यहं ४ केवलंनित्यरूपोहंकेवलंशाश्वतोस्म्यहं इदमेवपरंब्रह्म० ५ केवलंसर्व
रूपोहंअहंत्यक्त्वाहमस्म्यहं इदमेवपरंब्रह्म० ६ सर्वहीनस्वरूपोहंचिदाकाशमयोस्म्यहं इदमेवपरंब्रह्म० ७ केवलंतुर्यरूपोस्मितुर्यातीतोस्मिकेवलं
इदमेव० ८ केवलाकाररूपोस्मिशुद्धरूपोस्म्यहंसदा इदमेव० ९ केवलंज्ञानशुद्धोस्मिकेवलोस्मिप्रियोस्म्यहं इदमेवपरंब्रह्मअहंब्रह्मास्मिकेवलं १०
निर्विकल्पस्वरूपोस्मिनिरीहोस्म्यहमेवहि इदमेव०अहं० ११ सदासंगस्वरूपोस्मिसर्वदापरमोस्म्यहं इदमेव०अहं० १२ सदाह्येकस्वरूपोस्मिसदानन्यो
स्म्यहंसुखं इदमेव० १३ अपरिच्छिन्नरूपोहंअनंतानंदमस्म्यहं इदमे० १४ सत्यानंदरूपोहंचित्परानंदमस्म्यहं इदमेव० १५ अंतरानंदरूपोहंअवाङ्मन
सगोचरं इदमेव० १६ ब्रह्मानंदस्वरूपोहंसत्यानंदोस्म्यहंसदा इदमेव० १७ आत्मामात्रस्वरूपोस्मिआत्मानंदमयोस्म्यहं इदमे० १८ आत्मप्रकाशरूपोस्मिआ
त्मज्योतिरसोस्म्यहं इदमे० १९ आदिमध्यांतहीनोस्मिआकाशसदृशोस्म्यहं इदमे० २० नित्यपूर्णस्वरूपोस्मिनित्यनिर्मलसोस्म्यहं इदमे० २१ नित्यसत्तास्वरू
पोस्मिनित्यमुक्तोस्म्यहंसदा इदमे० २२ नित्यसत्यस्वरूपोस्मिसर्वातीतोस्म्यहंसदा इदमे० २३ रूपातीतस्वरूपोस्मिव्योमरूपोस्म्यहंसदा इदमे० २४ भूमानंद
स्वरूपोस्मिभाषानंदोस्म्यहंसदा इदमे० २५ सर्वाधिष्ठानरूपोस्मिसर्वदाचिद्घनोस्म्यहं इदमे० २६ देवभावविहीनोहंचित्तहीनोहमेवहि इदमे० २७ देहवृत्तिवि
हीनोहंअत्रेचाहमहंसदा इदमे० २८ सर्वदृश्यविहीनोस्मिदृश्यरूपोहमेवहि इदमे० २९ सर्वदापूर्णरूपोस्मिनित्यतृप्तोस्म्यहंसदा इदमे० ३० इदंब्रह्मैवसर्वस्यादहंचै
तन्यमेवहि इदमे० ३१ अहमेवाहमेवास्मिनान्यत्किंचिन्नविद्यते इद० ३२ अहमेवमहानात्माअहमेवपरात्परः इदमे० ३३ अहमेवमहान्नान्यदित्येवमंत्रमुत्तमं
इदमे० ३४ अहमेवान्यवद्भामिअहमेवशरीरवत् इदमे० ३५ अहंचशिष्यवद्भामिअहंलोकत्रयादिवत् इदमे० ३६ अहंकालत्रयातीतअहंवेदैरुपासितः इ
दमे० ३७ अहंशास्त्रेषुनिर्णीतःअहंचित्तेव्यवस्थितः इदमे० ३८ मत्यक्तंनास्तिकिंचिद्वामत्यक्तंपृथ्वीचवा इदमे० ३९ मयातिरिक्ततोयंवाइत्येवमंत्रमुत्तमं इदमे० ४०
नमेकार्यमितिस्वस्थोजीवन्मुक्तोनसंशयः नमेवार्त्तानमेवाक्यंनमेगोत्रंनमेकुलं नमेविद्येतियःस्वस्थोजीवन्मुक्तोनसंशयः ४१ नमेनादोनमेशब्दोनमेलक्ष्यंनमेभवः

 नमेध्यानमितिस्वस्थोजीवन्मुक्तोनसंशयः ४२ नमेशीतंनमेचोष्णंनमेमोहोनमेजयः नमेसंध्येतियत्तिष्ठेज्जीवन्मुक्तोनसंशयः ४३ नमेजपोनमेमंत्रो
नमेमोहोनमेनिशा नमेसर्वमितिस्वस्थोजीव० ४४ नमेभयंनमेचान्नंनमेतृष्णानमेक्षुधा नमेचात्मेतियःस्वस्थःजीव० ४५ नमेपूर्वंनमेपश्चान्न
 मेचोर्ध्वंनमेदिशः नमेचित्तमितिस्वस्थःजीव० ४६ नमेवक्तव्यमल्पंवानमेश्रोतव्यमण्वपि नमेगंतव्यमीषद्वाजीव० ४७ नमेभोक्तव्यमीषद्वानमे
ध्यातव्यमणुवपि नमेसर्त्तव्यमेवायंजीव० ४८ नमेभोगोनमेरागोनमेयोगोनमेलयः नमेसर्वमितिस्वस्थःजीव० ४९ नमेमौर्ख्यंनमेशांतंनमेबं
 धंनमेप्रियं नमेमोदःप्रमोदोवाजीव० ५० नमेदीर्घंनमेह्रस्वंनमेस्थूलंनमेकृशं नमेसर्वमितिस्वस्थोजीव० ५१ नमेस्तित्वंनमेजातंनमेवृत्तंनमे
क्षयः अध्यारोपोनमेस्वस्थंजीव० ५२ आध्यमाद्यंनमेकिंचिदपवादोनमेक्वचित् नमेकिंचिदहंयस्तुजीव० ५३ नमेशुद्धिर्नमेशुभ्रोनमेचैकंन
मेवहु नमेभूतंनमेकार्यंजीव० ५४ नमेकोहंनमेचेदंनमेनान्यंनमेस्वयं नमेकश्चिन्नमेस्वस्थोजीव० ५५ नमेमांसंनमेरक्तंनमेमेदोनमेह्यसृक्
नमेकृपानमेस्तीतिजीव० ५६ नमेसर्वंनमेशुक्लंनमेनीलंनमेपृथक् नमेस्वस्थःस्वयंयोवाजीव० ५७ नमेतापंनमेलोभोनमेगौणंनमेयशः
नमेनत्वमितिस्वस्थोजीवन्मु० ५८ नमेभ्रांतिर्नमेज्ञानंनमेगुह्यंनमेकुलं नमेकिंचिदिति ध्यायंजीवन्मु० ५९ नमेत्याज्यंनमेग्राह्यंन
मेहास्यंनमेलयः नमेदैवमितिस्वस्थोजीवन्मुक्तो० ६० नमेव्रतंनमेग्लानिःनमेशोच्यंनमेसुखं नमेन्यूनंक्वचिद्वस्तुजीवन्मुक्तो० ६१
नमेज्ञातानमेज्ञानंनमेज्ञेयंनमेस्वयं नमेसर्वमितिज्ञानीजीवन्मुक्तोनसंशयः ६२ नमेतुभ्यंनमेमह्यंनमेत्वंतंनमेत्वहं नमेगुरु
र्नमेयस्तुजीवन्मुक्तोनसंशयः ६३ नमेजडंनमेचैत्यंनमेग्लानंनमेशुभं नमेनमेतियस्तिष्ठेत् जीवन्मुक्तोनसंशयः ६४
नमेगोत्रंनमेसूत्रंनमेपात्रंनमेकृपा नमेकिंचिदिति ध्यायीजीवन्मुक्तोनसंशयः ६५ नमेचात्मानमेनात्मानमेस्वर्गं
नमेफलं नमेदूष्यंक्वचिद्वस्तुजीवन्मुक्तोनसंशयः ६६ नमेभ्यासोनमेविद्यानमेशांतिर्नमेदमः नमेपुरमितिज्ञानीजीवन्मु
क्तोनसंशयः ६७ नमेशल्यंनमेशंकानमेसुप्तिर्नमेमनः नमेविकल्पनिस्वापःजीव० ६८ नमेजरानमेचाल्यंनमेयौवनमण्व शिवम्

पि नमेमृतिर्नमेध्यांतंजीवन्मुक्तोनसंशयः ६९ नमेलोकं नमेभोगंनमेसर्वमितिस्मृतः नमेमौनमितिप्राप्तंजीव० ७० अहंब्रह्माहमेवाहं ब्रह्माहं
हंब्रह्मेतिनिश्चयः चिदहंचिदहंचेतिजी० ७१ ब्रह्मैवाहंचिदेवाहंपरेवाहंनसंशयः स्वयमेवस्वयंज्योतिःजी० ७२ स्वयमेवस्वयंपश्येत्स्वयमेवस्वयं
स्थितिः स्वात्मन्येवस्वयंभूतःजी० ७३ स्वात्मानंदस्वयंभुंक्ष्वेस्वात्मारामःस्वयंवशे स्वयमेवस्वयंपश्येत्जी० ७४ स्वयमेवाहमेकोग्रेस्वयमेवस्वयंप्रभुः
स्वस्वरूपंस्वयंस्वस्पजी० ७५ जीवन्मुक्तिप्रकरणंसर्ववेदेषुदुर्लभं यःशृणोतिसकृद्वापिब्रह्मैवभवतिस्वयं ७६ येवेदवादविधिकल्पितभेदवु
च्यापुण्यपाभिसंधितधियापरिकर्शयंतः देहंस्वकीयमतिदुःखपरंपराभिःतेषांसुखायनतुजातुतवेशपादात् ७७ कःसंतरेत्भवसागरमेतदुद्यत्
रोगसद्दंशजनिमृत्युरूपं ईशार्चनाविधिसुबोधितभेदहीनज्ञानोडुपेनप्रतरेद्भवभावयुक्तः ७८ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेनएकादशोध्यायः ११
ऋभुरुवाच देहमुक्तिप्रकरणंनिदाघशृणुदुर्लभं त्यक्तात्यक्तंनस्मरतिसदेहान्मुक्तएवसः १ ब्रह्मरूपःप्रशांतात्मानान्यरूपःसदासुखी स्वस्थ
रूपोमहामौनीविदेहान्मुक्तएवसः २ सर्वात्मासर्वभूतात्माशांतात्मामुक्तिवर्जितः एकात्मवर्जितःसाक्षीविदेहान्मुक्तएवसः लक्ष्यात्मालालिता
त्माहंलीलात्मास्वात्ममात्रकः तूष्णीमात्मास्वभावात्माविदेहोमुक्तएवसः ४ शुभ्रात्मास्वयमात्माहंसर्वात्मास्वात्ममात्रकः अजात्माचामृतात्मा
हिविदेहोमुक्तएवसः ५ आनंदात्माप्रियोह्यात्मामोक्षात्माकोपिनिर्णयः इत्येवमितिनध्यायीविदेहो० ६ ब्रह्मैवाहंचिदेवाहंएकंवापिनचिंत्यते
चिन्मात्रेणैवयस्तिष्ठेत्विदे० ७ निश्चयंचपरित्यज्यअहंब्रह्मेतिनिश्चयः आनंदभूरिदेहंस्तुविदे० ८ सर्वमस्तीतिनास्तीतिनिश्चयंसज्यतिष्ठति॥
अहंब्रह्मास्मिनास्मीतिविदेहो० ९ किंचित्क्वचित्कदाचिच्चआत्मानंनस्मरत्यहो स्वस्वभावेनयस्तिष्ठेद्विदेहोमु० १० अहमात्मापरोह्यात्माविदा
त्माहंनचिंत्यति स्थास्यामीत्यपियोमुक्तोविदे० ११ तूष्णीमेवस्थितस्तूष्णींसर्वंतूष्णींनकिंचन अहमर्थपरित्यक्तविदे० १२ परमात्मागुणातीतःसर्वा
त्मापिनसंमतः सर्वभावान्महात्मायोविदेहो० १३ कालभेदंदेशभेदंवस्तुभेदंस्वभेदकं किंचिद्भेदंनयस्यास्तिविदे० १४ अहंत्वंतदिदंसोयंकिंचिद्वापिन
विद्यते असंतंसुखमात्रात्माविदे० १५ निर्गुणात्मानिरात्माहिनित्यात्मानित्यनिर्णयः शून्यात्मासूक्ष्मरूपोयोविदे० १६ विश्वात्माविश्वहीनात्माकाल

 त्माकालहेतुकः देवात्मादेवहीनोयोविदेहो० १७ मात्रात्माभेयहीनात्मामूढात्मानात्मवर्जितः केवलात्मापरात्मायोविदे० १८ सर्वत्रजडहीनात्मासर्वे
षामंतरात्मगः सर्वेषामितियस्सक्तोविदे० १९ सर्वसंकल्पहीनेतिसच्चिदानंदमात्रकः स्थास्नामीतिनयस्सांतेविदे० २० सर्वनास्तितदस्तीतिचिन्मा
 त्रोस्तीतिसर्वदा प्रवृत्थोनास्तियस्यांतेविदेहे० २१ केवलंपरमात्मायःकेवलज्ञानविग्रहः सत्तामात्रस्वरूपोयोविदे० २२ जीवेश्वरेतिचैत्येतिवेदशास्त्रे
त्वहंत्विति ब्रह्मैवेतिनयस्यांतोविदे० २३ ब्रह्मैवसर्वमेवाहंनान्यत्किंचिज्जगद्भवेत् इत्येवनिश्चयाभावोविदे० २४ इदंचैतन्यमेवेतिअहंचैतन्यमित्यपि
 इतिनिश्चयशून्योयोविदे० २५ चैतन्यमात्रःसंसिद्धःस्वात्मारामःसुखासनः सुखमात्रांतरंगोयोविदे० २६ अपरिच्छिन्नरूपात्माअणोरणुविनिर्मलः तुर्याती
तःपरानंदोविदेहो० २७ नामापिनास्तिसर्वात्मानरूपोनचनात्मकः परंब्रह्मस्वरूपात्माविदेहो० २८ तुर्यातीतःस्वतोतीतःअतोतीतःसमन्मयः अशुभा
शुभशांतात्माविदे० २९ बंधमुक्तिप्रशांतात्मासर्वात्माचांतरात्मकः प्रपंचात्मापरोह्यात्माविदे० ३० सर्वत्रपरिपूर्णात्मासर्वदाचपरात्परः अंतरात्माह्यनंता
त्माविदे० ३१ अबोधबोधहीनात्माअजडाजडवर्जितः अतत्वतत्वसर्वात्माविदे० ३२ असमाधिसमाध्यंतअलक्ष्यालक्ष्यवर्जितः अभूतोभूतएवात्मादे० ३३
चिन्मयात्माचिदाकाशःचिदानंदश्चिदंबरः चिन्मात्ररूपएवात्माविदे० ३४ सच्चिदानंदरूपात्मासच्चिदानंदविग्रहः सच्चिदानंदपूर्णात्माविदे० ३५ सदा
ब्रह्ममयोनित्यंसदास्वात्मनिनिष्ठितः सदाखंडैकरूपात्माविदे० ३६ प्रज्ञानघनएवात्माप्रज्ञानघनविग्रहः नित्यज्ञानपरानंदोविदेहोमुक्तएवसः ३७
यस्यदेहःक्वचिन्नास्तियस्यकिंचित्स्मृतिर्नचः सदात्माह्यात्मनिस्वस्थोविदेहोमुक्तएवसः ३८ यस्यनिर्वासनंचित्तंयोवाब्रह्मात्मनास्थितः योगात्मा
योगयुक्तात्माविदे० ३९ चैतन्यमात्रएवेतित्यक्तसर्वमतिर्नहि गुणागुणविकारांतोविदे० ४० कालदेशादिनास्त्यंतोनग्राह्यानस्मृतिःपरः निश्चयंचपरं
त्यक्तोविदे० ४१ भूमानंदःपरानंदोभोगानंदविवर्जितः साक्षीचसाक्षिहीनश्चविदे० ४२ सोपिकोपिनसोकोपिकिंचीत्किंचनकिंचन आत्मानात्मश्चि
दात्माचचिदचिदहमेवच ४३ यस्यप्रपंचभानात्माब्रह्माकारसपीहन स्वस्वरूपःस्वयंज्योतिःविदे० ४४ वाचामगोचरानंदःसर्वेंद्रियविवर्जितः अतो
तातीतभानोयोविदे० ४५ चित्तवृत्तेरतीतोयाचित्तवृत्त्यवभासकः सर्ववृत्तिविहीनोयोविदेहो० ४६ कस्मिन्कालेविदेहेयोदेहस्मरणवर्जितः नस्थूलो शिवम्

नक्लेशोवापिविदे॰ ४७ ईषन्मात्रस्थितोयोवैसदासर्वविवर्जितः ब्रह्ममात्रेणयस्तिष्ठेन्नविदे॰ ४८ परंब्रह्मपरानंदोपरमात्मापरात्परः परेरहष्ठोवाह्यांतो
विदे॰ ४९ श्रुसर्ववेदांतसारोयंश्रुत्यर्थसत्वात्मनिस्थितः तद्दृदमपियस्त्यक्तोविदे॰ ५० ब्रह्मामृतरसास्वादोब्रह्मामृतरसायनं ब्रह्मामृतरसेमग्नोविदे॰ ५१
ब्रह्मामृतरसाधारोब्रह्मामृतरसःस्वयं ब्रह्मामृतरसेतृप्तोविदे॰ ५२ ब्रह्मानंदपरानंदोब्रह्मामृतरसःप्रभुः ब्रह्मानंदपरंज्योतिविदे॰ ५३ ब्रह्मामृतरसानंदो
ब्रह्मामृतनिरंतरं प्रियानंदसदानंदोविदे॰ ५४ ब्रह्मानंदानुभावोयोब्रह्मामृतशिवार्चनं ब्रह्मानंदरसप्रीतोविदे॰ ५५ ब्रह्मामृतरसोहाहोब्रह्मामृतकुटुंबकः
ब्रह्मानंदजनैर्युक्तःविदेहो॰ ५६ ब्रह्मामृतवरेवासोब्रह्मानंदालयेस्थितः ब्रह्मामृतजपोयस्यविदे॰ ५७ ब्रह्मानंदशरीरांत्तोब्रह्मानंदेंद्रियः क्वचित् ब्रह्मा
मृतमयाविद्याविदे॰ ५८ ब्रह्मानंदंमदोन्मत्तोब्रह्मामृतरसंभरः ब्रह्मात्मनिसदास्वस्थोविदे॰ ५९ देहमुक्तिप्रकरणंसर्ववेदेषुदुर्लभं मयोक्तंतेमहा
योगिन्विदेहःश्रवणाद्भवेत् ६० स्कंदउवाच अनाथनाथतेपदंभजाम्युमासनाथसन्निशीथनाथमौलिसुस्फुरल्ललाटसंगजस्फुलिंगदग्धमन्म
थप्रमथनाथपाहिमां विभूतिभूषगात्रतेत्रिनेत्रमित्रतामियान्मनः सरोरुहंक्षणं तथेक्षणेनमेसदाप्रवत्स्यसंसृतिभ्रमभ्रमज्जनौघसंततौनवेदवेदमौ
लिरप्यपास्तदुःखसंततिं ६१ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेद्वादशोध्यायः १२॥ ऋभुरुवाच शृणुषड्दुर्लभंलोकेसारात्सारतरंपरं आत्मरू
मिदंसर्वमात्मनोन्यन्नकिंचन १ सर्वमात्माब्रह्ममस्मिपरमात्मापरात्मकः नित्यानंदस्वरूपात्माह्यात्मनोन्यन्नकिंचन २ पूर्णरूपामहानात्माप्रीतात्मा
शाश्वतात्मकः निर्विकारस्वरूपात्मानिर्मलात्मानिरात्मकः ३ शांताशांतस्वरूपात्माह्यात्मनोन्यन्नकिंचन जीवात्मापरमात्माहिचित्तचित्तात्मचिन्म
यः ४ एकात्माएकरूपात्मानेकात्मात्मविवर्जितः मुक्तामुक्तस्वरूपात्मामुक्तामुक्तेतिवर्जितः ५ मोक्षरूपस्वरूपात्माह्यात्मनोन्यन्नकिंचन द्वैताद्वै
तस्वरूपात्माद्वैताद्वैतविवर्जितः ६ सर्ववर्जितसर्वात्माह्यात्मनोन्यन्नकिंचन मुदामुदस्वरूपात्मामोक्षात्मादेवतात्मकः ७ संकल्पहीनसारात्माह्यात्म
नोन्यन्नकिंचन संत्यक्तसर्वजीवात्मासंत्यक्तपरमात्मकः ८ संत्यक्तभोगभोग्यात्माह्यात्मनोन्यन्नकिंचन निष्कलात्मानिर्मलात्माबुध्यात्मापुरुषात्मकः
९ आनंदात्माह्यजात्माचआत्मनोन्यन्नकिंचन अगण्यात्मागणात्माचअमृतात्मामृतांतरः १० भूतभव्यभविष्यात्माआत्मनोन्यन्नकिंचन अखिला

 त्मानुमान्यात्मामनात्मामानभावनः तुर्यरूपप्रसंनात्माह्यात्मनोन्यन० ११ नित्यप्रत्यक्षस्वरूपात्मानित्यप्रत्यक्षनिर्णयः अन्यहीनस्वभावात्माआत्मनोन्य० १२
 असत्यहीनस्वभावात्माअन्यहीनस्वयंप्रभुः विद्याविद्यान्यशुस्यात्मामानामानविहीनकः १३ नित्यानित्यविहीनात्माइहामूत्रफलांतरः शमादिषट्कशून्या
त्माह्यात्मनो० १४ मुमुक्षुत्वंचहीनात्माशमात्मादमनात्मकः नित्योपरतरूपात्माह्यात्म० १५ सर्वकालंतितिक्षात्मासमाधानात्मनिस्थितः शुद्धात्मास्वा
 त्मनिस्वात्माह्यात्म० १६ अंन्नकोशविहीनात्माप्राणकोशविवर्जितः मनःकोशविहीनात्माह्यात्म० १७ विज्ञानकोशहीनात्मासूक्ष्मदेहविवर्जितः कार
णादिविहीनात्माह्यात्म० १८ दृश्यानुविद्धशून्यात्माह्यादिमध्यांतवर्जितः शांतासमाधिशून्यात्माह्यात्म० १९ प्रज्ञानवाक्यहीनात्माअहंब्रह्मास्मिवर्जितः
तत्त्वमस्यादिवाक्यात्माह्यात्मनोन्यनकिंचन २० अयमात्मेत्यभावात्मासर्वात्मावाक्यवर्जितः ॐकारात्मागुणात्माचह्या० २१ जाग्रत्हीनस्वरूपात्मास्वप्ना
त्माचविवर्जितः आनंदरूपपूर्णात्माआत्म० २२ भूतात्माचभविष्यात्माह्यक्षरात्माचिदात्मकः अनादिमध्यरूपात्माह्या० २३ सर्वसंकल्पहीनात्मास्वच्छचि
न्मात्रमक्षयः ज्ञातृज्ञेयादिहीनात्माह्या० २४ एकात्माएकहीनात्माद्वैतात्माद्वैतवर्जितः स्वयमात्मास्वभावात्माह्या० २५ तुर्यात्मानित्यमात्माचयत्किंचि
दिदमात्मकः भावात्माभावहीनात्माह्या० २६ वाचावधिरनेकात्मावाच्यानंदात्मनंदकः सर्वहीनात्मसर्वात्माह्यात्म० २७ आत्मानमेववीक्षस्वह्या
त्मानंभावयस्वकं स्वस्वात्मानंस्वयंभुंक्ष्वह्या० २८ स्वात्मानमेवसंतुष्यआत्मानंस्वयमेवहि स्वमात्मानंस्वयंपश्येत्स्वमात्मानंस्वयंश्रुतं २९ स्वमा
त्मनिस्वयंतृप्तः स्वमात्मानंस्वयंभरः स्वमात्मानंस्वयंभास्याह्या० ३० स्वमात्मानंस्वयंमोदंस्वमात्मानंस्वयंप्रियं स्वात्मानमेवमंतव्यंआत्म० ३१ आत्मा
नमेवश्रोतव्यंआत्मानंश्रवणंभव आत्मानंकामयेनित्यंआत्मानंनित्यमर्चय ३२ आत्मानंश्लाघयेनित्यंह्या० आत्मानमेवमात्मानंआत्मानंपरिपालय ३३
आत्मानंकामयेनित्यंआत्मानंनित्यमर्चय आत्मैवेयंइयंभूमिःआत्मैवेदमिदंजलं ३४ आत्मैवेदमिदंज्योतिरात्मनोन्यनकिंचन आत्मैवायमिदं
वायुःआत्मैवेदमियंवियत् ३५ आत्मैवायमहंकारआत्मनो० आत्मैवेदमिदंचित्तंआत्मैवेदमिदंमनः ३६ आत्मैवेदमिदंबुद्धिःआत्मनो० आ
त्मैवेयमिदंदेहंआत्मैवायमयंगुणः ३७ आत्मैवेदमिदंतत्त्वंआ० आत्मीयमेवायंमंत्रःआत्मैवायमयंजपः ३८ आत्मैवायमयंलोकःआत्म० आत्मे 

वायमयंशब्दः आत्मैवायमयंरसः ३९ आत्मैवायमयंस्पर्शः आत्म० आत्मैवायमयंगंधआत्मैवायमयंशमः ४० आत्मैवायमयंदुःखंआत्मैवाय
मयंसुखं आत्मीयमेवायंजाग्रत्आत्मीयमेवायंस्वप्नः ४१ आत्मीयमेवायंजप० आत्मैवकार्यमात्मैवप्रायोह्यात्मैवमद्वयं ४२ आत्मीयमेवमद्वैतंआ
त्मैवेदमिदंक्वचित् आत्मीयमेवायंकोपिआत्मनोन्यन्नकिंचन ४३ आत्मैवायमयंकोपिआ० आत्मैवायमयंलोकः आत्मैवायमयंजनः ४४ आत्मै
वायमयंलोकोह्या० आत्मैवायमयंशंभुः आत्मैवायमयंजगत् ४५ आत्मैवायमयंब्रह्मआत्मैवायमयंजपः आत्मैवायमयंसूर्यः आत्मैवायमिदंजडः
४६ आत्मैवायमिदंध्यानंआत्मैवेदमिदंफलं आत्मैवायमयंयोगः सर्वमात्ममयंजगत् ४७ सर्वमात्ममयंभूतंह्या० सर्वमात्ममयंभाविसर्वमात्ममयं
गुरुः ४८ सर्वमात्ममयंशिष्यः आ० सर्वमात्ममयंवेदंसर्वमात्ममयंफलं ४९ सर्वमात्ममयंलक्ष्यंआ० सर्वमात्ममयंतीर्थंसर्वमात्ममयंस्वयं ५०
सर्वमात्ममयंमोक्षंआ० सर्वमात्ममयंकामंसर्वमात्ममयंक्रिया ५१ सर्वमात्ममयंक्रोधंआत्मनोन्यन्नकिंचन सर्वमात्ममयंविद्यासर्वमात्ममयंदिशः
सर्वमात्ममयंलोभंआ० ५२ सर्वमात्ममयंमोहंसर्वमात्ममयंभयं सर्वमात्ममयंचिंताह्या० ५३ सर्वमात्ममयंधैर्यंसर्वमात्ममयंध्रुवं सर्वमात्ममयंसत्यं
ह्या० ५४ सर्वमात्ममयंसुखंआ० ५६ सर्वमात्मसुखंचात्मासत्यमात्मासदात्मकः पूर्णमात्माक्षयंचात्मापरमात्मापरात्परः ५७ इतोप्यात्माततोप्यात्मा
ह्यात्मैवात्माततस्ततः सर्वमात्ममात्ममयंसत्यंह्या० ५८ आत्मनोन्यन्नकिंचनप्रकरणं स्वतंत्रशक्तिर्भगवानुमाधवः विचित्रकार्यात्मकजाग्रत्तस्य
सुकारणंकार्यपरंपराभिः सएवमायावितताम्यथात्मा ५९ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेत्रयोदशोध्यायः १३॥ ऋभुरुवाच शृणुषसर्वंब्रह्मैव
सत्यंसत्यंशिवंशपे निश्चयंआत्मयोगींद्रअन्यत्किंचनकिंचन सर्वमात्मैवशुद्धात्मासर्वंचिन्मात्रमद्वयं नित्यनिर्मलशुद्धात्माअन्यत्किंच
नकिंचन २ अणुमात्रस्वरूपंचअणुमात्रमिदंध्रुवं अणुमात्रशरीरंचअन्यत्किं० ३ अणुमात्रमचिंत्यात्मासर्वंवाह्याणुमात्रकं अणुमात्र
मसत्कल्पोअन्यत्कल्पोनकिंचन ४ चैतन्यमात्रंसंकल्पंचैतन्यंपरमंपदं आनंदपरमंमानंइदंदृश्यंनकिंचन ५ चैतन्यमात्रसंकल्पंचै
तन्यंसकलंस्वयं आनंदंपरमंमानंइदंदृश्यंनकिंचन ६ आनंदश्चाहमेवास्मिअहमेवचिदव्ययः आनंदंपरमंमानंइदंदृश्यंनकिं० ७

शिवरहस्य ष॰ ६ अहमेवहिगुह्यात्मा अहमेवनिरंतरं अहमेवपरंब्रह्म अहमेवगुरोर्गुरुः आनंदपरमंमानं॰ ८ अहमेवाखिलाधारो अहमेवसुखात्सुखं आनंदपरमंमा॰ ९
अ॰ १४ अहमेवहिपूर्णात्मा अहमेवपुरातनः आनंदं॰ १० अहमेवहिशांतात्मा अहमेवहिशाश्वतः आनं॰ ११ अहमेवहिसर्वत्र अहमेवहिसुस्थिरः आनं
दं॰ १२ अहमेवहिजीवात्मा अहमेवपरात्परः आनंदं॰ १३ अहमेवहिवाक्यार्थो अहमेवहिशंकरः आनं॰ १४ अहमेवहिदुर्लक्ष्यं अहमेवप्रकाशकं
१८ अहमेवाहमेवाहं अहमेवस्वयंस्वयं १५ अहमेवपरानंदो अहमेवहिचिन्मयः अहमेवहिशुद्धात्मा अहमेवहिसन्मयः १६ अहमेवहिशून्यात्मा अहमे
वहिसर्वगः अहमेवहिवेदांत अहमेवहिचित्परः १७ अहमेवहि चिन्मात्रं अहमेवहिचिद्घनः अन्यंनकिंचिच्चिद्रूपं अहंवाह्यविवर्जितः १८ अहं
नकिंचिद्ब्रह्मात्मा अहंनान्यदहंपरं नित्यशुद्धविमुक्तोहं नित्यतृप्तोनिरंजनः १९ आनंदंपरमानंदमन्यत्किंचनकिंचन नास्तिकिंचिन्नास्तिकिंचि
तनास्तिकिंचित्परात्परात् २० आत्मैवेदंजगत्सर्वं आत्मैवेदंमनोभ्रमं आत्मैवेदंसुखंसर्वं आत्मैवेदमिदंजगत् २१ ब्रह्मैवसर्वंचिन्मात्रं अहंब्रह्मै
वकेवलं आनंदंपरमानंदमन्यत्किंचनकिंचन २२ दृश्यंसर्वंपरंब्रह्म दृश्यंनास्त्येवसर्वदा ब्रह्मैवसर्वसंकल्पो ब्रह्मैवनपरंक्वचित् २३ आनंदं॰ ब्र
ह्मैव ब्रह्मचिद्रूपंचिदेवंचिन्मयंजगत् २४ असदेवजगत्सर्वं असदेवप्रपंचकं असदेवाहमेवास्मि असदेवत्वमेवहि २५ असदेवमनोवृत्तिर
सदेवगुणागुणौ असदेवमही सर्वमसदेवजलंसदा २६ असदेवजगत्खानि असदेवचतेजकं असदेवसदावायुरसदेवेदमित्यपि २७ अहं
कारमसद्बुद्धिः ब्रह्मैवजगतांगणं असदेवसदाचित्तमात्मैवेदंनसंशयः २८ असदेवासुराः सर्वे असदेवेश्वराकृतिः असदेवसदाविश्वं
असदेवसदाहरिः २९ असदेवसदाब्रह्मा तत्सृष्टिरसदेवहि असदेवमहादेव असदेवगणेश्वरः ३० असदेवसदाचोमा असत्स्कंदोगणेश्वरः
असदेवसदाजीव असदेवहिदेहकं ३१ असदेवसदावेदाश्चासद्वेदांतमेवहि धर्मशास्त्रंपुराणंच असत्यसत्यविभ्रमः ३२ असदेवहिसर्वंचअ
सदेवंपरंपरा असदेवेदमाद्यंतं असदेवमुनीश्वराः ३३ असदेवसदालोकालोका अप्यसदेवहि असदेवसुखंदुःखं असदेवजयाजयौ ३४॥
असदेवपरंबंधं असद्मुक्तिपदंशुभं ३६ असदेवसदाचाहं असदेवत्वमेवहि असदेवहिसर्वत्र असदेवचलाचलं ३७ असच्चसकलंभूतंअस शिवम् १८

त्यंसकलंफलं असत्यमखिलंविश्वंअसत्यमखिलंगुणं ३८ असत्यमखिलंशेषंअसत्यमखिलंद्वयं असत्यमखिलंप्राप्यं असत्यंश्रवणत्रयं
३९ असत्यंचसजातीयंविजातीयमसत्सदा असत्यमधिकाराश्चअसत्याविषयाःसदा असदेवहिदेवाद्याःअसदेवप्रयोजनं असदेवशमंनित्यं
असदेवदमोनित्यं ४१ असदेवससंदेहंअसद्युद्धंसुरासुरं असदेवेशभावंचअसदेवोपास्यमेवहि ४२ असत्यकालदेशादिअसत्क्षेत्रादिभावनं
तज्जन्यधर्माधर्मौचअसदेवविनिर्णयः ४३ असत्यंसर्वकर्माणिअसत्यंस्वपरभ्रमः असत्यंचित्तसद्भावंअसत्यस्थूलदेहकः ४४ असत्यंलिंगदेहं
चसत्यंसत्यंशिवेशपे असत्यंस्वर्गनरकंअसत्यंतद्भयंसुखं ४५ असत्यंग्राहकंसर्वंअसत्यंग्राह्यरूपकं असत्यंसत्यवद्भातंअसत्यंतेशिवेशपे ४६
असत्यंवर्तमानाख्यंअसत्यंभूतरूपकं असत्यंतद्भविष्याख्यंसत्यंसत्यंशिवेशपे ४७ असत्पूर्वमसन्मध्यंअसदंतमिदंजगत् असत्यंतत्सदाप्राय
मसत्यंतन्नसंशयः ४८ असत्यंतुसदाज्ञानमज्ञानंज्ञेयमेवच असत्यंसर्वदाविश्वंअसत्यंसर्वदाजडं ४९ असत्यंसर्वदादृश्यंभातितौरंगशृंगवत्
असत्यंसर्वदाभावःअसत्यंकोशसंभवं ५० असत्यंसकलंमंत्रंसत्यंसत्यंनसंशयः आत्मनोन्यज्जगन्नास्तिनास्त्यनात्ममिदंसदा ५१ आत्मनोन्य
मृषैवेदंसत्यंसत्यंनसंशयः आत्मनोन्यंसुखंनास्तिआत्मनोन्यंनकिंचन ५२ आत्मनोन्यगतिर्नास्तिस्थितमात्मनिसर्वदा आत्मनोन्यंनहिक्वापिआ
त्मनोन्यंतृणंनहि ५३ आत्मनोन्यंनवैकिंचित्क्वचिदप्यात्मनोनहि आत्मानंदप्रकरणमेतत्तेभिहितंमया ५४ यःशृणोतिसकृद्विद्वान्ब्रह्मैवभवतिस्वयं
सकृच्छ्रवणमात्रेणसद्योवंधविमोचन सद्योवंधविमुक्तिदं ५५ एतद्ग्रंथार्थमात्रग्रहणंसर्वैर्विमुच्यते सूतउवाच पूर्णसत्यमहेशंभजनियतहृदायोंतरायै
र्विहीनः सोनित्यंनिर्विकल्पोभवतिभुविसदाब्रह्मभूतोकृतात्मा विछिन्नग्रंथिरीशेशिवविमलपदेविद्यतेभासतेंतः आरामोंतर्भवतिनियतंविश्वभूतोमृ
तश्च ५६ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेचतुर्दशोध्यायः १४॥ ऋभुरुवाच महारहस्यंवक्ष्यामिगुह्याद्गुह्यतरंपुनः अत्यंतंदुर्लभंलोकेसर्वंब्रह्मै
वकेवलं १ ब्रह्ममात्रमिदंसर्वंब्रह्ममात्रमसन्नहि ब्रह्ममात्रंश्रुतंसर्वंसर्वंब्रह्मैवकेवलं ब्रह्ममात्रमहामंत्रंब्रह्ममात्रक्रियाफलं ब्रह्ममात्रमिदंसर्वंब्रह्म
मात्रमसन्नहि ३ ब्रह्ममात्रंश्रुतंसर्वंसर्वंब्रह्मैवकेवलं ब्रह्ममात्रमहामंत्रंब्रह्ममात्रक्रियाफलं ४ ब्रह्ममात्रमहावाक्यंब्रह्मैवकेवलं ब्रह्ममात्रंजगत्स

वंब्रह्ममात्रंजडाजडं ५ ब्रह्ममात्रपरंदेहेसर्वंब्रह्मैवकेवलं ब्रह्ममात्रंगुणंप्रोक्तंब्रह्ममात्रमहंमहत् ६ ब्रह्ममात्रपरंब्रह्मसर्वंब्रह्मैवकेवलं ब्रह्ममात्रमि
दंवस्तुब्रह्ममात्रमयंपुमान् ७ ब्रह्मैवसर्वंयत्किंचित्तत्सर्वंब्रह्मकेवलं ब्रह्ममात्रमनंतात्माब्रह्ममात्रपरंसुखंब्रह्ममात्रपरंज्ञानंसर्वंब्रह्मैवकेवलं ब्रह्म

मात्रपरंपारंब्रह्ममात्रपुरत्रयं ९ ब्रह्ममात्रमनेकत्वंसर्वंब्रह्मैवकेवलं ब्रह्मैवकेवलंगंधंब्रह्मैवपरमंपदं १० ब्रह्मैवकेवलंघ्राणंगंधंब्रह्मैवकेवलं

ब्रह्मैवकेवलंस्पर्शशब्दंब्रह्मैवकेवलं ११ ब्रह्मैवकेवलंरूपंब्रह्मैवरसमुच्यते ब्रह्मैवकेवलंलोकंरसंब्रह्मैवकेवलं १२ ब्रह्मैवकेवलंचित्तंसर्वंब्रह्मै
वकेवलं तत्पदंचसदाब्रह्मत्वंपदंब्रह्मएवहि १३ असीत्येवंपदंब्रह्मब्रह्मैक्यंकेवलंसदा ब्रह्मैवकेवलंगुह्यंब्रह्मैवाह्यंचकेवलं १४ ब्रह्मैवकेवलंनि
त्यंसर्वंब्रह्मैवकेवलं ब्रह्मैवतज्जलानीतिजगदाद्यंतयोस्थितिः १५ ब्रह्मैवअस्तिनास्तीतिब्रह्मैवाहंनसंशयः ब्रह्मैवसर्वंयत्किंचित्सर्वंब्रह्मैवके
वलं १६ ब्रह्मैवजाग्रत्सर्वंहिब्रह्ममात्रमहंपरं ब्रह्मैवसत्यमस्तित्वंब्रह्मैवंतुर्यमुच्यते ब्रह्मैवसत्ताब्रह्मैवब्रह्मैवगुरुभावनं ब्रह्मैवशिष्यसद्भावंब्रह्मै
वमोक्षवद्भवेत् १८ पूर्वापरंचब्रह्मैवपूर्णंब्रह्मसनातनं ब्रह्मैवकेवलंसाक्षात्सर्वंब्रह्मैवकेवलं १९ ब्रह्मसच्चित्सुखंब्रह्मब्रह्मैवमोक्षवद्भवेत् पूर्वापरं
चब्रह्मैवपूर्णंब्रह्मसनातनं २० ब्रह्मैवकेवलंसाक्षात्सर्वंब्रह्मैवकेवलं ब्रह्मैवकेवलंसच्चित्सुखंब्रह्मैवकेवलं २१ आनंदंब्रह्मसर्वत्रप्रियंरूपमि
वस्थितं शुभवासनयाजीवशिववद्भातितत्सदा २२ पापवासनयाजीवोनरकंभोज्यवस्थितं ब्रह्मैवेंद्रियवद्भानंब्रह्मैवविषयादिवत् २३ ब्रह्मैवव्य
वहारंचसर्वंब्रह्मैवकेवलं ब्रह्मैवसर्वमानंदंब्रह्मैवज्ञानविग्रहं २४ ब्रह्मैवमायाकार्याख्यंसर्वंब्रह्मैवकेवलं ब्रह्मैवयज्ञसंधानंब्रह्मैवहृदयांवरं ब्रह्मै
वमोक्षसाराख्यंसर्वंब्रह्मैवकेवलं २५ शुद्धाशुद्धंचब्रह्मैवसर्वंब्रह्मैवकारणं २६ ब्रह्मैवकार्यंभूर्लोकंसर्वंब्रह्मैवकेवलं ब्रह्मैवनित्यतत्त्वात्माब्रह्मैवस
कलंदिनं २७ ब्रह्मैवतूष्णींभूतात्मासर्वंब्रह्मैवकारणं ब्रह्मैववेदसारार्थंब्रह्मैवध्यानगोचरं २८ ब्रह्मैवयोगयोगाख्यंसर्वंब्रह्मैवकेवलं नानारूपत्व
वद्ब्रह्मउपाधित्वेनदृश्यते २९ मायामात्रमितिज्ञात्वावस्तुतोनास्तितत्वतः ब्रह्मैवलोकवद्भातिब्रह्मैवजनवत्तथा ३० ब्रह्मैवरूपवद्भातिवस्तु
तोनास्तिकिंचन ब्रह्मैवदेवताकारंब्रह्मैवमुनिमंडलं ३१ ब्रह्मैवशुद्धबुद्धात्मासर्वंब्रह्मैवकेवलं ब्रह्मैवपरमानंदंब्रह्मैवव्यापकंमहत् ३२ ब्र 

ह्मैवपरमार्थंचसर्वंब्रह्मैवकेवलं ब्रह्मैवयत्नरूपंचब्रह्महव्यंचकेवलं ३५ ब्रह्मैवजीवभूतात्मासर्वंब्रह्मैवकेवलं ब्रह्मैवसकलंलोकंब्रह्मैवगुरुशि
ष्यकं ब्रह्मैवसर्वसिद्धिंचसर्वंब्रह्मैवकेवलं ब्रह्मैवसर्वमंत्रंचब्रह्मैवसकलंजपः ३६ ब्रह्मैवसर्वकार्यंचसर्वंब्रह्मैवकेवलं ब्रह्मैवसर्वकैवल्यंसर्वंब्रह्मै
वकेवलं ३७ ब्रह्मैवसर्वशांतत्वंब्रह्मैवहृदयांतरं ब्रह्मैवब्रह्मरूपंचब्रह्मरूपंचसर्वदा ३८ ब्रह्मैवअक्षरंभावंब्रह्मैवक्षरलक्षणं ब्रह्मैवाहंपदार्थं
चसर्वंब्रह्मै० ३९ ब्रह्मैवत्वंपदार्थंचब्रह्मैवपरमेश्वरः ब्रह्मैवसर्वरूपंचसर्वंब्रह्मैव० ४० ब्रह्मैवसत्यभवनंब्रह्मैवाहंनसंशयः ब्रह्मैवगुणदोषात्मासर्वंब्रह्मै
वकेवलं ४१ ब्रह्मैवपद्यतत्परमंब्रह्मैवपरमेश्वरः ब्रह्मैवकलनाभावंसर्वंब्रह्मैवकेवलं ४२ ब्रह्मैसर्वनसंदोहो ब्रह्मैवकेवलंसर्वं ब्रह्मैवत्वंसदाशिवः सर्वंब्र
ह्मैवकेवलं ४३ ब्रह्मैवेदंजगत्सर्वंसर्वंब्रह्मैवकेवलं ब्रह्मैवसर्वसुलभंब्रह्मैवात्मास्वयंस्वयं ४४ ब्रह्मैवसुखमात्रात्मासर्वंब्रह्मैवकेवलं ब्रह्मैवसर्वं
ब्रह्मैवब्रह्मणोन्यवदत्सदा ४५ ब्रह्मैवब्रह्ममात्रात्मासर्वंब्रह्मैवकेवलं ब्रह्मैवसर्ववाक्यार्थंब्रह्मैवपरमंपदं ४६ ब्रह्मैवसत्तासत्यंचसर्वंब्रह्मैवकेवलं
ब्रह्मैवैकमनाद्यंतंब्रह्मैवैकंनसंशयः ४७ ब्रह्मैवैकंचिदानंदंसर्वंब्रह्मैवकेवलं ब्रह्मैवैकंसुखंनित्यंब्रह्मैवैकंपरायणं ४८ ब्रह्मैवैकंपरंब्रह्मस
र्वंब्रह्मैवकेवलं ब्रह्मैवचित्स्वयंस्वस्थंब्रह्मैवगुणवर्जितं ४९ ब्रह्मैवात्यंतिकंसर्वंसर्वंब्रह्मैवकेवलं ब्रह्मैवनिर्मलंब्रह्मब्रह्मैवसुलभंसदा ५० ब्र
ह्मैवसत्यसत्यानासर्वंब्रह्मैवकेवलं ब्रह्मैवसोरंमसोरंमचब्रह्मैवाहंसुखात्मकं ५१ ब्रह्मैवसर्वदाप्रोक्तंसर्वंब्रह्मैवकेवलं ब्रह्मैवमखिलंब्रह्मब्रह्मै
कंसर्वसाक्षिकं ५२ ब्रह्मैवभूरिभुवनंसर्वंब्रह्मैवकेवलं ब्रह्मैवपरिपूर्णात्माब्रह्मैवंसारमव्ययं ५३ ब्रह्मैवकारणंमूलंब्रह्मैवैकंपरायणं ब्रह्मैवसर्वभूता
त्माब्रह्मैवसुखविग्रहं ५४ ब्रह्मैवनित्यतज्ज्ञात्मासर्वंब्रह्मैवकेवलं ब्रह्मैवनित्यतज्ज्ञात्माब्रह्मैवैकंपरायणं ५५ ब्रह्मैवाद्वैतमात्रात्माब्रह्मैवाकाशवत्प
भुः ब्रह्मैवहृदयांतस्थसर्वंब्रह्मैवकेवलं ५६ ब्रह्मणोन्यत्परंनास्तिब्रह्मणोन्यज्जगन्नच ब्रह्मणोन्यदहंनाहंसर्वंब्रह्मैवकेवलं ५७ ब्रह्मैवान्यत्सु
खंनास्तिब्रह्मणोन्यत्फलंनहि ब्रह्मणोन्यत्तृणंनास्तिसर्वंब्रह्मैवकेवलं ५८ ब्रह्मैवतत्पदंमिथ्याब्रह्मैवाहंनकिंचन ब्रह्मैवाहंजगन्मिथ्यासर्वंब्रह्मैवके
वलं ५९ ब्रह्मैवेदमहंमिथ्याब्रह्ममात्रंत्वमेवहि ब्रह्मैवान्यगुरुर्नास्तिसर्वंब्रह्मैवकेवलं ब्रह्मैवान्यदसत्कार्यंब्रह्मैवान्यदसद्गुरुः ६० ब्रह्मणोन्यन्मनोनास्ति

शिवरहस्यष॰ सर्वंब्रह्मैवकेवलं ब्रह्मैवैतजगन्मिथ्याब्रह्मैवाहंनकिंचन ६१ ब्रह्मैवेकंनचाहंतासर्वंब्रह्मैवकेवलं ब्रह्मैवसर्वमित्येवंप्रोक्तंप्रकरणंमया ६२ यःप
ठेत्श्रावयेत्सद्योब्रह्मैवभवतिस्वयं अस्तिब्रह्मेतिवेदेमिदमिदमखिलंवेदसोसद्भवेतसच्चासंचजगच्छ्रुतिवचोब्रह्मैवतज्ज्ञादिकं यतोविद्येवेदंपरि
अ०१६ लुप्तिमोहेनजगतिअत्तोविद्याप्राप्तःपरिभवतिब्रह्मैवहिसदा ६३ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेपंचदशोध्यायः॥१५॥ ऋभुरुवाच असत्यं
दुर्लभंवक्ष्येवेदशास्त्रागमादिषु शृणुष्वसावधानेनअसदेवहिकेवलं १ यत्किंचिद्दृश्यतेलोकेयत्किंचिद्भाषतेसदा यत्किंचिद्भुज्यतेक्वापितत्स
२० र्वमसदेवहि २ यच्चकिंचिज्जपंवापिस्नानंवाजलमेववा आत्मनोन्यत्परंयत्ततअसत्सर्वंनसंशयः ३ चित्तकार्यंबुद्धिकार्यंमायाकार्यंनमेवहि
आत्मनोन्यत्पदंकिंचितत्सर्वमसदेवहि ४ अहंतायाःपररूपंइदंत्वंसत्यमित्यपि आत्मनोन्यसरंकिंचित्तत्सर्वमसदेवहि ५ नानात्वमेवरूपत्वंमव
हारःक्वचित्क्वचित आत्मीयएवसर्वत्रतत्सर्वसदेवहि ६ तत्वभेदंजगद्भेदंसर्वभेदमसत्यकं इच्छाभेदंजगद्भेदंतत्सर्वमसदेवहि ७ द्वैतभेदंचित्त
भेदंजाग्रद्भेदंमनोमयं अहंभेदमिदंभेदंअसदेवहिकेवलं ८ स्वप्नभेदंसुप्तिभेदंतुर्यभेदमभेदकं कर्तृभेदंक्रियाभेदंगुणभेदंरसात्मकं ९
लिंगभेदमिदंभेदंतत्सर्वमसदेवहि आत्मभेदमसद्भेदंअसद्भेदमनण्वपि अत्यंताभेदसद्भेदंतत्सर्वम॰ अस्तिभेदंनास्तिभेदंअभेदंभेदविभ्रमः ११
भीतिभेदंभूतिभेदंअसदेवहिकेवलं पुनरन्यत्रसद्भेदंइदमन्यत्रवाभयं १२ पुण्यभेदंपापभेदंअसद्भेदमनण्वपि संकल्पभेदंसद्भेदंसदासर्वत्र
भेदकं ज्ञानाज्ञानमयंसर्वंअसदेव॰ १४ ब्रह्मभेदंक्षत्रभेदंभूतभौतिकभेदकं ज्ञानाज्ञानमयंसर्वंअ॰ १५ ब्रह्मभेदंक्षत्रभेदंभूतभौतिकभेदकं द्वंद
भेदमहंभेदअ॰ १६ वेदभेदंदेवभेदंलोकानांभेदमीदृशं पंचाक्षरमसंनित्यं॰ १७ ज्ञानेंद्रियमसन्नित्यंकर्मेंद्रियमसत्सदा असदेवहिशब्दाख्यं
असत्यंतत्फलंतथा १८ असत्यंपंचभूताख्यंअस॰ असत्यंपंचकोशाख्यंअसत्यंपंचदेवता १९ असत्यंषड्विकारादिअसत्यंषडूर्मिणंतथा अस
त्यमरिषड्वर्गअसत्यंषड्ऋतुंतथा २० असत्यंद्वादशमासंअसत्यंवत्सरंतथा असत्यंषडवस्थाख्यंषट्कालमसदेवहि २१ असत्यमेवषट्शास्त्रअस
देवहिकेवलं असदेवहिषण्मासंअसदेवहिवत्सरं २२ असदेवसदाज्ञानंअसदेवहिकेवलं अनुक्तमुक्तंनोक्तंचअसदेवहिकेवलं २३ असत्प्रक शिवम्

रणंचोक्तंसर्ववेदेषुदुर्लभं भूयःशृणुत्वंयोगींद्रसाक्षान्मोक्षंप्रवीम्यहं सन्मात्रमहमेवात्मासच्चिदानंदकेवलं सन्मयानंदभूतात्माचिन्मयानंदस
द्घनः २५ चिन्मयानंदसंदेहंचिदानंदोहिकेवलं चिन्मात्रज्योतिरानंदचिन्मात्रज्योतिविग्रहः २६ चिन्मात्रज्योतिरीशानंसर्वदानंदकेवलं चिन्मात्र
ज्योतिरखिलंचिन्मात्रज्योतिरस्म्यहं २७ चिन्मात्रज्योतिरानंदचिन्मात्रज्योतिरस्म्यहं चिन्मात्रंसर्वमेवाहंसर्वंचिन्मात्रमेवहि २८ चिन्मात्रमेवचित्तश्च
चिन्मात्रंमोक्षमेवच चिन्मात्रंपरमानंदंसर्वंचिन्मा० २९ चिन्मात्रमेवमननंचिन्मात्रंश्रवणंत्वहं चिन्मात्रमहमेवास्मिसर्वंचिन्मा० ३० चिन्मात्रंनिर्गु
णंब्रह्मचिन्मात्रंसगुणंपरं चिन्मात्रमहमेवत्वंसर्वंचिन्मा० ३१ चिन्मात्रमेवहृदयंचिन्मात्रंचिन्मयंसदा चिदेवत्वंचिदेवाहंसर्वंचि० ३२ चिन्मात्रमेवशांत
त्वंचिन्मात्रंशांतिलक्षणं चिन्मात्रमेवविज्ञानंचिन्मात्रंब्रह्मकेवलं ३३ चिन्मात्रमेवचैतन्यंचिन्मात्रंभास्करादिकं चिन्मात्रमेवसन्मात्रंचि०जगदेवहि ३४
चिन्मात्रमेवसत्कर्मचिन्मात्रंनित्यमंगलं चिन्मात्रमेवहिब्रह्मचिन्मात्रंहरिरेवहि ३५ चिन्मात्रमेवमानात्माचिन्मात्रंसिद्धिमेवहि चिन्मात्रमेवजनितंचिन्मा
त्रंसुखमेवहि ३६ चिन्मात्रमेवगगनंचिन्मात्रंपर्वतंजलं चिन्मात्रमेवनक्षत्रंचिन्मात्रंमेघमेवहि ३७ चिदेवदेवताकारंचिदेवशिवपूजनं चिन्मा
त्रमेवकाठिण्यंचिन्मात्रंशीतलंजलं ३८ चिन्मात्रमेवमंतव्यंचिन्मात्रंहृत्स्वभावनं चिन्मात्रमेवसकलंचिन्मात्रंभुवनंपिता ३९ चिन्मात्रमेवज
ननीचिन्मात्रंनास्तिकिंचन चिन्मात्रमेवनयनंचिन्मात्रंश्रवणंमुखं ४० चिन्मात्रमेवकरणंचिन्मात्रंकार्यमीश्वरं चिन्मात्रंचिन्मयंसत्यंचिन्मात्रं
नास्तिनास्तिहि ४१ चिन्मात्रमेववेदांतंचिन्मात्रंब्रह्मनिश्चयं चिन्मात्रमेवसद्भाविचिन्मात्रंभातिनित्यशः ४२ चिदेवजगदाकारंचिदेवपरमंपदं
चिदेवहिचिदाकारंचिदेवहिचिदव्ययः ४३ चिदेवजगदाकारंचिदेवहिचिदव्ययः चिदेवहिशिवाकारंचिदेवशिवविग्रहः ४४ चिदाकारमिदंस
र्वंचिदाकारंसुखात्सुखं चिदेवहिचिदाकारंचिदेवपरमंपदं ४५ चिदेवहिजडाकारंचिदेवहिनिरंतरं चिदेवकलनाकारंजीवाकारंचिदेवहि ४६
चिदेवदेवताकारंचिदेवशिवपूजनं चिदेवत्वंचिदेवाहंसर्वंचिन्मात्रमेवहि ४७ चिदेवपरमाकारंचिदेवहिनिरामयं चिन्मात्रमेवसततंचिन्मात्रं
हिपरायणं ४८ चिन्मात्रमेववैराग्यंचिन्मात्रंनिर्गुणंसदा चिन्मात्रमेवसंचारंचिन्मात्रंमंत्रतंत्रकं ४९ चिदाकारमिदंविश्वंचिदाकारंजगत्त्रयं चिदा

कारमहंकारंचिदाकारंपरात्परं ५० चिदाकारमिदंभेदंचिदाकारंतृणादिकं चिदाकारंचिदाकाशंचिदाकारमरूपकं ५१ चिदाकारमहानंदंचिदा
कारंसुखात्सुखं चिदाकारंसुखंभोज्यंचिदाकारपरंगुरुं ५२ चिदाकारमिदंविश्वंचिदाकारमिदंपुमान् चिदाकारमजंशांतंचिदाकारमनामयं ५३ चि
दाकारंपरातीतंचिदाकारंचिदेवहि चिदाकारंचिदाकाशंचिदाकारंशिवायते ५४ चिदाकारंसदाचित्तंचिदाकारंसदामृतं चिदाकारमिदंस्थानं
चिदाकारंहृदंवरं ५५ चिदाबोधंचिदाकारंचिदाकाशंततंसदा चिदाकारंसदापूर्णंचिदाकारंमहत्फलं ५६ चिदाकारंपरंतत्वंचिदाकारंपरंभवान्
चिदाकारंसदामोदंचिदाकारंसदामृतं ५७ चिदाकारंसदाकामंचिदाकारमिदंमहत् चिदाकारंपुनःपुण्यंचिदाकारंसदामनः ५८ चिदाकारंब्रह्मचि
दहंचिदहंसदा चिदहंचिदहंचित्तंसत्यंसत्यंनसंशयः ५९ चिदेवजगदाकारंचिदेवशिवशंकरः चिदेवगगनाकारंचिदेवज्वलनास्पदं चिदेवाहंचि
गणनायकं ६० चिदेवभुवनाकारंचिदेवभवभावनं चिदेवहृदयाकारंचिदेवहृदयेश्वरः ६१ चिदेवअसताकारंचिदेवचलनास्पदं चिदेवाहं
चिदेवाहंचिन्मयंचिन्मयंसदा ६२ चिदेवसत्यविश्वासंचिदेवब्रह्मभावनं चिदेवपरमंदेवंचिदेवहृदयालयं ६३ चिदेवसकलाकारंचिदेवजनमंडलं
चिदेवसर्वमानंदंचिदेवाप्रियभाषणं ६४ चिदेवंत्वंचिदेवाहंसर्वंचिन्मात्रमेवहि चिदेवपरमंध्यानंचिदेवपरमार्हणं ६५ चिदेवत्वंचिदेवाहंसर्वं
चिन्मयमेवहि चिदेवत्वप्रकरणंसर्ववेदेषुदुर्लभं ६६ सकृच्छ्रवणमात्रेणब्रह्मैवभवतिस्वयं यस्याभिध्यानयोगाज्जनिमृतिविवशांशाश्वतंवृत्ति
भिर्येमायामोहैर्विहीनाहृदुदरभयजच्छिद्यतेग्रंथिजातं विश्वंविश्वाधिकरसंभवतिभवतोदर्शनादाप्तकामः सोनित्योनिर्विकल्पोभवतिभुविस
दाब्रह्मभूतोंतरात्मा ६७ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेषोडशोध्यायः॥१६॥ ऋभुरुवाच निदाघश्रृणुगुह्यंमेसर्वसिद्धांतसंग्रहः द्वै
ताद्वैतमिदंशून्यंशांतंब्रह्मैवसर्वदा १ अहमेवपरंब्रह्मअहमेवपरात्परं द्वैताद्वैतमिदंशून्यंशांतंब्रह्मैवकेवलं २ अहमेवहिशांतात्माअहमेवहिसर्वगः
अहमेवहिशुद्धात्माअहमेवहिनित्यशः ३ अहमेवहिनानात्माअहमेवहिनिर्गुणः अहमेवहिनित्यात्माअहमेवहिकारणं ४ अहमेवजगत्सर्वंद्र
दंचैवाहमेवहि अहमेवहिमोक्षात्माअहमेवहिमुक्तिदः ५ अहमेवहिचैतन्यंअहमेवहिचिन्मयः अहमेवहिचैतन्यंअहंसर्वांतरःसदा ६ अहमे

वह्निभूतात्माभौतिकंत्वहमेवहि अहमेवत्वमेवाहंअहमेवाहमेवहि ७ जीवात्माअहमेवाहंअहमेवपरेश्वरः अहमेवविभुर्नित्यंअहमेवस्वयंसदा ८
अहमेवाक्षरंसाक्षादहमेवहिमेप्रियं अहमेवसदाब्रह्मा अहमेवसदाव्ययः ९ अहमेवाहमेकोयंअहमेवांतरांतरः अहमेवचिदाकाशंअहमेवावभास
कः १० अहमेवसदास्त्रष्टाअहमेवहिरक्षकः अहमेवाहलीलात्माअहमेवहिनिश्चयः ११ अहमेवसदासाक्षीत्वमेवत्वंपुरातनः त्वमेवहिपरंब्रह्मत्व
मेवहिनिरंतरं १२ अहमेवाहमेवाहअहमेवत्वमेवहिअहमेवाहयाकारोअहमेवविदेहकः १३ अहमेवसमाधारोअहमेवमदात्मकः अहमेवोपशां
तात्माअहमेवरिवसकः १४ अहमेवसमाधानंअस्थामप्यहमेवहि अहमेवमहाव्योमअहमेवकलात्मकः १५ अहमेवहिकार्यांतःअहमेवसदांतरः
अहंपुरस्तादेवाहंअहंपश्चादहंसदा १६ अहमेवहिविश्वात्माअहमेवहिकेवलं अहमेवपरंब्रह्मअहमेवपरात्परः १७ अहमेवचिदानंदःअहमेव
सुखासुखं अहमेवगुरुस्त्वंचअहमेवाच्युतःसदा १८ अहमेवहिवेदांतोअहमेवहिचेतनः देहोयंमुख्यचैतन्यःअहंसंशयवर्जितः १९ अहमेवपरंज्यो
तिरहमेवपरंपदं अहमेवविनाशात्माअहमेवपुरातनं २० अहंब्रह्मनसंदेहोअहंभावनवर्जितः अहंसत्तानसंदेहोअहंमुख्यत्वमेवच २१ अहंशांतोनसंदे
होअहमेवहिनिष्कलः अहंतुर्योनसंदेहोअहमात्मानसंशयः २२ अहमित्यपिहीनोहंअहमित्यपिभावनः अहमेवहिभावांताअहमेवहिशोभनं २३
अहमेवक्षपातीतःअहमेवहिमंगलं अहमेवाच्युतानंदःअहमेवनिरंतरं अहमेवाप्रमेयात्माअहंसंकल्पवर्जितः अहंबुधःपरंधामअहंबुद्धिविवर्जितः
२५ अहमेवसदासत्यंअहमेवसदासुखं अहमेवसदालभ्यंअहंसुलभकारणं २६ अहंसुलभविज्ञानदुर्लभोज्ञानिनांसदा अहंचिन्मात्रएवात्माअहमेव
हिविद्वनः अहमेवत्वमेवाहंब्रह्मएवनसंशयः अहमात्मानसंदेहोसर्वव्यापीनसंशयः २८ अहमात्माप्रियंसत्यंसत्यंसत्यंपुनःपुनः अहमात्माजरोव्यापी
अहमेवात्मनोगुरुः २९ अहमेवमृतोमोक्षोअहमेवहिनिश्चलः अहमेवहिनित्यात्माअहंमुक्तोनसंशयः ३० अहमेवसदासिद्धोअहमेवहिनिर्गुणः
अहंप्रपंचहीनोहंअहंदेहविवर्जितः ३१ अहंकामविहीनात्माअहंमायाविवर्जितः अहंदोषप्रशांतात्माअहंसंसारवर्जितः ३२ अहंसंकल्परहितोविक
ल्परहितःशिवः अहमेवहितुर्यात्माअहमेवहिनिर्मलः ३३ अहमेवसदाज्योतिरहमेवसदाप्रभुः अहमेवसदाब्रह्माअहमेवसदापरः ३४ अहमेवसदा

शिवरहस्यं त्तानं अहमेवसदामृदुः अहमेवहि चित्तं च अहंमानविवर्जितः ३५ अहंकारं च संसारं अहंकारमसत्सदा अहमेवहि चिन्मात्रं मत्तो नास्ति हि नास्ति हि ३६
अ० ११ अहमेवहि मे सत्यं मत्तो नान्यस्तु किंचन मत्तो मत्तत्परं नास्ति मतोप्यलेपदं नहि ३७ पुण्यमित्यपि नक्कापि पापमित्यपि नास्ति हि इदं भेदमयं भेदं सदसद्भेद
मित्यपि नास्ति नास्ति त्वया सत्यं सत्यसत्यं पुनः पुनः नास्ति नास्ति सदा नास्ति सर्वं नास्तीति निश्चयः ३९ इदं ब्रह्म परं ब्रह्म अहं ब्रह्म त्वमेव हि कालो ब्रह्म क
२२ लाब्रह्म कार्यं ब्रह्मक्षणं तदा ४० सर्वं ब्रह्माप्यहं ब्रह्म ब्रह्मास्मीति न संशयः चित्तं ब्रह्म मनो ब्रह्म सत्यं ब्रह्म सदास्म्यहं ४१ निर्गुणं ब्रह्म नित्यं च निरंतरमहं परः
आद्यंतं ब्रह्म एवाहं आद्यंतं च नहि क्वचित् ४२ अहमित्यपिश्रुतीपि स्मरणं भाषणं न च सर्वं ब्रह्म न संदेहो त्वमित्यपि न हि क्वचित् ४३ वक्ता नास्ति न संदेहो ए
षा गीता च दुर्लभा सद्योमोक्षप्रदं ह्येतत् सद्योमुक्तिप्रदायकं ४४ सद्य एव परं ब्रह्म पदं प्राप्नोति निश्चयः सकृच्छ्रवणमात्रेण सद्योमुक्तिं प्रयच्छति ४५ एतत्तु दुर्लभं लो
के त्रैलोकेपि च दुर्लभं अहं ब्रह्म न संदेहः इत्येवं भावयेद्दृढं ४६ ततः सर्वं परित्यज्य तूष्णींतिष्ठ यथासुखं सूत उवाच भुवनगगनमध्यध्यानयोगांगसंगैः
यमनियमविशेषैः भस्मरागांगसंगैः सुखमुखभरिताशाः कोशपाशाद्विहीना हृदि मुदितपराशाः शांभवाः शंभुवश्च ४७ इति श्रीशिवरहस्ये शंकराख्ये षष्ठांशे सप्त
दशोध्यायः १७ ॥ ऋभुरुवाच ॥ शृणु भूयः परं तत्त्वं सद्योमोक्षप्रदायकं सर्वं ब्रह्मैव सततं सर्वं शांतं न संशयः १ ब्रह्माकारमिदं सर्वं पराकारमिदं न हि इदमित्य
पि यद्द्वेषवयमित्यपि भाषणं २ यत्किंचित्स्मरणं वापि यत्किंचिद्ध्यानमेव हि यत्किंचित्तानरूपं वा तत्सर्वं ब्रह्म चैव हि ३ यत्किंचिद्ब्रह्मवाक्यं वा यत्किंचिद्देववा
क्यं यत्किंचिद्गुरुवाक्यं च तत्सर्वं ब्रह्म चैव हि यत्किंचित्कल्मषं सत्यं यत्किंचित्प्रियभाषणं यत्किंचिन्मननं चिंता तत्सर्वं ब्रह्म चैव हि ५ यत्किंचिच्छ्रवणं नित्यं यत्किं
चिध्यानमश्नुते यत्किंचिन्निश्चयं शास्त्रा यत्किंचित्सर्वमेव हि यत्किंचिद्गुरुरूपदेशं यत्किंचिद्गुरुचिंतनं यत्किंचिद्योगभेदं वा तत्सर्वं दुःखमेव हि ७ सर्वं त्यज गु
रुं त्यज त्वं देवं त्यज नित्यशः तूष्णीमेवासनं ब्रह्मसुखमेव हि केवलं ८ सर्वं त्यक्त्वा सुखं नित्यं सर्वत्यागं सुखं महत् सर्वत्यागपरानंदं सर्वत्यागसुखं परं ९ सर्वे
त्यागं मनोत्यागः सर्वत्यागमहंकृतेः सर्वत्यागमनोत्यागं सर्वत्यागः परः सुखं १० सर्वत्यागं महामोक्षं चित्तत्यागं तदेव हि चित्तमेव जगन्नित्यं चित्तमेव हि सं
सृतिः ११ चित्तमेव महामाया चित्तमेव शरीरकं चित्तमेव भवं देवं चित्तमेव मनोमयं १२ चित्तमेव प्रपंचाख्यं चित्तमेव हि कल्मषं चित्तमेव जडं सर्वं चित्तमेवेंद्रिया शिवर

दिकं १३ चित्तमेवसदासत्यंचित्तमेवहिनक्कचित् चित्तमेवमहाशास्त्रंचित्तमेवमनप्रदं १४ चित्तमेवसदापापंचितमेवसदामलं चित्तमेवहिसर्वाख्यं
चित्तंसर्वात्मनाजयि १५ चित्तंनास्तीतिचिंतास्यादात्ममात्रप्रकाशते चित्तमस्तीतिचिंताचेच्चित्तत्वंस्वयमेवहि १६ स्वयमेवहिचिंताख्यंस्वयंब्रह्मनसंशयः
चित्तमेवहिसर्वाख्यंचित्तंसर्वमितिस्मृतं १७ ब्रह्मैवाहंस्वयंज्योतिःब्रह्मैवाहंनसंशयः सर्वंब्रह्मनसंदेहोसर्वंचिज्ज्योतिरेवहि १८ अहंब्रह्मैवनित्यात्मापूर्णास्पूर्णत
रंसदा अहंपृथिव्यादिसहितंअहंदेहविलक्षणः १९ अहंसूक्ष्मशरीरांतंअहमेवपुरातनं अहमेवहिमातात्मासर्वंब्रह्मैवकेवलं चिदाकारोह्यहंपूर्णचिदा
काशमिदंजगत् चिदाकारंचिदाकाशंचिदाकाशमहंसदा २१ चिदाकाशंत्वमेवासिचिदाकाशमहंसदा चिदाकारंचिदेवेदंचिदाकाशंनकिंचन २२ चिदाका
शंततंसर्वंचिदाकारप्रकाशकं चिदाकाशंमनोरूपंचिदाकाशंचचिद्घनः चिदाकाशंपरंब्रह्मचिदाकाशंचचिन्मयः चिदाकाशंशिवःसाक्षात्चिदाकाशमहंसदा
२४ सच्चिदानंदरूपोहंसच्चिदानंदशाश्वतः सच्चिदानंदसन्मात्रंसच्चिदानंदभावनः २५ सच्चिदानंदपूर्णोहंसच्चिदानंदकारणं सच्चिदानंदसंदेहोसच्चिदानं
दहीनकः सच्चिदानंदनित्योहंसच्चिदानंदलक्षणं सच्चिदानंदमात्रोहंसच्चितानंदईश्वरः २७ अत्रैवेदमिदंसर्वंआत्मैवाहंनसंशयः आत्मैवास्तिपरंसत्यंआ
त्मैवपरमंपदं २८ आत्मैवजगदाकारंआत्मैवभुवनत्रयं आत्मैवजगतांश्रेष्ठआत्मैवहिमनोमयः २९ आत्मैवजगतांत्राताआत्मैवगुरुरात्मनःआत्मैवपर
मंब्रह्मआत्मैवाहंनसंशयः आत्मैवपरमंलोकंआत्मैवपरमात्मनःआत्मैवबहुधाभातिआत्मैवैकंपरात्मनः ३१ आत्मैवजीवरूपात्माआत्मैवेश्वरविग्रहः
आत्मैवहरिरानंदःआत्मैवस्वयमात्मनः ३२ आत्मैवानंदसंदोहंआत्मैवेदंसदासुखं आत्मैवनित्यशुद्धात्माआत्मैवजगतःपरः ३३ आत्मैवपंचभूतात्मा
आत्मैवज्योतिरात्मनः आत्मैवसर्वदानान्यदात्मैवपरमोमयः ३४ आत्मैवह्यात्मभासात्माआत्मैवविभुरव्ययः आत्मैवब्रह्मविज्ञानंआत्मैवाहंत्वमेवहि ३५
आत्मैवपरमानंदमात्मैवाहंजगन्मयः आत्मैवाहंजगज्ज्ञानंआत्मैवाहंनकिंचन ३६ आत्मैवह्यात्मनस्नानं० आत्मैवह्यात्मनोमोदंआत्मैवात्मप्रियःसदा ३७
आत्मैवह्यात्मनोनित्योह्यात्मैवगुणभासकः आत्मैवतुर्यरूपात्माआत्मातीतःततःपरः ३८ आत्मैवनित्यपूर्णात्माआत्मैवाहंनसंशयः आत्मैवत्वमहंचात्मनसर्व
मात्मैवकेवलं ३९ नित्योहंनित्यपूर्णोहंनित्योहंसर्वदासदा आत्मैवाहंजगन्नान्यत्अमृतात्मापुरातनः ४० पुरातनोहंपुरुषोहमीशोपरात्परोहंपरमेश्वरोहं भवप्र

शिवरहस्य ष० दोहंभवनाशनोहंसुखप्रदोहंसुखरूपमद्वयं ४१ आनंदोहमशेषोहंअमृतोहंनसंशयः अजोहमात्मरूपोहंअन्यंनास्तिसदाप्रियः ४२ ब्रह्मैवाहमिदंब्रह्मसर्वं
अ०१८ ब्रह्मसदाव्ययः सदासर्वपदंनास्तिसर्वमेवसदानहि ४३ निर्गुणोहंनिराधारहंनास्तीतिसर्वदा अनर्थमूलंनास्त्येवमायाकार्यंनकिंचन ४४ अविद्याविभवंना
स्तिअहंब्रह्मनसंशयः सर्वंब्रह्मचिदाकाशंतदेवाहंनसंशयः ४५ तदेवाहंस्वयंचाहंपरंचाहंपरेश्वरः विद्याधारोहमेवात्रविद्याविद्येनकिंचनचिदहंचिदहंनित्यं
तुर्योहंतुर्यकःपरः ब्रह्मैवसर्वंब्रह्मैवसर्वंब्रह्मसदाप्यहं मत्तोन्यंनापरंकिंचित्मत्तोन्यंब्रह्मनक्वचित् मत्तोन्यत्परमंनास्तिमत्तोन्यच्चिन्मयंनहि ४८ मत्तोन्यत्सं
२३ पदंनास्तिमत्तोन्यश्चित्पदंनमे मत्तोन्यद्भुवनंनास्तिमत्तोन्यत्किंचिदप्यणु ४९ मत्तोन्यत्कारणंनास्तिमत्तोन्यद्ब्रह्ममेवन मत्तोन्यत्सत्वरूपंनमत्तोन्यच्छुद्धमे
वनमत्तोन्यत्पावनंनास्तिमत्तोन्यत्तत्पदंनहि मत्तोन्यद्धर्मरूपंवामत्तोन्यदखिलंनच ५१ मत्तोन्यदसदेवात्रमत्तोन्यन्मिथ्यएवहि मत्तोन्यद्भातिसर्वंसमत्तो
न्यच्छशशृंगवत् ५२ मत्तोन्यद्भातिचेन्मिथ्यामत्तोन्यंचेंद्रजालकं मत्तोन्यत्सदृशंनास्तिमत्तोन्यत्कार्यकारणं ब्रह्ममात्रमिदंसर्वंसोहमस्मीतिभावना सर्वमु
क्तंभगवताएवमेवेतिनिश्चिनु बहुनोक्तेनकिंयोगीनिश्चयंकुरुसर्वदा सकृन्निश्चयमात्रेणब्रह्मैवभवतिस्वयं ५५ वननगभुवनंपुच्छंकरान्मान्यदस्तिज
गत्ससुराद्यंदेवदेवःसपत्नः तनुमनगमवाप्येकोशकाशावकाशेसखलुपरशिवात्माहश्यतेसूक्ष्मबुध्या ५६ चक्षुःश्रोत्रमनोसवश्चहृदिखाद्भासि
तध्यांतरएतस्मिन्नेवविलीयतेगतिपरंयद्भासमावासितं चित्तंचेतयतेहृदींद्रियगणंवाचामनोदूरगंतंब्रह्मामृतमेतदेवगिरिजाकांतात्मनासंज्ञितं ५७ इ
तिश्रीशिवरहस्येशंकराख्येषष्ठांशेअष्टादशोध्यायः १८॥ ऋभुरुवाच ब्रह्मानंदंप्रवक्ष्यामित्रिषुलोकेषुदुर्लभं यस्यश्रवणमात्रेणसदामुक्तिमवाप्नुयात्
१ परानंदोहमेवात्मासर्वात्मानंदमेवहि पूर्णानंदस्वरूपोहंचिदानंदमयंजगत् २ सदानंदमनंतोहंनित्यानंदमिदंमनः बुध्यानंदस्वरूपोहंबोधानंदमि
दंजगत् ३ केवलानंदमात्रोहंकेवलज्ञानवानहं इतिभावययत्नेनप्रपंचोपशमायवै ४ सदासत्यंपरंज्योतिःसदानित्यादिलक्षणः सदासत्यादिहीनात्मा
सदाज्योतिप्रियोह्यहं ५ नास्तिमिथ्याप्रपंचात्मानास्तिमिथ्यामनोमयः नास्तिमिथ्याभिधानात्मानास्तिचित्तंदुरात्मवान् ६ नास्तिमूढतरोलोकोनास्ति
मूढतमोनरः अहमेवपरंब्रह्मअहमेवस्वयंसदा इदंपरंचनास्त्येवअहमेवहिकेवलं अहंब्रह्मास्मिशुध्दोस्मिसर्वंब्रह्मैवकेवलं ८ जगत्सर्वंसदा

नास्तिचित्तमेवजगन्मयं चित्तमेवप्रपंचाख्यंचित्तमेवशरीरकं ९ चित्तमेवमहादोषंचित्तमेवहिबालकं चित्तमेवमहामायंचित्तमेवमहानसत् १०
चित्तमेवहिमिथ्यात्माचित्तंशशविषाणवत् चित्तंनास्तिसदानित्यंचित्तंवंध्याकुमारवत् ११ चित्तशून्यंनसंदेहोब्रह्मैवकेवलंजगत् अहमेवहिचैतन्य
अहमेवहिनिर्गुणं १२ मनएवहिसंसारंमनएवहिमंडलं मनएवहिबंधत्वंमनएवहिपातकं १३ मनएवमहादुःखंमनएवशरीरकं मनएवप्रपंचा
ख्यंमनएवकलेवरं १४ मनएवमहासत्यंमनएवचतुर्मुखः मनएवहरिःसाक्षान्मनएवशिवःस्मृतः १५ मनएवेंद्रजालाख्यंमनःसंकल्पमात्रकं
मनएवमहापापंमनएवदुरात्मवान् १६ मनएवहिसर्वाख्यंमनएवमहद्भयं मनएवपरंब्रह्ममनएवहिकेवलं १७ मनएवचिदाकारंचिदाकारमना
यते चिदेवहिपरंरूपंचिदेवहिपरंपदं १८ परंब्रह्माहमेवाद्यपरंब्रह्माहमेवहि अहमेवहितत्त्वात्माअहमानंदविग्रहः १९ अहंबुद्धिःप्रबुद्धात्मानि
त्यंनिश्चयनिर्मलः अहमेवहिशांतात्माअहमाद्यंतवर्जितः २० अहमेवप्रकाशात्माअहंब्रह्मैवकेवलं अहंनित्योनसंदेहोअहंबुद्धःप्रियस्सदा २१
अहमेवाहमेवैकोअहमेवाखिलामृतः अहमेवस्वयंसिद्धःअहमेवानुमोदकः २२ अहमेवत्वमेवाहंसर्वात्मासर्ववर्जितः अहमेवपरंब्रह्मअह
मेवपरात्परः २३ अहंकारंनमेदुःखंनमेदोषंनमेसुखं नमेबुद्धिर्नमेचित्तंनमेदेहोनमेंद्रियं २४ नमेगोत्रंनमेनेत्रंनमेपात्रंनमेतृणं नमेजपो
नमेमंत्रःनमेश्रोत्रंनमेक्वचित् २५ नमेवाह्यंनमेबुद्धिस्थानंवापिनमेवयः नमेतत्त्वंनमेलोकंनमेशांतिर्नमेचलं २६ नमेकोपंनमेकामंकेवलं
ब्रह्ममात्रतः केवलंब्रह्मरूपत्वात्केवलंस्वयमेवहि २७ नमेरागंनमेलोभंनमेस्तोत्रंनमेस्तुतिः नमेमोहोनमेतृष्णानमेस्नेहंनमेगुणः २८ नमे
कोशंनमेबाल्यंनमेयौवनवार्धकं सर्वंब्रह्मैकरूपत्वादेकंब्रह्मेतिनिश्चितं ब्रह्मणोन्यत्परंनास्तिब्रह्मणोन्यंनकिंचन ब्रह्मणोन्यदिदंनास्तिब्रह्म
णोन्यद्भयंनहि ३० आत्मनोन्यत्सदानास्तिआत्मैवाहंनसंशयः आत्मनोन्यत्सुखंनास्तिआत्मनोन्यदहंनच ३१ ग्राह्यग्राहकहीनोहंसागसाज्य
विवर्जितः नत्याज्यंनचमेग्राह्यंनबंधंनचमुक्तिकं ३२ नलोकंनचमेहीनंनश्रेष्ठंनापिदूषणं नमेबलंनचांडालानमेविप्रादिवर्णकं ३३ नमेपीनंन
मेह्रस्वंनमेक्षीणंनमेबलं नमेमुक्तिर्नमेशक्तिःनमेदेवंनमेपृथक् ३४ अहंब्रह्मैकमात्रत्वान्निसत्त्वान्यनकिंचन नमनंनचमेमिथ्यानमेसत्यंवपुःक्व

 चित् नमेशीतंनमेचोष्णंनमेकालंनमेक्षणं नमेमंत्रंनमेशास्त्रंनमेवेदंनमेगुरुः ३६ अहमेवैकरूपत्वात्सत्यंसत्यंनमेक्वचित् अहमित्यपिनास्त्ये
वब्रह्मइत्यपिनामन ३७ यद्यद्यद्यत्प्रपंचोक्तियद्यद्यद्यद्गुरोर्वचः यत्सर्वंब्रह्ममेवाहंतत्सर्वंचिन्मयमत्त ३८ चिन्मयंचिन्मयंब्रह्मसन्मयंसन्मयंसदा
 स्वयमेवस्वयंब्रह्मस्वयमेवस्वयंपरं ३९ स्वयमेवस्वयंमोक्षःस्वयमेवनिरंतरं स्वयमेवहिविज्ञानंस्वयमेवहिनास्त्यकं ४० स्वयमेवसदासारंस्वयमेव
स्वयंपरंस्वयमेवहिशून्यात्मास्वयमेवमनोहरः ४१ तूष्णीमेवासनंस्नानंतूष्णीमेवासनंजपः तूष्णीमेवासनंपूजातूष्णीमेवासनंपरः ४२ विचार्य
 मनसानित्यंअहंब्रह्मेतिनिश्चिनु अहंब्रह्मनसंदेहोएवंतूष्णींस्थितोजयः ४३ सर्वंब्रह्मैवनास्त्यन्यत्सर्वंज्ञानमयंतपः स्वयमेवहिनास्त्येवंसर्वातो
तस्वरूपवान् ४४ वाचातीतस्वरूपोहंवाचाजप्यमनर्थकं मानसःपरमार्थायएतद्भेदमहंनमे ४५ कुणपंसर्वभूतादिकुणपंसर्वसंग्रहं असत्यं
सर्वदालोकंअसत्यंसकलंजगत् ४६ असत्यमन्यदस्तित्वंअसत्यंनास्तिभाषणं असत्यंकारणमस्तित्वंब्रह्ममात्रंसदास्वयं ४७ असत्यंवेद
वेदांतंअसत्यंशास्त्रनिश्चयं असत्यंश्रवणंह्येतत्असत्यंमननंचतत् ४८ असत्यंचनिजध्यासंसजातीयमसत्यकं विजातीयमसत्योक्तंसत्यं
सत्यंनसंशयः ४९ सर्वंब्रह्मसदाब्रह्मएकंब्रह्मचिदव्ययः चेतोविलासजनितंकिलविश्वमेतद्धिस्वाधिकस्वकल्पयापरिपूर्णभाक्स्यात् नास्त्यन
तःश्रुतिशिरोस्थितवाक्यबोधशास्त्रानुसारिकरणैर्भवतेविमुक्त्यै ५० इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेएकोनविंशोध्यायः॥१९॥ ऋभुरुवाच
शृणुकेवलमत्यंतरहस्यंपरमाद्भुतं इतिगुह्यतरंसद्योमोक्षप्रदमिदंसदा १ सुलभंब्रह्मविज्ञानंसुलभंशुभमुत्तमं सुलभंब्रह्मनिष्ठानांसुलभं
सर्वबोधकं २ सुलभंकृतकृत्यानांसुलभंस्वयमात्मनः सुलभंकारणाभावंसुलभंब्रह्मणिस्थितिः ३ सुलभंचित्तहीनानांस्वयंतच्चस्वयंसुखं स
यंसंसारहीनानांचित्तंसंसारमुच्यते ४ स्वेष्टेवेदंनसंसारोब्रह्मैवेदंमनोनच ब्रह्मैवेदंभयंनास्तिब्रह्मैवेदंनकिंचन ५ ब्रह्मैवेदमसत्सर्वंब्रह्मैवेदंपरायणं
ब्रह्मैवेदंशरीराणांब्रह्मैवेदंतृणंनच ६ ब्रह्मैवेदास्मिनान्योस्मिब्रह्मैवेदंजगन्नच ब्रह्मैवेदंवियन्नास्तिब्रह्मैवेदंक्रियानच ब्रह्मैवेदंमहात्मानंब्रह्मैवेदंप्रि
यंसदा ब्रह्मैवेदंजगन्नातोब्रह्मैवाहंभयंनहि ८ ब्रह्मैवाहंसदाचित्तंब्रह्मैवाहमिदंनहि ब्रह्मैवाहंतुयन्मिथ्याब्रह्मैवाहमियंभ्रमाः ९ ब्रह्मैवसर्वसिस्वांतेब्र शिवम्

ह्मैवमनसास्पदं ब्रह्मैवसर्वभवनंब्रह्मैवमुनिमंडलं १० ब्रह्मैवसर्वनास्त्यन्यत्ब्रह्मैवगुरुपूजनं ब्रह्मैवनान्यकंवस्तुब्रह्मैवसकलंसदा ११ ब्रह्मैवत्रि
गुणाकारंब्रह्मैवहरिरूपकं ब्रह्मणोन्यत्पदंनास्तिब्रह्मणोन्यस्त्क्षणंनमे १२ ब्रह्मैवाहंमवार्त्तामिब्रह्मैवाहंश्रुतंनमे ब्रह्मैवाहंनमेनास्तिसर्वब्रह्मैवकेवलं
ब्रह्मैवाहंनमेभोगोब्रह्मैवाहंनमेपृथक् ब्रह्मैवाहंसतंनास्तिब्रह्मैवब्रह्मरूपकः १४ ब्रह्मैवसर्वदाभातिब्रह्मैवसुखमुत्तमं ब्रह्मैवनानाकारत्वाद्ब्रह्मैवा
हंप्रियंमहत् १५ ब्रह्मैवब्रह्मणःपूज्याब्रह्मैवब्रह्मणोगुरुः ब्रह्मैवब्रह्ममाताजंब्रह्मैवाहंपितासुतः १६ ब्रह्मैवब्रह्मदेवंचब्रह्मैवब्रह्मतज्जयः ब्रह्मैवधा
नरूपात्माब्रह्मैवब्रह्मणःगुणः १७ आत्मैवसर्वनित्यात्माआत्मनोन्यंनकिंचन आत्मैवसततंह्यात्माआत्मैवगुरुरात्मनः आत्मैवज्योतिरहंभूतंआ
त्मैवास्तिसदास्वयं स्वयंतत्वमसिब्रह्मस्वयंभासिप्रकाशकः १९ स्वयंजीवत्वसंशांतः स्वयमीश्वररूपवान् स्वयंब्रह्मपरंब्रह्मस्वयंकेवलमव्ययं २०
स्वयंनाशंचसिद्धांतंस्वयमात्मप्रकाशकः स्वयंप्रकाशरूपात्मास्वयमत्यंतनिर्मलं २१ स्वयमेवहिनित्यात्मास्वयंसुखप्रियाप्रियः स्वयमेवस्वयंछंदः
स्वयंदेहादिवर्जितः २२ स्वयंदोषविहीनात्मास्वयमाकाशवस्थितः अयंचेदंचनास्त्येवअयंभेदविवर्जितः २३ ब्रह्मैवचित्तवद्भातिब्रह्मैवशिववत्सदा ब्र
ह्मैववुद्धिवद्भातिब्रह्मैवशिववत्सदा २४ ब्रह्मैवक्लेशवद्भातिब्रह्मैवस्थूलवत्स्वयं ब्रह्मैवसततंनान्यत्ब्रह्मैवगुरुरात्मनः २५ आत्मज्योतिरहंभूतंअहं
नास्तिसदास्वयं स्वयमेवपरंब्रह्मस्वयमेवचिदव्ययः २६ स्वयमेवस्वयंज्योतिः स्वयंसर्वत्रभासते स्वयंब्रह्मस्वयंदेहः स्वयंपूर्णःपरंपुमान् २७ स्वयंतत्व
मसिब्रह्मस्वयंभासप्रकाशकः स्वयंजीवत्वसंशांतः स्वयमीश्वररूपवान् २८ स्वयंब्रह्मपरंब्रह्मस्वयंकेवलमव्ययः स्वयंनाशश्चसिद्धांतः स्वयमात्म
प्रकाशकः स्वयंप्रकाशरूपात्मास्वयमत्यंतनिर्मलः २९ स्वयमेवहिनित्यात्मास्वयंशत्रुप्रियाप्रियः स्वयमेवस्वयंस्वस्थःस्वयंदेहादिवर्जितः ३० स्वयं
दोषविहीनात्मास्वयमाकाशवस्थितः अखंडःपरिपूर्णोहंअखंडरसपूरणः ३१ अखंडानंदएवाहंअपरिच्छिन्नविग्रहः इतिनिश्चितपूर्णात्माब्रह्मैवन
पृथक्स्वयं ३२ अहमेवहिनित्यात्माअहमेवहिशाश्वतः अहमेवहितद्ब्रह्मब्रह्मैवाहंजगत्प्रभुः ३३ ब्रह्मैवाहंनिराभासोब्रह्मैवाहंनिरामयः ब्रह्मैवाहं
चिदाकाशोब्रह्मैवाहंनिरंतरः ३४ ब्रह्मैवाहंमहानंदोब्रह्मैवाहंसदात्मवान् ब्रह्मैवाहमनंतात्माब्रह्मैवाहंसुखंपरं ३५ ब्रह्मैवाहंमहामौनीसर्ववृत्तांत

 वर्जितः ब्रह्मैवाहमिदं मिथ्या ब्रह्मैवाहं जगन्नहि ३६ ब्रह्मैवाहं न देहोस्मि ब्रह्मैवाहं महाद्वयः ब्रह्मैव चित्तवद्भाति ब्रह्मैव शिववत्सदा ३७ ब्रह्मैव बुद्धिवद्भाति ब्रह्मै
 व जडवस्थितं ब्रह्मैवोंकारवत्सर्वं ब्रह्मैवोंकाररूपवत् ३८ ब्रह्मैव नादवद्ब्रह्म नास्ति भेदो न चाद्वयं सत्यं सत्यं पुनः सत्यं ब्रह्मणोन्यन्न किंचन ३९ ब्रह्मैव सर्वमात्मै
व ब्रह्मैव न च किंचन सर्वं मिथ्याय वचसे पंचाननाय पतये पतये वीतरागिणे चामराय सरण्याय वसामास त्रियाय च ४० पंनगाभरणायाथ संनगोध्वे निवर्तते द्दश्यत्वा
 द्दष्टवत्सदा सत्यं सत्यं न संदेहः चिन्मात्रत्वादहं सदा ब्रह्मैव शुद्धरूपत्वात् द्दग्रूपत्वात्त्वयं महत् ४२ अहमेव परं ब्रह्म अहमेव परात्परं अहमेव मनोतीतं अहमे
व जगत्परः ४३ अहमेव हि नित्यात्मा सर्वं मिथ्यास्वभावतः आनंदोहं निराधारो ब्रह्मैव न च किंचन ४४ नान्यत्किंचित् अहं ब्रह्म नान्यत्किंचिच्चिदव्ययः आत्मनो
न्यत्परं तुच्छं आत्मनोन्यदिदं नहि ४५ आत्मन्येव न भेदेहं आत्मैवाहं न मे मलं आत्मन्येवात्मना चित्तं आत्मैवाहं न तत्पृथक् ४६ आत्मैवाहमहं शून्यं आत्मैवा
हं सदा न मे आत्मैवाहं गुणो नास्ति आत्मैव न पृथक्क्वचित् ४७ अत्यंताभावमेवत्वं अत्यंताभावमीद्दशं अत्यंताभावमेवेदं अत्यंताभावमण्वपि ४८ आत्मैवा
हं परं ब्रह्म सर्वं मिथ्या जगत्त्रयं अहमेव परं ब्रह्म अहमेव परो गुरुः ४९ जीवभावं सदा सत्यं शिवसद्भावमीद्दशं विष्णुत्वभावनाभ्रांति सर्वं शशविषाणवत् ५०
अहमेव सदा पूर्णः अहमेव निरंतरं नित्यतृप्तो निराकारो ब्रह्मैवाहं न संशयः ५१ अहमेव परानंदः अहमेव सुपूर्णातिकः ५२ अहमेव त्वमेवाहं त्वं चाहं नास्ति ना
स्ति हि ५२ वाचामगोचरोहं वै वाङ्मनो नास्ति कल्पितं अहं ब्रह्मैव सर्वात्मा अहं ब्रह्मैव निर्मलः ५३ अहं ब्रह्मैव चिन्मात्र अहं ब्रह्मैव नित्यशः इदं च सर्वदा नास्ति अ
हमेव सदा स्थिरः ५४ इदं सुखमहं ब्रह्म इदं सुखमहं जडं इदं ब्रह्म न संदेहं सत्यं सत्यं पुनः पुनः ५५ इत्यात्मवैभवं प्रोक्तं सर्वलोकेषु दुर्लभं सकृच्छ्रवणमात्रेण ब्र
ह्मैव भवति स्वयं ५६ सूत उवाच शांति दांति परमा भवतांताः स्वांतभांतमनिशं शशिकांतं अंतकांतकमहो कलयंतः वेदमौलिवचनैः किल शांताः ५७ इति
श्रीशिवरहस्ये शंकराख्ये षष्ठांशे विंशोध्यायः॥२०॥ ऋभुरुवाच महारहस्यं वक्ष्यामि वेदांतेष्वपि गोपितं यस्य श्रवणमात्रेण ब्रह्मैव भवति स्वयं १ सच्चिदानं
दमात्रोहं सर्वं सच्चिन्मयं ततं तदेव ब्रह्म संपश्यन् ब्रह्मैव भवति स्वयं २ अहं ब्रह्म इदं ब्रह्म नान्यद्ब्रह्म न संशयः सत्यं ब्रह्म सदा ब्रह्म अहं ब्रह्मैव केवलं ३ गुरुर्ब्रह्म गु
णो ब्रह्मा सर्वं ब्रह्मापरोस्म्यहं नानं ब्रह्ममहं ब्रह्म शमरूपपरोस्म्यहं ४ वेदवेद्यं परं ब्रह्म विद्या ब्रह्म विशेषतः आत्मा ब्रह्म अहं ब्रह्म आद्यंतं ब्रह्म योस्म्यहं ५ सत्यं ब्रह्म स

दाब्रह्मअन्यंनास्तिसदापरं अहंब्रह्मात्वहंनास्तिअहंकारपरंनहि ६ अहंब्रह्मा इदंनास्तिअयमात्मामहान्सदा वेदांतवेद्योब्रह्मात्माअपरंशशशृंगवत् ७
भूतंनास्तिभविष्यंनब्रह्मैवस्थिरतागतः चिन्मयोहंजडंतुच्छंचिन्मात्रंदेहनाशनं ८ चित्तंकिंचित्क्वचिच्चापिचित्तदूरोहमात्मकः सत्यंज्ञानमनंतंयन्नानृतं
जडदुःखकं ९ आत्मासत्यमनंतात्मादेहमेवनसंशयः वार्त्तापिसच्छ्रुतंनैनअहमेवमहोमहः एकसंख्यापिसद्ब्रह्मसत्यमेवसदाप्यहं सर्वमेवमसत्यं
चउसनत्वात्परात्सदा ११ सर्वावयवविहीनोपिनित्यत्वात्परमोह्यहं सर्वदृश्यंनमेकिंचिच्चिन्मयत्वाद्धदाम्यहं आग्रहंचनमेकिंचित्सर्वंब्रह्मैवकेवलं इदमि
त्यपिनिर्देशोनक्वचिन्नक्वचित्सदा १३ निर्गुणंब्रह्मएवाहंसगुणोरूपदेशतः विज्ञानंसगुणंब्रह्मअहंविज्ञानविग्रहः १४ निर्गुणोस्मिनिरंशोस्मिभवोस्मिभर
णोस्म्यहं देवोस्मिइज्यमपूर्णोस्मिरूपस्थोस्मिरहितोस्म्यहं १५ रसोस्मिरसहीनोस्मितुर्योस्मिशुभभावनः कामोस्मिकार्यहीनोहंनित्यंनिर्मलविग्रहः आचा
रफलहीनोहंअहंब्रह्मास्मिकेवलं इदंसर्वपरंब्रह्मअयमात्मानविस्मयः १७ पूर्णापूर्णस्वरूपात्मानित्यंसर्वात्मविग्रहः परमानंदतत्वात्मापरिच्छिन्नंनहि
क्वचित् १८ एकात्मानिर्मलाकारःअहमेवेतिभावय अहंभावनयायुक्तःअहंभावेनसंयुतः शांतभावयसर्वात्माशाम्यसंतंमनोमलः देहोहमितिसंत्य
ज्यब्रह्माहमितिनिश्चितु २० ब्रह्मैवाहंब्रह्ममात्रंब्रह्मणोन्यंनकिंचन इदंनाहमिदंनाहमिदंनाहंसदास्मर २१ अहंसोहमहंसोहमहंब्रह्मेतिभावय चिद
हंचिदहंब्रह्मचिदहंचिदहंवद २२ नेदंनेदंसदानेदंनत्वंनाहंचभावय सर्वंब्रह्मनसंदेहःसर्वंवेदंनकिंचन २३ सर्वशब्दार्थभवनंसर्वलोकभयंनच स
र्वतीर्थंनसत्यंहिसर्वदेवालयंनहि २४ प्राकृतस्मरणंत्याज्यंब्रह्मस्मरणमाहर ततस्तदपिसंत्यज्यनिजरूपस्थिरोभव २५ स्थिररूपंपरित्यज्यआत्ममा
त्रंभवत्यसौ त्यागत्वमपिसंत्यज्यभेदमात्रंसदात्यज २६ स्वयंनिजसमाहृत्यस्वयमेवस्वयंभज इदमित्संगुलेहृष्टंइदमस्तमचेतनं २७ इदंवाक्यंचवा
क्येनवाचापिपरिवेदनं सर्वभांतंनसंदेहःसर्वंनास्तिनसंशयः २८ सर्वंतुच्छंनसंदेहःसर्वंमायानसंशयः सर्वंचित्तंनसंदेहःसर्वंब्रह्मनसंशयः २९ ब्रह्मै
वाहंनसंदेहोब्रह्मैवेदंनसंशयः ब्रह्मात्मभातिचेन्मिथ्यासर्वंमिथ्यापरावरः ३० नदेहंपंचभूतंवानचित्तंभ्रांतिमात्रकं नचबुद्धींद्रियाभावंनमुक्तिःब्र
ह्ममात्रकं निमिषंनचशंकापिनसंकल्पंनदस्तिचेत् अहंकारमसद्बुद्धिश्चअभिमानंतदस्तिचेत् ३२ नचित्तस्मरणंतच्चेत्तन्नदेहोनजरएयदि प्राणोय

शिवरहस्यष॰६ ह्रीयंतेशास्तिघ्राणोयदिदहंगंधकं ३३ चक्षुर्यदिदिहिभूतस्यश्रोत्रंचश्रवभावनं त्वगस्तिचेत्स्पर्शसत्ताजिह्वाचेद्रससंग्रहः ३४ जीवोस्तिचेज्जीवनंचपादंचेत्सारचा
रणं हस्तोयदिक्रियासत्तास्रष्टाचेत्सृष्टिसंभवः ३५ रक्ष्यंचेद्रक्षकोविष्णुःभक्ष्यंचेद्भक्षकःशिवः सर्वंब्रह्मनसंदेहःसर्वंब्रह्मैवकेवलं ३६ पूज्यंचेत्पूजनंचास्तिभास्यं
अ॰२१ चेद्भासकःशिवः सर्वंमिथ्यानसंदेहःसर्वंचिन्मात्रमेवहि ३७ अस्तिचेत्कारणंसत्यंकार्यंचैवभविष्यति नास्तिचेन्नास्तिहीनोहंब्रह्मैवाहंपरायणं ३८ अत्यंतदुः
खमेतत्स्थिअत्यंतंसुखमक्षयं अत्यंतंजन्ममात्रंचअत्यंतंरणसंभवं ३९ अत्यंतंमलिनंसर्वंअत्यंतनिर्मलंपरं अत्यंतकश्मलंदुष्टंअत्यंतंनिर्मलंत्वहं ४०
२६ अत्यंतंसर्वदादोषंअत्यंतंसर्वदागुणं अत्यंतंसर्वदाशुभ्रंअत्यंतंसर्वदामलं ४१ अत्यंतंसर्वदाचाहंअत्यंतंसर्वदाइदं अत्यंतंसर्वदाब्रह्मअत्यंतंसर्वदाजगत् ४२
येतावदुक्तमभयंद्वयभेदंनकिंचन सदसद्वापिनास्त्येवसदसद्वापिवाकथं ४३ नास्तिनास्तिनसंदेहोब्रह्मैवाहंनसंशयः कारणंकार्यरूपीवासर्वंनास्तिन
संशयः ४४ कर्त्ताभोक्ताक्रियावापिनभोज्यंभोगतृप्तता सर्वंब्रह्मनसंदेहःसर्वंशब्दोनवास्तवं ४५ भूतंभविष्यंवानंतुकार्यंवानास्तिसर्वदा सदसद्भेदभेदंवा
नगुणागुणभागिनः निर्मलंवामलंवापिनास्तिनास्तिनकिंचन भाष्यंवाभाषणंवापिनास्तिनास्तिनकिंचन ४७ प्रबलंदुर्बलंवापिअहंचलंचवाक्कचित् ग्राह्यमग्रा
ह्यकंवापिउपेक्ष्यंनात्मनःक्वचित् ४८ तीर्थंवास्नानरूपंवादेवंवादेवपूजनं जन्मवामरणंहेतुर्नास्तिनास्तिनकिंचन ४९ सत्यंवासत्यरूपंवानास्तिनास्तिनकिं
चन भाष्यंवाभाषणंवापिनास्तिनास्तिनकिंचन ५० मातावापितरोवापिदेहोवानास्तिकिंचन दृग्रूपंदृश्यरूपंचानास्तिनास्तिनकिंचन ५१ मायाकार्यंचमाया
वानास्तिनास्तिनकिंचन ज्ञानंवाज्ञानभेदंवानास्तिनास्तिनकिंचन ५२ सर्वप्रपंचहेयत्वंप्रोक्तंप्रकरणंत्वते यःशृणोतिसकृद्वापिआत्माकारंप्रपद्यते ५३ स्कंदउवाच
मायासात्रिगुणागणाधिपगुरोरेणांकचूडामणेःपादांभोजसमर्चनेनविलयंयात्येवनान्यथा विद्याहृद्यतमासुविद्युदिवसाभात्येवहृत्पंकजेयस्यानल्पत
पोभिरुग्रकरुणाहृत्कृतस्यमुक्तिस्थिता ५४ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेऋभुनिदाघसंवादेएकविंशोध्यायः॥२१॥ ऋभुरुवाच वक्ष्येब्रह्ममयंसर्वंना
स्तिसर्वंजगन्मृषा अहंब्रह्मनमेचिंताअहंब्रह्मनमेजडं १ अहंब्रह्मनमेदोषोअहंब्रह्मनमेफलं अहंब्रह्मनमेवार्त्ताअहंब्रह्मनमेद्वयं २ अहंब्रह्मनमेनित्यं
अहंब्रह्मनमेगतिः अहंब्रह्मनमेमाताअहंब्रह्मनमेपिता ३ अहंब्रह्मनमेकिंचिदहंब्रह्मनमेमही अहंब्रह्मनमेसोयंअहंवैश्वानरोनहि ४ अहंब्रह्मचिदाकाशं

अहंब्रह्मनसंशयः अहंब्रह्मनसंदेहोअहमेवपरायणं ५ अहमेवसदाब्रह्मअहमेवपरात्परः सिस्थचैतन्यमेवाहंशुस्थब्रह्मनसंशयः ६ सर्वांतरोहंपूर्णात्मास
र्वांतरमनोंतरं अहमेवशरीरांतरहमेवस्थिरःसदा एवंविज्ञानवान्मुक्तोएवमोक्षंसुदुर्ल्लभं अनेकशतसंस्रेषुएकएवविवेकवान् ८ तस्यदर्शनमात्रेणपितरस्तृ
प्तिमागताः ज्ञानिनोदर्शनंपुण्यंसर्वतीर्थावगाहनं ९ ज्ञानिनंचार्चनेनैवंजीवन्मुक्तोभवेन्नरः ज्ञानिनोभोजनेदानेसद्योमोक्षोभवेत्परः १० अहंब्रह्मनसंदेहो
अहमेवगुरुःपरः अहंशांतोस्मिशुस्थोस्मिअहमेवगुणांतरः ११ गुणातीतोजनातीतोपरातीतोमनःपरः परतःपरतोतीतःबुध्याधीसोनसात्परः १२ भानातीतो
मुनातीतोवेदातीतोविदःपरः शरीरादेश्चपरतःजाग्रत्स्वप्नसुषुप्तितः १३ अव्यक्तात्परतोतीतःइत्येवंज्ञाननिश्चयः कचिदेतत्परित्यज्यसर्वंसंत्यज्यमूकवत् १४
तूष्णींब्रह्मपरंब्रह्मशाश्वतंब्रह्मवान्स्वयं ज्ञानिनोमहिमाकिंचिदणुमात्रमपिस्फुटं १५ हरिणापिहरेणापिब्रह्मणापिसुरैरपि नशक्यतेवर्णयितुंकल्पको
टिशतैरपि १६ अहंब्रह्मेतिहिज्ञानंत्रिषुलोकेषुदुर्ल्लभं विवेकिनंमहात्मानंब्रह्ममात्रेणवस्थितं १७ द्रष्टुंचभाषितुंवापिदुर्लभंपादसेवनं कदाचित्पादतीर्थे
नस्नातश्चेद्ब्रह्मएवसः १८ सर्वंमिथ्यानसंदेहोसर्वंब्रह्मैवकेवलं एतत्प्रकरणंप्रोक्तंसर्वसिध्दांतसंग्रहः १९ दुर्लभंयःपठेत्भक्त्याश्रवणाद्ब्रह्मसंपद्यतेनरः
वक्ष्येब्रह्ममयंसर्वंनान्यत्सर्वंजगन्मृषा २० ब्रह्मैवजगदाकारंब्रह्मैवपरमापदं अहमेतद्ब्रह्मअहमहमित्यपिवर्जितः २१ सर्ववर्जितचिन्मात्रसर्ववर्जितचेतनः
सर्ववर्जितशांतात्मासर्वमंगलविग्रहः अहंब्रह्मपरंब्रह्मअसंनेदंनमेनमे नमेभूतंभविष्यंचनमेवर्णनसंशयः २३ ब्रह्मैवाहंनमेतुच्छंअहंब्रह्मपरंतपः ब्रह्मरूप
मिदंसर्वंब्रह्मरूपमनामयं २४ ब्रह्मैवभातिभेदेनब्रह्मैवनपरःपरः आत्मैवद्वैतवद्भातिआत्मैवपरमंपदं २५ ब्रह्मैवभेदरहितोभेदमेवमहद्भयं आत्मैवाहं
निर्मलोहंआत्मैवभुवनत्रयं २६ आत्मैवनान्यत्सर्वत्रसर्वंब्रह्मैवनायकः अहमेवसदाभातिब्रह्मैवास्मिपरोस्म्यहं २७ निश्चयोस्तिपरंब्रह्मसत्योस्मिसकलो
स्म्यहं अक्षरोस्मिपरंब्रह्मशिवोस्मिशिखरोस्म्यहं २८ निश्चयोस्तिपरंब्रह्मसत्योस्मिसकलोस्म्यहं अक्षरोस्मिपरंब्रह्मशिवोस्मिशिखरोस्म्यहं २९ निर्मलो
स्मिपरंब्रह्मकार्याकार्यविवर्जितः सदाशुध्दैकरूपोस्मिसदाचैतन्यमात्रकः ३० सदासमानरूपोस्मिसदासत्ताप्रकाशकः सदासिध्दांतशुध्दोस्मिसदापावनमंगलः ३१
एवंनिश्चितवान्मुक्तःएवंनित्यपरोवरः एवंभावनयायुक्तःपरंब्रह्मैवसर्वदा ३२ एवंब्रह्मात्मवान्ज्ञानीब्रह्माहमितिनिश्चयः सएवपुरुषोलोकेब्रह्माहमितिनिश्चितः ३३

सएवपुरुषोज्ञानीजीवन्मुक्तःसआत्मवान् ब्रह्मैवाहंमहानात्मासच्चिदानंदविग्रहः ३४ नाहंजीवोनमेदेहोनाहंचिंतानमेमनः नाहंमां
संनमेस्थीनिनाहंकारकलेवरः ३५ नप्रमातानमेयंवानाहंसर्वपरोस्म्यहं सर्वदाब्रह्ममात्रोहंनरसोहंसदाशिवः नप्राणोहंनगंधोहंनचिन्हो
यंनमेप्रियः नाहंजीवोरसोनाहंवरुणोनचगोलकः ३७ ब्रह्मैवाहंनसंदेहोनामरूपंनकिंचन श्रोत्राहंनशब्दोहंनदिशोहंनसाक्षिकः ३८
नाहंनत्वंनचस्वर्गोनाहंवायुर्नसाक्षिकः वायुर्नाहंविसर्गोननमृत्युर्नचसाक्षिकः ३९ गुह्यंनाहंनचानंदोनप्रजापतिर्देवता सर्वंमिथ्या
नसंदेहःसर्वंब्रह्मैवकेवलं ४० नाहंमनोनसंकल्पोनचंद्रोनचसाक्षिकः वायुर्नाहंविसर्गोननमृत्युर्नचसाक्षिकः ४१ गुह्यंनाहंनचा
नंदोनप्रजापतिर्देवता सर्वंब्रह्मै० ४२ नाहंमनोनसंकल्पोनचचंद्रोनसाक्षिकः सर्वंब्रह्मै० ४३ नाहंबुध्यींद्रियोब्रह्मानाहंनिश्चयरूपवान् सर्वंब्रह्मै० ४४
नाहंकारमहंरुद्रोनाभिमानोनसाक्षिकः सर्वंब्रह्मैवनान्योस्तिसर्वंब्रह्मै० ४५ चित्तंनाहंवासुदेवोधारणानायमीश्वरः नाहंविश्वोनजागद्वास्थूलदेहोनमे
क्वचित् ४६ नप्रातिवाहकोजीवोनचाहंमावहारिकः नपारमार्थिकोदेवोनाहमन्नमयोजडः ४७ नप्राणमयकोशोहंनमनोमयकोशवान् नविज्ञा
नमयःकोशोनानंदमयकोशवान् ब्रह्मैवाहंनसंदेहोनामरूपंनकिंचन एतावदुक्त्वासकलंनामरूपद्वयात्मकं ४९ सर्वंक्षणेनविस्मृत्यकाष्ठलो
ष्ठादिवत्त्यज एतत्सर्वमसन्नित्यंसदावंध्याकुमारवत् ५० शशशृंगवदेवेदंनरशृंगवदेवतत् आकाशपुष्पसदृशंयथामरुमरीचिका ५१ गंधर्वन
गरंयद्वत्इंद्रजालवदेवहि असत्यमेवसततंप्रपंचरूपकमिष्यते ५२ शिष्योपदेशकालेपिद्वैतंनपरमार्थतः मातामृतेरोदनायद्रव्यंदत्वाह्व
येज्जनान् ५३ तेषांरोदनमाभंयतकेवलंद्रव्यपंचकं तदद्वैतंमयाप्रोक्तंसर्वंविस्मृत्यकुड्यवत् ५४ अहंब्रह्मेतिनिश्चित्यअहमेवेतिभावय
अहमेवसुखंचेतिअहमेवनचापरः ५५ अहंचिन्मात्रमेवेतिब्रह्मैवेतिविनिश्चिनु अहंनिर्मलशुद्धेतिअहंजीवविलक्षणः ५६ अहंब्रह्मैवस
र्वात्माअहमित्यवभासकः अहमेवहिचिन्मात्रअहमेवहिनिर्गुणः ५७ सर्वांतर्याम्यहंब्रह्मचिन्मात्रोहंसदाशिवः नित्यमंगलरूपात्मानित्यमो
क्षमयःपुमान् ५८ एवंनिश्चित्यसततंस्वात्मानंस्वयमास्थितः ब्रह्मैवाहंनसंदेहोनामरूपंनकिंचन ५९ एतद्रूपप्रकरणंसर्ववेदेषुदुर्लभं यःशृणो

तिसदामुक्तोब्रह्मैवभवतिस्वयं ६० तंवेदादिवचोभिरीडितमहायागैश्चयोगैर्व्रतैर्दानैश्चानशनैर्यमादिनियमैःतंवेद्विश्वंतेद्विजाः तस्मानंगरिपोर

तीवसुमहाहृद्यंहिलिंगार्चनंतेनैवाशुविनाश्यमोहमखिलंज्ञानंददातीश्वरः ६१ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेद्वाविंशोध्यायः २२ ऋभुरुवाच निदाघशृ

णुवक्ष्यामिसर्वलोकेषुदुर्लभं इदंब्रह्मपरंब्रह्मसच्चिदानंदएवहि १ नानाविधंजनंलोकंनानाकारणकारणं ब्रह्मैवान्यदसत्सर्वंसच्चिदानंदएवहि २ अहंब्रह्म

सदाब्रह्मअस्मिब्रह्माहमेवहि कालोब्रह्मक्षणंब्रह्मअहंब्रह्मनसंशयः ३ हंसोब्रह्महरिर्ब्रह्मशिवोब्रह्मचिदव्ययः सर्वोपनिषदोब्रह्मसाम्यंब्रह्मसमोस्म्यहं॥

अजोब्रह्मरसंब्रह्मवियद्ब्रह्मपरात्परः ४ वेदोब्रह्मपरोब्रह्मसत्यंब्रह्मपरात्परः तुर्यंब्रह्ममनोब्रह्मगुरुशिष्यंब्रह्मसदामुदः ५ इदंब्रह्मपरंब्रह्मतत्त्वंब्रह्मजयःसर्व

अकारंब्रह्मएवाहंउकारोहंनसंशयः ६ मकारंब्रह्ममात्रोहंमंत्रंब्रह्ममनुःपरः शिकारंब्रह्ममात्रोहंवकारंब्रह्मकेवलं ७ यकारंब्रह्मनित्यंचपंचाक्षरमहंपरं॥

रेचकंब्रह्मसद्ब्रह्मपूरकंब्रह्मसर्वतः ८ कुंभकंब्रह्मसर्वोहंपूरकंब्रह्मसर्वतः ब्रह्मैवनान्यतत्सर्वंसच्चिदानंदएवहि ९ कालातीतंसुखातीतंसर्वातीतमतीतकं

नित्यातीतमतीतानांअतीतंब्रह्मकेवलं १० ब्रह्मैवनान्यद्यत्सर्वंसच्चिदानंदमात्रकं द्वैतसत्यत्वदृष्टिश्चेद्द्वैतबुध्यानतस्मर ११ सर्वंब्रह्मैवनान्योस्तिसर्वंब्रह्मैव

केवलं बुध्यातीतंमनोतीतंवेदातीतमतःपरं आत्मातीतंजनातीतंजीवातीतंचनिर्गुणं काष्ठातीतंकलातीतंकनास्यातीतंपरंसुखं १३ ब्रह्ममात्रेणसंपश्यन्

ब्रह्ममात्रपरोभव ब्रह्ममात्रपरोनित्यंचिन्मात्रोहंनसंशयः १४ ज्योतिरानंदमात्रोहंविज्ञानंदानमात्रकं शून्यानंदात्ममात्रोहंचिन्मात्रोहमितिस्मर १५ सत्तामात्रो

हमेवात्रसदाकालगुणांतरः नित्यसन्मात्ररूपोहंशुद्धानंदात्ममात्रकं १६ प्रपंचहीनरूपोहंसच्चिदानंदमात्रकः निश्चयानंदमात्रोहंकेवलानंदमात्रकः १७

परमानंदमात्रोहंपूर्णानंदोहमेवहि द्वैतस्यमात्रसित्थोयंसाम्राज्यपदलक्षणं १८ इत्येवंनिश्चयंकुर्वन्सदात्रिषुयथासुखं दृश्यनिश्चयरूपात्माद्दृढनिश्चयंजी

वात्मावाक्यज्ञानस्यनिश्चयः दृढनिश्चयमेवात्रकारणंमोक्षसंपदं २१ एवमेवसदाकार्यंब्रह्मैवाहमितिस्थिरं ब्रह्मैवाहंनसंदेहःसच्चिदानंदमेवहि २२ आत्मानंदस्व

रूपोहंनान्यदस्तीतिभावय ततस्तदपिसंत्यज्यआनंदात्मानमाश्रय २३ ततस्तदपिसंत्यज्यएकएवस्थिरोभव ततस्तदपिसंत्यज्यनिर्गुणोभवसर्वदा २४ निर्गुण

त्वंचसंत्यज्यवाचातीतोभवेत्ततः वाचातीतश्चसंत्यज्यचिन्मात्रत्वपरोभव २५ आत्मातीतंचसंत्यज्यब्रह्ममात्रपरोभव चिन्मात्रत्वंचसंत्यज्यसर्वंतूष्णींपरोभव २६ सर्वं

 तूष्णींचसंत्यज्यमहातूष्णींपरोभव महातूष्णींचसंत्यज्यचित्ततूष्णींसमाश्रय २७ चित्ततूष्णींचसंत्यज्यजीवतूष्णींसमाहर जीवतूष्णींपरित्यज्यजीवशून्यपरोभव
२८ शून्यत्यागंपरित्यज्ययथातिष्ठतथासिभो तिष्ठत्वमपिसंत्यज्यअवाङ्मनसगोचरः २९ ततःपरंनवक्तव्यंततःपश्चान्नकिंचनः नोचेत्सर्वपरित्यागोब्रह्मैवाहमि
 तीरय ३० सदासमरस्सदाचिंत्यसदाभावयनिर्गुणं सदातिष्ठस्वतत्वज्ञसदाज्ञानीसदापरः ३१ सदानंदस्सदातीतःसदादोषविवर्जितः सदाशांतःसदातृप्तःसदा
ज्योतिःसदारसः ३२ सदानित्यःसदाशुद्धःसदाबुद्धःसदालयः सदाब्रह्मसदामोदःसदानंदःसदापरः ३३ सदास्वयंसदाशून्यःसदामौनीसदाशिवः सदास
 र्वंसदामित्रःसदास्नानःसदाजपः ३४ सदासर्वंचविस्मृत्यसदामानंपरित्यज देहाभिमानंसंत्यज्यचित्तसत्तांपरित्यज ३५ आत्मैवाहंस्वयंचाहंइत्येवंसर्वदाभव
एवंस्थितस्त्वंमुक्तोसिनतुकार्याविचारणा ३६ ब्रह्मैवसर्वंयत्किंचित्सच्चिदानंदएवहि अहंब्रह्मइदंब्रह्मत्वंब्रह्मासिनिरंतरं ३७ प्रज्ञानंब्रह्मएवास्मितंब्रह्मासि
नसंशयः दृढनिश्चयमेवंत्वंकुरुकल्याणआत्मनः ३८ मनसोभूषणंब्रह्ममनसोभूषणंपरः मनसोभूषणंकर्ताब्रह्मैवाहमवेक्षत ३९ ब्रह्मैवसच्चिदानंद
सच्चिदानंदविग्रहः सच्चिदानंदमखिलंसच्चिदानंदएवहि ४० सच्चिदानंदजीवात्मासच्चिदानंदविग्रहः सच्चिदानंदमखिलंसच्चिदानंदएवहि ४१ स
च्चिदानंदजीवात्मासच्चिदानंदविग्रहः सच्चिदानंदमद्वैतंसच्चिदानंदशंकरः ४२ सच्चिदानंदविज्ञानंसच्चिदानंदभोजनः सच्चिदानंदपूर्णात्मासच्चिदानंद
कारणः ४३ सच्चिदानंदलीलात्मासच्चिदानंदनिर्मलः सच्चिदानंदलीलात्मासच्चिदानंदसेवधी ४४ सच्चिदानंदसर्वांगसच्चिदानंदचंदनः सच्चिदानंद
सिद्धांतोसच्चिदानंदवेदकः ४५ सच्चिदानंदशास्त्रार्थोसच्चिदानंदवाचकः सच्चिदानंदहोमश्चसच्चिदानंदराज्यकः ४६ सच्चिदानंदपूर्णात्मासच्चिदानं
दपूर्णकः सर्वंहिसच्चिदानंदंमूढेषुपठितंत्वयत ४७ गुह्यंमूढेषुयद्दत्तंसुवर्त्मार्गचारिणां विषयासक्तचित्तेषुनसंभाष्याविवेकिनां ४८ सकृच्छ्रवणमात्रे
णब्रह्मैवभवतिस्वयं इच्छाचेद्यदिनारीणांमुखंब्राह्मणएवहि ४९ सर्वंचैतन्यमात्रत्वात्स्त्रीभेदंचनविद्यते वेदशास्त्रेणयुक्तोपिज्ञानाभावाद्द्विजोद्विज ५० ब्र
ह्मैवतंतुनातेनवेधास्तेमुक्तचिंतकाः सर्वमुक्तंभगवतारहस्यंशंकरेणहि ५१ सोमापीडपदांबुजार्चनफलैःभुक्त्यैकवन्मानसंनान्यद्योगपथ्याश्रुतिश्रवणतः
किंकर्मभिर्भूतये युक्त्याशिक्षितमानसानुभवतोप्यात्माप्यसंगोवचांकिंग्राह्योभवतींद्रियार्थरहितानंदैकसांद्रःशिवः ५२ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेत्र 
योविंशोध्यायः २३

ऋभुरुवाच पुनःपुनःपुरंवक्ष्येआत्मनोन्यदसत्ततः असतोवचनंनास्तिसतोनास्तिसदास्थिते १ ब्रह्माभ्यासरहस्यंचवक्ष्येनिर्णयमात्मनः तस्या
पिसक्रदेवाहंशिवंमंगलपूर्वकं २ सर्वंब्रह्माहमेवापिचिन्मात्रोनास्तिकिंचन अहमेवपरंब्रह्म अहमेवचिदात्मकः ३ अहंममेतिनास्त्येव अहंज्ञा
नीतिवाचन शुद्धोहंब्रह्मरूपोहंआनंदोहमजोमरः ४ देवोहंदिव्यभानोहंतुर्योहंभवभाव्यहं अंडजोहमशेषोहंअंतरांतरोस्म्यहं ५ अमलोहम
जस्त्रोहंअत्यंतपरमोस्म्यहं शांताशांतविहीनोहंआत्मानात्मविवर्जितः ६ लब्धालब्धादिहीनोहंज्ञानाज्ञानरसोस्म्यहं ८ परापरस्वरूपोहंनित्यानि
त्यरसोस्म्यहं इत्यादिवाक्यमुक्तोहंसर्ववर्जितदुर्जयः ९ निरंतरोहंभूतोहंभव्योहंभयवर्जितः लक्ष्यलक्षणहीनोयंकार्यहीनोहमाशुगः १०
व्योमादिरूपहीनोहंव्योमरूपोहमच्युतः अंतरांतरभावोहंअंतरांतरवर्जितः ११ सर्वसिद्धांतरूपोहंसर्वदोषविवर्जितः सन्मयानंदमात्रोहं
अखंडैकरसोवरं १२ भयःशांतःसदासोहंअसंसोहंमहानसंत्यक्तोहंदेवहीनोहंचित्तसंसारवर्जितः १३ महानहंवरिष्ठोहंसारासारविवर्जितः
नकदाचनमुक्तोहंनवद्धोहंकदाचन १४ एवमेवसदाकृत्वाब्रह्मैवाहमितिस्मर एतावदेवमात्रंतुमुक्तोभवतिनिश्चयः १५ चिन्मात्रोहंशिवोहं
वैशुभमात्रमहंसदा सदाकारोहमुक्तोहंसदावाचामगोचरः १५ सर्वदापरिपूर्णोहंवेदोपाधिविवर्जितः चित्तकार्यविहीनोहंचित्तमस्तीतिमे
नहि १६ यत्किंचिदपिनास्त्येवनास्त्येवप्रियभाषणं आत्मप्रियमनात्मेहिइदमेवस्तुतोनहि १७ इदंदुःखमिदंसौख्यमिदंभातिमहंनहि सर्ववर्जि
तद्रूपोहंसर्ववर्जितचेतनः १८ अनिर्वाच्यमनिर्वाच्यपरंब्रह्मरसोस्म्यहं अहंब्रह्मनसंदेहोअहमेवपरात्परः १९ अहंचैतन्यभूतात्मादेहोनास्ति
कदाचन लिंगदेहंचनास्त्येवकारणंदेहमेवन २० अहंत्वत्वापरंचाहंअहंब्रह्मस्वरूपतः कामादिवर्जितोतीतःकालभेदपरात्परः २१ ब्रह्मैवे
दंनसंदेहोनाहंभावंनचानहि सर्वसंशयसंशांतोब्रह्मैवाहमितिस्थितिः २२ निश्चयंनचमेकिंचित्चिन्ताभावात्सदात्परः चिदहंचिदहंब्रह्मापि
दहंचिदहंसदा २३ एवंभावनयायुक्तःत्यक्तशंकःसुखीभव सर्वसंगंपरित्यज्यआत्मैकत्वंभवानहं २४ संगंनामप्रवक्ष्येहंब्रह्माहमितिनिश्च
यो सत्योहंपरमात्माहंस्वयमेवस्वयंस्वयं २५ नाहंदेहोनचप्राणोनद्वंद्वोनचनिर्मलः एवएवहिसत्संगएषएवहिनिर्मलः महत्संगोमहद्ब्रह्म

 भावनंपरमंपदं अहंशांतप्रभावोहंअहंब्रह्मनसंशयः अहंत्यक्तस्वरूपोहं अहंचिंतादिवर्जितः एषएवहिसत्संगएषनित्यभवानहं २८ सर्वसंक
 ल्पहीनोहंसर्ववृत्तिविवर्जितः अमृतोहमजोनित्यमृतिभूतिरतीतकः २९ सर्वकल्याणरूपोहंसवेदाप्रियरूपवान् समलागमलातीतःसर्व
दाहंसदानुगः ३० अहंपरिछिन्नसन्मात्रसत्यज्ञानस्वरूपवान् नादांतरोहंनादोहंनामरूपविवर्जितः ३१ अत्यंतभिन्नहीनोहंआदिमध्यांतवर्जि
 तः एवंनित्यदृढाभ्यासोएवंस्वानुभवेनच ३२ एवमेवहिनित्यात्माभावेनचसुखीभव एवमात्मासुखंप्राप्तोपुनर्जन्मनसंभवेत् ३३ सद्योमुक्तो
भवेद्ब्रह्माकारेणपरितिष्ठति आत्माकारमिदंविश्वमात्माकारमहंमहत् ३४ आत्मैवनान्यद्भूतंवा आत्मैवमनएवहि आत्मैवचित्तवद्भातिआ
त्मैवस्मृतिवत्क्वचित् ३५ आत्मैववृत्तिवद्भातिआत्मैवक्रोधवत्सदा आत्मैवश्रवणंतद्वत्आत्मैवमननंचतत् ३६ आत्मैवोपक्रमंनित्यउप
संहारमात्मवत् आत्मैवाभ्यासवन्नित्यंआत्मैवापूर्वताफलं ३७ अर्थवादवत्तात्माहिपरमात्मोपपत्तिहि इच्छाप्रारब्धवद्ब्रह्माइच्छाप्रारब्ध
वत्परः ३८ परेच्छाप्रारब्धवद्ब्रह्माइच्छासक्तिश्चिदेवहि अनिच्छाशक्तिरात्मैवपरेच्छाशक्तिरव्ययः ३९ परमात्मैवाधिकारीविषयंपरमात्मनः
संबंधंपरमात्मैवप्रयोजनपरात्मकः ४० ब्रह्मैवसहजंसंगंकर्मजंब्रह्मसंगमं ब्रह्मैवभ्रांतिजंभ्रांतिद्वंद्वंब्रह्मैवनान्यतः ४१ सर्वंब्रह्मैतिनिश्चि
त्यसद्यएवविमोक्ष्यसे सविकल्पसमाधिस्थनिर्विकल्पसमाधिहि ४२ शब्दानुविद्धंब्रह्मैवब्रह्मदृश्यानुविद्धकं ब्रह्मैवादिसमाधिश्चतन्मध्यम
साधिकं ४३ ब्रह्मैवनिश्चयंशून्यंतदुत्तमसमाधिकं देहाभिमानंगणितंतद्वैराग्यसमाधिकं एतद्भावनमाशांतंजीवन्मुक्तिसमाधिकः असंत
सर्वशांतंत्वंदेहोमुक्तिसमाधिकं ४५ एतदभ्यासिनाप्रोक्तंसर्वंचैतत्समन्वितं सर्वंविस्मृत्यविस्मृत्यत्यक्त्वात्यक्त्वापुनःपुनः ४६ सर्ववृत्तिवि
शून्येनस्थास्यामीतिविमुच्यहिनस्थास्यामीतिविस्मृत्यस्थास्यामीतिचविस्मरः ४७ चैतन्योहमितित्यक्त्वासन्मात्रोहमितित्यज त्यजनंचपरित्य
ज्यभावनंचपरित्यज्य ४८ सर्वंत्यक्त्वामनःक्षिप्रंस्मरणंचपरित्यज्य स्मरणंकिंचिदेवात्रमहद्दुःखंभवेत्तदा ४९ महादोषंभवंबंधंचित्तजन्मश
तंमनः प्रारब्धंहृदयंग्रंथिब्रह्महत्यादिपातकं ५० स्मरणंचैवमेवेहंबंधमोक्षस्यकारणं वाह्यांतर्भेदभावेनब्रह्माकारेणनिर्णयः ५१ सर्वमुक्तंम 

गवत्तावलयंनास्तिकिंचन ब्रह्मैवसर्वंसततंनास्तिसंदेहकारणं ५२ अहंब्रह्मप्रकरणंसर्वदुःखविनाशकं सर्वप्रपंचोपशमंसद्योमोक्षप्रदंसदा ५३
एतच्छ्रवणमात्रेणब्रह्मैवभवतिस्वयं भक्त्यापद्मदलाक्षपूजितपदध्यानानुवृत्त्यामनःस्रोतानंतपथप्रचारविधुरंमुक्तेर्भवेन्मानसं संकल्पोज्झि
तमेतदल्पसुमहाशिलेभवांभोनिधौकश्चिस्यात्शिवभक्तधुर्यसुमहाशांतःशिवप्रेमतः ५४ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेचतुर्विंशोध्यायः २४
ऋभुरुवाच वक्ष्येप्रसिद्धमात्मानंसर्वलोकप्रकाशकं सर्वाकारंसदासिद्धंसर्वत्रनिबिडंमहत् १ तद्ब्रह्माहंनसंदेहः इतिनिश्चित्यतिष्ठभो चिदेवा
हंचिदेवेदंचित्तंचिदहमेवहि २ वाचावधिश्चदेवोहंचिदेवमनसःपरः चिदेवाहंपरंब्रह्मचिदेवसकलंपदं ३ स्थूलदेहंचिदेवाहंसूक्ष्मदेहंचिदेवहि
चिदेवकरणंसोहंकार्यमेवचिदेवहि ४ अखंडाकारवृत्तिश्चउत्तमाधममध्यमाः देहहीनःचिदेवाहंसूक्ष्मदेहंचिदेवहि ५ चिदेवकरणंसोहंबुद्धिहीन
श्चिदेवहि अस्तिब्रह्मैवमत्स्येवनास्तिब्रह्मेतिनास्तिहि ७ अस्तिनास्तीतिनास्त्येवअहमेवचिदेवहि सर्वनास्त्येवनास्त्येवसाकारंनास्तिनास्तिहि ८
यत्किंचिदपिनास्त्येवअहमेवचिदेवहि अन्वयव्यतिरेकंचआदिमध्यांतदूषणं ९ सर्वचिन्मात्ररूपत्वादहमेवचिदेवहि सर्वापरंचसदसत्कार्यका
रणकर्तृकं १० सर्वनास्त्येवनास्त्येवअहमेवहिकेवलं अशुद्धशुद्धमद्वैतंद्वैतमेकमनेककं ११ सर्वनास्त्येवनास्त्येवअहंब्रह्मैवकेवलं असत्यं
सत्यमद्वैतंद्वंद्वंचपरतःपरं १२ भूतंभविष्यवर्त्तंचमोहामोहौसमासमौ सर्वनास्त्येवनास्त्येवअहं० १३ क्षणंलवंत्रुटिब्रह्मत्वंपदंतत्पदंतथा त्वंप
दंतत्पदंवापिऐक्यंचह्यहमेवहि सर्वनास्त्ये० १४ आनंदंपरमानंदंसर्वानंदंनिजंमहत् सर्वनास्त्ये० १५ अहंब्रह्मइदंब्रह्मकंब्रह्माअक्षरंपरं सर्व
नास्त्ये० १७ विष्णुरेवपरंब्रह्मशिवोब्रह्माहमेवहि सर्वनास्त्ये० १८ श्रोत्रंब्रह्मपदंशब्दंशब्दब्रह्मपदंशुभं सर्वनास्त्ये० १९ स्पर्शंब्रह्मपदंत्वंचत्वंचब्रह्मपरः
स्परं० १९ सर्वनास्त्येवनास्त्येवअहंब्रह्मैवकेवलं परंरूपंचचक्षुर्भिःएवतत्रैवयोजयता सर्वनास्त्ये० २० ब्रह्मैवसर्वंसततंसच्चिदानंदमात्रकं सर्वनास्त्ये० २१
चिन्मयानंदमात्रोहमिदंविश्वमहंसदा सर्वंब्रह्मैवसकलंसर्वना० २२ ब्रह्मैवसर्वंयत्किंचिन्नद्ब्रह्माहंनसंशयः सर्वना० २३ चिन्मयानंदमात्रोहमिदंवि
श्वमहंसदा सर्वंब्रह्मैवसकलंसर्वना० २४ ब्रह्मैवसर्वंयत्किंचितद्ब्रह्माहंनसंशयः सर्वना० २५ वाचायत्प्रोच्यतेनाममनसामनुतेतुयत् सर्वना० २६

शिवरहस्य ६ कारणेकल्पितेयद्यत्तूष्णींवास्थीयतेसदा शरीरेणनुयद्दुक्तेंइंद्रियैर्यस्तुभाषते २७ सर्वना० वेदेयत्कर्मवेदोक्तशास्त्रेशास्त्रोक्तनिर्णयं २८ गुरूपदेश
अ०२५ सिद्धांतंशुध्धाशुध्धविभासकं कामादिकलनंकर्मदेवादिकलनेश्वथकं २९ जीवन्मुक्तेतिकलनंविदेहान्मुक्तिकल्पनं ब्रह्ममित्येवसंकल्पब्रह्मवि
द्दरकल्पनं ३० वरीयानितिसंकल्पंवरिष्ठइतिकल्पनं ब्रह्माहमितिसंकल्पंचिदहंचेतिकल्पनं ३१ महाविद्येतिसंकल्पंमहामायेतिकल्पनं महाशू
३० न्येतिसंकल्पंमहाचिन्तेतिकल्पनं ३२ महालोकेमहाचिन्तेमहासत्येतिकल्पनं महारूपेतिसंकल्पंमहारूपंचकल्पनं ३३ सर्वसंकल्पकंचित्तंसर्व
संकल्पसन्मनः सर्वनास्त्येवनास्त्येवसर्वंब्रह्मैवकेवलं ३४ सर्वंद्वैतमनोरूपंसर्वंदुःखमजोमयं चिदेवाहंनसंदेहंचिदेवेदंजगत्त्रयं ३५ यत्किंचिद्भा
षणंवापियत्किंचिन्मनसाजयं यत्किंचिन्मानसंकर्मसर्वं० ३६ सर्वनास्तीतिसन्मंत्रंजीवंब्रह्मस्वरूपकं ब्रह्मैवसर्वमित्येवंमंत्रंचैवोत्तमोत्तमं ३७
अनुक्तमंत्रसन्मंत्रवागशून्यंपरंमहत् सर्वंब्रह्मेतिसंकल्पंतदेवपरमंपदं ३८ सर्वंब्रह्मेतिसंकल्पंमहादेवेतिकीर्तितं सर्वंब्रह्मेतिसंकल्पंशिव
पूजासमंमहत् सर्वंब्रह्मेतिसंकल्पंतदेवपरमंपदं सर्वंब्रह्मेत्यनुभवंसर्वाकारंचसंशयः ४० सर्वंब्रह्मेतिसंकल्पंसर्वकल्याणवर्धनं सर्वंब्रह्मेति
संकल्पंसर्वदुःखविनाशनं ४१ सर्वंब्रह्मेत्यनुभवंभावाभावविनाशनं सर्वंब्रह्मेतिसंकल्पंमहादेवसनिश्चयः ४२ सर्वंब्रह्मेतिसंकल्पंकालसत्तावि
निर्मुक्तः सर्वंब्रह्मेतिसंकल्पंमहादेवसनिश्चयः ४३ सर्वबुध्धिविनिर्मुक्तःसर्वंब्रह्मैवकेवलं सर्वाहंब्रह्ममात्रैवसर्वंब्रह्मैवकेवलं ४४ इदमित्ये
वसर्वंयत्तद्ब्रह्माहंनसंशयः भ्रांतिश्चनरकंदुःखंस्वर्गंभ्रांतिरितीरिता ४५ ब्रह्माविष्णुरितिभ्रांतिः भ्रांतिश्चशिवरूपकं विराट्स्वराट्तथासम्राट्
सूत्रात्मभ्रांतिरेवच ४६ देवाश्चदेवकार्याणिसूर्याचंद्रमसोगतिः मुनयोमनवःसिद्धाः भ्रांतिरेवनसंशयः ४७ सर्वेदेवासुराभ्रांतिःतेषांयुध्धादि
जन्मच विष्णोर्जन्मावताराणिचरितंभ्रांतिरेवहि ४८ ब्रह्मणःसृष्टिरूपाणिरुद्रस्यचरितानिच सर्वभ्रांतिसमायुक्तंभ्रांत्यालोकाश्चतुर्दश ४९
वर्णाश्रमविभागंचभ्रांतिरेवनसंशयः ब्रह्मविष्ण्वीशरुद्राणांउपासाभ्रांतिरेवहि तंत्राणियंत्रमंत्राश्चभ्रांतिरेवनसंशयः वाचामगोचरंब्रह्म
ब्रह्मसर्वमयेवहि ५१ सर्वंब्रह्मैवनास्त्येवअहमेवचिदेवहि एवंवदत्वंतिशत्वंसद्योमुक्तोभविष्यति ५२ एतावदुक्तंयत्किंचित्तंनास्त्येवनसंशयः शिवः

३०

एवंपदांतरंक्षिप्रंब्रह्मैवदृढनिश्चयं ५३ दृढनिश्चयमेवात्रप्रथमंकारणंभवेत् निश्चयस्यलयंपश्चात्त्वयमेवभविष्यति ५४ सूतउवाच आर्तेय
छिवपादतोन्यदित्तरंतज्जादिशब्दात्मकंचेतोवृत्तिपरंपराप्रमुदितंषड्भावसित्थंजगत् भूतांक्षादिमनोवचोभिरनघेसांद्रेमहेशेघनेसिंधौसैंधवखंड
वज्जगदिदंलीयेतत्वत्सुज्ञितं ५५ इतिश्रीशिवरहस्येषष्ठांशेशंकराख्येऋभुनिदाघसंवादेपंचविंशोध्यायः २५॥ ऋभुरुवाच वक्ष्येसच्चित्परानं
दस्वभावंसर्वदासुखं सर्ववेदःपुराणानांसारात्सारतरंस्वयं १ नभेदंचद्वयंद्वंद्वंनभेदंभेदवर्जितः इदमेवपरंब्रह्मज्ञानाश्रयमनामयं नक्वचिन्नां
तरंनाहंनाक्षरंनपरापरं इदमेवपरंब्रह्मज्ञानाश्रयमनामयं ३ नवाहिर्नांतरंनाहंनसंकल्पोनविग्रहं इदमेवपु० ४ नसत्यंपरित्यज्यनवार्त्तानार्थं
दूषणं इदमेव० ५ नगुणोगुणिवाक्यंननमनोवृत्तिनिश्चयः नजपंनपरिच्छिन्नंनव्यापकमसत्कलः ६ नगुरुर्नचशिष्योवानस्थिरंनाशुभाशुभं
नैकरूपंनान्यरूपंनमोक्षोनचबंधकः ७ त्वंपदार्थस्तत्पदंवानेंद्रियंविषयादिकं नसंशयंनतुच्छंवाननिश्चयनचाकृतं ८ नशांतिरूपमद्वैतंनचोर्ध्वं
नचनीचकं नलक्षणंनदुःखांगंनसुखंनचचंचलं ९ नशरीरंनलिंगंचनकारणमकारणं नदुःखंनांतिकंनाहंनमूढंनपरंपदं १० नसच्चित्तंचना
गामिनसत्यंचत्वमाहकं नाज्ञानंनचविज्ञानंनमूढोनविवेकवान् ११ ननीचंनरकंनांतंभोज्यंवानखंडैकरसोद्वयं १३ नसंकल्पनप्रपंचंन
जागरणराजकं नकिंचित्समतादोषोनतुर्यगणनाश्रमः १४ नसर्वंनमलंनेष्टंननीतिर्नचपूजनं नप्रपंचंनबहुनानान्यभाषणसंगमः १५
नसत्संगमसत्संगंनब्रह्मनविचारणं नाभ्यासंनचवक्ताचनस्नानंनचतीर्थकं १६ नपुण्यंनचवापापंनक्रियादोषकारणं नचाध्यात्मना
धिभूतंनदैवतमसंभवं १७ नजन्ममरणेक्वापिजागृत्स्वप्नसुषुप्तिकं नभूलोकंनपातालंनजयापजयाजयौ १८ नहीनंनचवाभीतिर्नरति
र्नमृतिस्त्वरा अचिंत्यनपराध्यात्मनिगमागमविभ्रमः १९ नसात्त्विकंराजसंचनतामसगुणाधिकं नशैवंनचवेदांतंनस्वाद्यंतनमानसं २०
नबंधोनचमोक्षोननवाक्यमेकालक्षणं नस्त्रीरूपंनपुंभावंनषंडोनस्थिरःपरं २१ नभूषणंनदूषणंनस्तोत्रंनस्तुतिर्नहि नलौकिकंवैदिकंवा
नशास्त्रंनचशासनं २२ नपीनंनकृशंनेदंनमोदंनमराम्दं नभावनमभावंवानकुलंनामरूपकं २३ नोत्कृष्टंचनिकृष्टंचनश्रेयोश्रेयएवहि निर्म

तत्वंमलोत्सर्गंनजीवोनमनोरमः २४ नशांतिकलनानागंनदांतिर्नसमोदयः नक्रीडानचभावांगंनविकारंनदोषकं २५ नयत्किंचिन्नयत्राहं
नमायाख्यानमायिका यत्किंचिन्नचधर्मादिनधर्मपरिपीडनं २६ नयौवनंनवाल्यंवानजरामरणादिकं नवंधुर्नचवावंधुः नमित्रानचसोदरः २७

नापिसर्वंनचाकिंचिद्विरिंचोनचकेशवः नशिवोनाष्टदिक्पालोनविश्वोनचतेजसः २८ नप्राज्ञोहिनतुर्योवानब्रह्मक्षत्रविट्परः इदमेवपरंब्रह्म
ज्ञानामृतमनोमयं २९ नपुनर्भाविपश्चाद्वानपुनर्भवसंभवैः नकालकलनानाहंनसंभाषणकारणं ३० नचोर्ध्वमंतःकरणंनचचिन्मात्र

भावनं नब्रह्माहमितिद्वैतंनचिन्मात्रमितिद्वयं ३१ नान्नकोशंनचप्राणंनमनोमयकोशकं नविज्ञानमयंकोशंनचानंदमयंपृथक् ३२ नवो
धरूपंवोध्यंवावाधकंवात्रयद्भ्रमः नवाध्यंवाधकंमिथ्यात्रिकुरिज्ञाननिर्णयं ३३ नप्रमाताप्रमाणंवानप्रमेयंफलोदयं इदमेवपरंब्रह्मज्ञा
नामृतमनोमयं ३४ नगुह्यंनप्रकाशंवानमहत्वंनचाणुता नप्रपंचोविद्यमानंनप्रपंचकदाचन ३५ नांतःकरणसंसारंनमत्तोजगतांभ्रमः
नचित्तरूपोसंसारंवुध्यिरूपंप्रपंचकं ३६ नजीवरूपंसंसारंवासरारूपसंहृतिः नलिंगदेहंसंसारंनज्ञानमयसंहृतिः ३७ नवेदरूपं
संसारंनशास्त्रागमसंहृतिः नान्यदस्तीतिसंसारंअन्यदस्तीतिभेदकं ३८ नभेदाद्दलनंभेकनदोषादोषकल्पनं नशांताशांतसंसारं
नगुणागुणसंहृतिः ३९ नस्त्रीलिंगंनपुल्लिंगंननपुंसकसंस्थितिः नस्थावरंजंगमंचनदुःखंनसुखंक्वचित् ४० नशिष्टाशिष्टरूपंवानयो
ग्यायोग्यनिश्चयः नद्वैतरूपवृत्तिर्वासाक्षिवृत्तित्वलक्षणं ४१ अखंडाकारवृत्तित्वंनखंडैकरसंसुखं देहोहमितियावृत्तिःब्रह्माहमि
तिशब्दकं ४२ अखंडनिश्चयावृत्तिर्नाखंडैकरसंमहत् नसर्ववृत्तिभवनंसर्ववृत्तिविनाशकं ४३ सर्ववृत्यनुसंधानंसर्ववृत्तिविमोचनं स
र्ववृत्तिविनाशांतंसर्ववृत्तिविशून्यकं ४४ नसर्ववृत्तिसाहस्रंक्षणक्षणविनाशनं नसर्ववृत्तिसाक्षित्वंनचब्रह्मात्मभावनं नजगन्नमनोनांतो
नकार्यकलनंक्वचित् नदूषणंभूषणंवाननिरंकुशलक्षणं ४६ नचधर्मात्मनोलिंगगुणशालित्वलक्षणं नसामाधिकलिंगंवानप्रारब्धप्र
बंधकं ४७ नब्रह्मचित्तआत्मस्यानपरोस्वप्नलक्षणं नचवर्यपरोरोधोवरिष्ठोनार्थतत्परः ४८ आत्मज्ञानविहीनोयः सएवहिदरिद्रकः

आत्मज्ञानविहीनोयः महापातकएवसः एतावत्वानहीनोयोमहारोगीसएवसः अहंब्रह्मनसंदेहो अखंडैकरसात्मकः ५० ब्रह्मैवसर्वमेवेतिनिश्चयानु
भवात्मकः सद्योमुक्तोनसंदेहः सद्यःप्रज्ञानविग्रहः ५१ सएवज्ञानवान्लोकेसएवपरमेश्वरः इदमेवपरंब्रह्मज्ञानामृतमनोमयं ५२ एतत्प्रकरणंवक्षु
श्रुणुतेब्रह्मएवसः एकत्वंनबहुत्वमणुमहत्कार्यंनवैकारणंविश्वंविश्वपतित्वमप्यरसकंनोगंधरूपंसदा बंधंमुक्तिमनुत्तमोत्तममहानंदैकमोदंसदा
भूमानंदसदाशिवंजनिजरारोगाद्यसंगंमहः ५३ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेषड्विंशोध्यायः २६॥ ऋभुरुवाच॥वक्ष्येप्रकरणंसत्यंब्रह्मा
नंदमनामयं कार्यकारणनिर्मुक्तंनित्यानंदमहंत्वियं १ अक्षयानंदएवाहंआत्मानंदप्रकाशकं ज्ञानानंदस्वरूपोहंलक्ष्यानंदमयंसदा २ विषयानंद
शून्योहंमिथ्यानंदप्रकाशकः वृत्तिशून्यसुखात्माहंवृत्तिहीनंसुखात्परं ३ जडानंदप्रकाशात्मा आत्मानंदरसोस्म्यहं अस्त्यानंदविहीनोहंनास्त्यानंदात्म
विग्रहः ४ कार्यानंदविहीनोहंकार्यानंदकलात्मकः गुणानंदविहीनोहंगुह्यानंदस्वरूपवान् ५ गुह्यानंदस्वरूपोहंकृत्यानंदमहानहं ज्ञेयानंदवि
हीनोहंगोप्यानंदविवर्जितः ६ सर्वानंदस्वरूपोहंमुदानंदनिजात्मकः कालानंदमहानंदोलोकातीतमहानयं ७ भेदानंदसुखानंदोचिदानंदोहम
द्वयः क्रियानंदोक्षयानंदोवृत्त्यानंदविवर्जितः ८ सर्वानंदोक्षयानंदः चिदानंदोहमद्वयः सत्यानंदः परानंदः सद्योनंदः परात्परः ९ वाक्यानंदोमहा
नंदः चिदानंदोहमद्वयः शिवानंदोत्तरानंदः आद्यानंदादिवर्जितः १० अमलात्मापरानंदः चिदानंदोहमद्वयः वृत्यानंदः परानंदोविद्यातीतोहि
निर्मलः कारणातीतआनंदः चिदानंदादिवर्जितः सर्वानंदःपरानंदोब्रह्मानंदात्मभावनः १२ जीवानंदोलयानंदः चिदानंदस्वरूपवान् शुद्धानंदस्वरू
पात्मावुध्यानंदोमनोमयः १३ शब्दानंदोहमानंदः चिदानंदोहम· आनंदानंदशून्यात्माभेदानंदविशून्यकः द्वैतानंदप्रभावात्माचि· १५ एवमादिसदानं
दः अहमेवेतिभावय शांतानंदोहमेवेतिचिदानंदप्रभास्वरः १६ एकानंदः परानंदः एकएवचिदव्ययः एकएवमहानात्मा एकसंख्याविवर्जितः १७ एक
त्वमहानंदोतत्वाभेदविवर्जितः विजितानंदहीनोहंनिर्जितानंदहीनकः १८ हीनानंदप्रशांतोहंशांतोहमितिशांतकः ममतानंदशांतोहंअहमादिप्रकाशकं
१९ सर्वदादेहशांतोहंशांतोहमितिवर्जितः ब्रह्मैवाहंनसंसारीइत्येवमितिशांतकः २० अंतरानंदतरोहंवैअंतरानंदतरोंतरः एकएवाहमानंदः एकएवाहम

 क्षरः २१ एकएवाक्षरंब्रह्मएकएवाक्षरोक्षरः एकएवमहानात्माएकएवमनोहरः एकएवाद्वयोहंवैएकएवनचापरः एकएवनभूरादिएकएवनबुंसकः
२३ एकएवप्रशांतोहंएकएवसुखात्मकः एकएवनकामात्माएकएवनकोपकः २४ एकएवनलोभात्माएकएवनमोहकः एकएवमदोहीनःएकएवनमेरसः
अ०२७ २५ एकएवनचिंतात्माएकएवनचान्यकः एकएवनसत्तात्माएकएवजरामयः २६ एकएवहिपूर्णात्माएकएवहिनिश्चयः एकएवमहानंदःएकएवेहमेक
३२ वान् २७ देहोहमितिहीनोहंमहाहमितिनिश्चितः सारोहमितिहीनोहंशांतोहमितिशाश्वतः २८ शिवोहमितिशांतोहंआत्मैवाहमितिक्रमः जीवोहमि
तिशांतोहंनित्यंशून्यहृदेतरः २९ एवंभावयनिःशंकंसद्योमुक्तत्वसिध्यये एवमादिसुशब्दंवानित्यंपठतुनिश्चयः ३० सूतउवाच कालःस्वभावोनियते
श्वभूतेःजगद्धिजायतइतिश्रुतीरितं तद्देमृषासाज्जगतोजडत्वतःइच्छामवैचैतदथेश्वरस्य ३१ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेऋभुगीतायां
सप्तविंशोऽध्यायः २७ ऋभुरुवाच॥ ब्रह्मैवाहंचिदेवाहंनिर्मलोहंनिरंतरं शुद्धंस्वरूपएवाहंनित्यरूपपरोस्म्यहं १ नित्यंनिर्मलरूपोहंनित्यंचैतन्यवि
ग्रहः आद्यंतरूपहीनोहंआद्यंतद्वैतहीनकः २ अजस्त्रसुखरूपोहंअजस्त्रानंदरूपवान् अहमेवादिनिर्मुक्तोअहंकारेणवर्जितः ३ अहमेवपरं
ब्रह्मअहमेवाहमेवहि इत्येवंभावयंनित्यंसुखमात्मनिनिर्मलः ४ सुखंतिष्ठसुखंतिष्ठसुचिरंसुखमावह सर्ववेदमनन्यस्त्वंसर्वदानास्तिकल्पनं ५ स
र्वदानास्तिचित्ताख्यंसर्वदानास्तिसंसृतिः सर्वदानास्तिनास्त्येवसर्वदाजगदेवन ६ जगत्प्रसंगंनास्त्येवदेहवार्तातुतःकुतः ब्रह्मैवसर्वचिन्मात्रंअहमेव
हिकेवलं ७ चित्तंइत्यपिनास्त्येवचित्तमस्तिहिनास्तिहि अस्तित्वभावनानष्टाजगदस्तित्ववाक्मृषा ८ अस्तित्ववक्तावार्त्तोहिजगदस्तीतिभावना स्वात्म
न्योन्यजगद्द्रष्टादेहोहमितिनिश्चितः ९ महाचंडालएवासौमहाविप्रोविनिश्चयः तस्मादितिजगन्नेतिचित्तंवावुस्थिरेवच १० नास्तिनास्तीतिसहसा
निश्चयंकुरुनिर्मलः दृश्यंनास्त्येवनास्त्येवनास्तिनास्तीतिभावय ११ अहमेवपरंब्रह्मअहमेवहिनिष्कलः अहमेवनचाचाहमहमेवसुखासुखं १२
अहमेवहिदिव्यात्माअहमेवहिकेवलः वाचामगोचरोहंवैअहमेवनचापरः अहमेवहिसर्वात्माअहमेवसदाप्रियः अहमेवहिभानात्माअहंवृत्ति
विवर्जितः १४ अहमेवापरिच्छिन्नोअहमेवनिरंतरः अहमेवहिनिश्चिंताअहमेवहिसद्गुरुः १५ अहमेवसदासाक्षीअहमेवाहमेवहि नाहंगुणानवागु शिवः

ष्टोनप्रकाशात्मकंसदा १६ नाहंजडोनचिन्मात्रःक्वचित्किंचिन्नदस्तिहि नाहंप्राणोजडत्वंतदत्यंतंसर्वदाभ्रमः १७ अहमत्यंतमानंदंअहमत्यंत
निर्मलः अहमत्यंतवेदात्माअहमत्यंतशांतकः १८ अहमित्यपिमेकिंचिदहमित्यपिनस्मृतिः सर्वहीनोहमेवाग्रेसहीनसुखाच्छुभात् १९ परात्पर
तरोब्रह्मपरात्परतरःपुमान् परात्परतरोहंवैसर्वस्मात्परतःपरः २० सर्वदेहविहीनोहंसर्वकर्मविवर्जितः सर्वमंत्रःप्रशांतात्मासर्वांतःकरणात्परः २१
सर्वस्तोत्रविहीनोहंसर्वदेवप्रकाशकः सर्वस्नानविहीनात्माएकमग्नोहमद्वयः २२ आत्मतीर्थेह्यात्मजलेआत्मानंदेमनोहरे आत्मैवाहमितिज्ञात्वा
आत्माकारएवसाम्यहं २३ आत्मैवभोज्यंह्यात्माहितृप्तिरात्मसुखात्मकः आत्मैवह्यात्मनोह्यात्माआत्मैवपरमोह्यहं २४ अहमात्माहमात्माहंअहमा
त्मानलौकिकः सर्वात्माहंसदात्माहंनित्यात्माहंगुणांतरः २५ एवंनित्यंभावयित्वासर्वदाभावसिद्धये सित्स्थंतिष्ठतिचिन्मात्रोनिश्चयंमात्रमेवसा २६
निश्चयंचलयंयासिस्वयमेवसुखीभव शाखाशिखाभिश्रुतयोप्यनंतात्वामेकमेवभगवन्बहुधावदंति विष्ण्वींद्रधातृरविसून्वनलानिलादिभू
तात्मनाभगणनाथलत्नामशंभो २७ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेअष्टाविंशोध्यायः २८ ऋभुरुवाच अत्यंततन्मयंवक्ष्येदुर्लभंयोगि
नामपि वेदशास्त्रेषुदेवेषुरहस्यमतिदुर्लभं १ यत्परंब्रह्मसर्वात्मासच्चिदानंदविग्रहः सर्वात्मापरमात्माहितन्मयोभवसर्वदा २ आत्मरूपमिदं
सर्वंआद्यंतरहितोजय कार्याकार्यमिदंनास्तितन्मयोभवसर्वदा ३ यत्रद्वैतभयंनास्तियत्राद्वैतप्रबोधनं शांताशांतद्वयंनास्तितन्मयोभवसर्वदा ४
यत्रसंकल्पकंनास्तियत्रभ्रांतिर्नविद्यते तदेवहिमतिर्नास्तितन्मयोभवसर्वदा ५ यत्रब्रह्मणिनास्त्येवयत्रभातिविकल्पने यत्रसर्वजगन्नास्तितन्मयो
भवसर्वदा ६ यत्रभावमभावंवामनोभ्रांतिविकल्पनं यत्रवार्तानवार्तावातन्मयोभवस० ७ यत्रनास्तिसुखंनास्तिदेहोहमितिरूपकं सर्वसंकल्पनिर्मुक्तं
तन्मयोभवसर्वदा ८ यत्रब्रह्मादिनाभावंयत्रदोषंनविद्यते यत्रद्वंद्वभयंनास्तितन्मयोभवसर्वदा ९ यत्रवाक्कायकार्यंवायत्रकल्लोलयंगतः यत्रप्र
पंचनोत्पन्नंत० १० यत्रमायाप्रकाशोनमायाकार्यंनकिंचन यत्रदृश्यमदृश्यंवातन्म० विद्वान्विद्यापिनास्त्येवयत्रपक्षविपक्षकः नयत्रदोषादोषं
वातन्म० १२ यत्रविष्णुत्वभेदोनयत्रब्रह्मानविद्यते यत्रशंकरभेदोनतन्मयो० १३ नयत्रसदसद्भेदोनयत्रकलनापरं नयत्रजीवकलनातन्म० १४ नयत्र

शिवरहस्य ६ शंकरध्यानंनयत्रपरमंपदं नयत्रकलनाकारंयत्रसंतोपिकल्पनं यत्रप्रपंचमाभासंतं० १६ नयत्रदेहकलनंनयत्रहिकुतूहलं नयत्रचित्तकलनंतं० १७
नयत्रबुद्धिविज्ञानंनयत्रात्मामनोमयः नयत्रकामकलनंतं० १८ नयत्रमोक्षविश्रांतिःयत्रबंधत्वविग्रहः नयत्रशाश्वतज्ञानंतं० १९ नयत्रकालक
अ० २९ लनंयत्रदुःखत्वभावना नयत्रदेहकलनंतं० २० नयत्रजीववैराग्यंयत्रशास्त्रविकल्पनं यत्राहमहमात्मत्वंतं० २१ नयत्रजीवन्मुक्तिर्वायत्रदेहविमोचनं
यत्रसंकल्पितंकार्यंतं० २२ नयत्रभूतकलनंयत्रान्यत्तत्प्रभावनं नयत्रजीवभेदंवातं० २३ यत्रानंदपदंब्रह्मयत्रानंदपरंसुखं यत्रानंदगुणंनित्यंतं० २४ नयत्र
३३ वस्तुप्रभवंनयत्रापजयाजयं नयत्रवाक्यकथनंतं० २५ नयत्रात्मविचारांगंनयत्रश्रवणाकुलं नयत्रचमहानंदं २६ नयत्रहिसजातीयंविजातीयंनय
त्रहि नयत्रस्वगतंदेहंतं० २७ नयत्रनरकंघोरंनयत्रस्वर्गसंपदं नयत्रब्रह्मलोकंवातं० २८ नयत्रविष्णुसायुज्यंयत्रकैलासपर्वतं नयत्रब्रह्मांडमंडलंतं० २९
नयत्रदूषणंएतत्भूषणंवानविद्यते नयत्रसमतादोषंतं० ३० नयत्रमनसाभावोनयत्रसविकल्पनं नयत्रानुभवंदुःखंतंतन्म० ३१ नयत्रप्राणदोषोयं
मनसाभाववर्तित्ते नयत्रसंगदोषंवातन्मयो० ३२ यत्रतापत्रयंनास्तियत्रजीवत्रयंक्वचित् यत्रविश्वविकल्पाख्यंतं० ३३ नयत्रबोधमुत्पन्नंनयत्रज
गतांभ्रमः नयत्रकरणाकारंतं० ३४ नयत्रहिमनोराज्यंयत्रैवपरमंसुखं यत्रैवशाश्वतंस्थानंतं० ३५ यत्रैवकरणंशांतंयत्रैवसकलंसुखं यज्ज्ञात्वान
निवर्ततेतं० ३६ यत्ज्ञात्वामुच्यतेसर्वंयत्ज्ञात्वान्यंनविद्यते यत्ज्ञात्वानान्यविज्ञानंतन्मयो० ३७ यत्रैवदोषंनोत्पन्नंयत्रैवस्थाननिश्चलः यत्रैवजी
वसंघातंतन्मयोभवसर्वदा ३८ यत्रैवनित्यतत्प्राप्त्यायत्रैवानंदनिश्चलं यत्रैवनिश्चलशांतंतन्मयो० ३९ यत्रैवसर्वसौख्यंवायत्रैवसनिरूपणं
यत्रैवनिश्चयाकारंतं० ४० नयत्राहंनयत्रत्वंनयत्रत्वंस्वयंस्वयंयत्रैवनिश्चयंशांतंतं० ४१ यत्रैवमोदतेनित्यंतं० यत्रैवचिन्मयाकारंयत्रैवानंदसागरं
यत्रैवपरमंसाक्षात० ४२ यत्रैवस्वयमेवात्रस्वयमेवतदेवहि स्वस्वात्मनोक्तभेदोतितं० ४३ यत्रैवपरमानंदंस्वयमेवसुखंपरं यत्रैवभेदकलनंतं० ४४
नयत्रचाणुमात्रंवानयत्रमनसोमलं नयत्रचदृश्यंवतं० ४५ यत्रचित्तंमृतंदेहंमनोमरणमात्मनः यत्रस्मृतिरयंनास्तितं० ४६ यत्रैवाहंमृतोनूनंय
त्रकामलयंगतः यत्रैवपरमानंदंतं० ४७ यत्रदेवात्रयोलीनंयत्रदेहादियेमृताः नयत्रव्यवहारोस्तितं० ४८ यत्रमग्नोनिरायातंयत्रमग्नोनपश्यति यत्रमग्नो शिवः
३३

नजन्मादित· ४९ यत्रमग्नोनचाभातियत्रजाग्रन्नविद्यते यत्रैवमोहमरणंत· ५० यत्रैवकालमरणंयत्रयोगलयंगतः यत्रसत्संगतिर्नष्टात्त· ५१
यत्रविघ्नातिमरणंयत्रविश्वंलयंगतं यत्रभ्रांतिनिवृत्तित्वंत· ५२ यत्रप्राणादयोनष्टायत्रदेहास्त्रयोमृताः यत्रमानावमानंततत्त· ५३ यत्रैवब्र
ह्मणोरूपंयत्रैवानंदमात्रकं यत्रैवपरमानंदंत· ५४ यत्रविश्वंक्वचिन्नास्तियत्रनास्तिमनोजगत् यत्रांतःकरणंनास्तित्त· ५५ यत्रैवसुखमात्र
चयत्रैवानंदमात्रकं यत्रैवपरमानंदंत॰ तत्रसन्मात्रचैतन्यंतन्मयो· यत्रसाक्षात्परंब्रह्मयत्रसाक्षात्स्वयंपरं यत्रशांतंपरंलक्ष्यंत· ५७ यत्रसाक्षा
दखंडार्थयत्रसाक्षात्परायणं यत्रनाशादिकंनास्तित· ५८ यत्रसाक्षात्स्वयंमात्रंयत्रसाक्षात्स्वयंस्वयं यत्रसाक्षान्महानात्मातन्म· ५९ यत्रसाक्षा
त्परंतत्वंयत्रसाक्षात्स्वयंमहत् यत्रसाक्षात्तुविज्ञानंत· ६० यत्रसाक्षाद्गुणातीतंयत्रसाक्षाद्धिनिर्मलं यत्रसाक्षात्सदाशुध्यंत· ६१ यत्रसाक्षान्म
हानात्मायत्रसाक्षात्सुखात्सुखं यत्रैवज्ञानविज्ञानंत· ६२ यत्रैवहिस्वयंज्योतिःयत्रैवस्वयमद्वयं यत्रैवपरमानंदंत· ६३ एवंतन्मयभावोक्तएवंनि
त्यशनिसतः ब्रह्माहंसच्चिदानंदमखंडोहंसदासुखं ६४ ब्रह्मविज्ञानमात्रोहंसंशांतंपरमोस्म्यहं चिदहंचित्तहीनोहंनाहंसोहंभवाम्यहं ६५
तदहंचिदहंसोहंनिर्मलोहमहंपरं परोहंपरमोहंवैसर्वंत्यक्त्वासुखीभव ६६ इदंसर्वंचित्तशेषंशुध्यत्वकमलित्वकं एवंसर्वंपरित्यज्यविस्मृत्ता
शुध्यकाष्टवत् ६७ प्रेतवद्देहमुत्सृज्यकाष्ठवल्लोष्टवत्सदा स्मरणंचपरित्यज्यब्रह्ममात्रपरोभव ६८ एतत्प्रकरणंयस्तुशृणोतिसकृदस्तिवा
महापातकयुक्तोपिसर्वंत्यक्त्वापरंगतः अंगावबद्धाभिरुपासनाभिःवदंतिवेदाःकिलत्वामसंगं समस्तहृत्कोशविशेषसंगंभूमानमात्मा
नमखंडरूपं ७० इतिश्रीशिवरहस्येशंकराख्येएकोनत्रिंशोध्यायः २९ ॥ ऋभुरुवाच वक्ष्येपरंब्रह्ममात्रंजगत्त्यागपूर्वकं सकृच्छ्रव
णमात्रेणब्रह्मभावंपरंलभेत् १ ब्रह्मब्रह्मपरंमात्रंनिर्गुणंनित्यनिर्मलं शाश्वतंसममत्यंतंब्रह्मणोन्यंनविद्यते २ अहंसत्यंपरानंदःशुध्योनि
त्योनिरंजनः सर्वंब्रह्मनसंदेहोतद्ब्रह्माहंनसंशयः अखंडैकरसैवास्मिपरिपूर्णोस्मिसर्वदा ब्रह्मैवसर्वंनान्योस्तिसर्वंब्रह्मनसंशयः ४ सर्वदा
केवलात्माहंसर्वंब्रह्मेतिनित्यशः आनंदरूपमेवाहंनान्यत्किंचिन्नशाश्वतं ५ शुध्यानंदस्वरूपोहंशुध्यविज्ञानमात्मनःएकाकारस्वरूपोहं

शिवरहस्य० ६ नैकसत्ताविवर्जितः ६ सर्वं० अंतरज्ञानशुद्धोहं अहमेव परायणं ७ अनेकत्वविहीनोहं एकत्वं न च विद्यते सर्वं ब्रह्म न संदेहो तद्ब्रह्माहं न संशयः
८ सर्वप्रकाररूपोस्मि सर्वइत्यपिवर्जितः निर्मलज्ञानरूपोहं अहमेव न विद्यते ९ सर्वं० शुद्धब्रह्मस्वरूपोहं विशुद्धपरिवर्जितः नित्यानं
अ०३९ दस्वरूपोहं ज्ञानानंदमहं सदा सूक्ष्मात्सूक्ष्मतरोहं सूक्ष्मइत्यादिवर्जितः ११ अखंडानंदमात्रोहं अखंडानंदविग्रहः सदामृतस्वरूपोहं सदाके
वल्यविग्रहः ब्रह्मानंदमिदं सर्वं नास्ति नास्ति कदाचन जीवत्वधर्महीनोहं ईश्वरत्वविवर्जितः १३ वेदशास्त्रस्वरूपोहं शास्त्रस्मरणाकारणं
३४ जगत्कारणकार्यं च ब्रह्मविष्णुमहेश्वरः १४ वाच्यवाचकभेदं च स्थूलसूक्ष्मशरीरकं जागृत्स्वप्नसुषुप्त्याद्यप्राज्ञतैजसविश्वकाः १५ सर्वशास्त्र
स्वरूपोहं सर्वानंदमहं सदा अतीतानामरूपार्थअतीतः सर्वकल्पना १६ द्वैताद्वैतसुखंदुःखं लाभालाभौ जयाजयौ सर्वं० १७ सात्त्विकं राजसं भे
दं संशयं हृदयं फलं दृक्दृश्यं सर्वद्रष्टा च भूतभौतिकदैवतं सर्वं० तुर्यरूपमहं सूक्ष्मात्ज्ञानरूपमहं सदा १९ अज्ञानं चैव नास्त्येव तत्कार्यं कुत्र विद्यते
सर्वं ब्रह्म न संदेहः तद्ब्रह्माहं न संशयः २० चित्तवृत्तिविलासं च बुद्धिनामापि नास्ति हि देहसंकल्पहीनोहं बुद्धिसंकल्पकल्पनं २१ सर्वं ब्रह्म न सं० बु
द्धिनिश्चयरूपोहं निश्चयं च गलत्यहो २२ अहंकारं बहुविधं देहोहमिति भावनं सर्वं ब्र० २३ ब्रह्माणमपिकाणोहं बधिरोहं परोस्म्यहं देहोहमिति ता
दात्म्यं देहस्य परमात्मनः २४ सर्वं ब्र० सर्वोहमिति तादात्म्यं सर्वस्य परमात्मनः २५ इति भावय यत्नेन ब्रह्मैवाहमिति प्रभो दृढनिश्चयमेवेदं सत्यं सत्य
महं परं २६ दृढनिश्चयमेवात्र सद्गुरोर्वाक्यनिश्चयं दृढनिश्चयसाम्राज्ये तिष्ठ नित्यं तत्परः अहमेव परं ब्रह्म आत्मानंदप्रकाशकः शिवपूजा
शिवश्चाहं विष्णुर्विष्णुप्रपूजनं २८ यद्यत्संवेद्यते किंचित्यद्यन्निश्चयते क्वचित् तदेव त्वं त्वमेवाहं इत्येवं नास्ति किंचन २९ इदं चित्तमिदं दृ
श्यं इत्येवमपि नास्ति हि सदा सद्भावशेषोपि तत्तद्भेदं न विद्यते सुखरूपमिदं सर्वं दुःखरूपमिदं न च लक्ष्यभेदं सद्भेदं सर्वभेदं न विद्यते ३१ ब्रह्मानं
दो न संदेहो तद्ब्रह्माहं न संशयः ब्रह्मभेदं तुर्यभेदं जीवभेदमभेदकं ३२ इदमेव हि नोत्पन्नं सर्वदा नास्ति किंचन सदेवमिति निर्देशो नास्ति नास्त्येव
सर्वदा ३३ अस्ति चेत्किल वक्तव्यं नास्ति चेत्कथमुच्यते परं विशेषमेवेति नास्ति किंचित्सदामपि ३४ चंचलं च मनश्चैव नास्ति नास्ति न संशयः ए राम

३५

वमेवसदापूर्णनिरीहस्तिष्टशांतधीः ३५ सर्वंब्रह्मास्मिपूर्णोस्मितेवंचनकदाचन आनंदोहंवरिष्ठोहंब्रह्मास्मीत्यपिनास्तिहि ३६ ब्रह्मानंदमहानं
दंआत्मानंदमखंडितं इदंपरमहंत्ताचसर्वदानास्तिकिंचन ३७ इदंसर्वमितिख्यातिअनिदंन्नितितिनोभ्रमः सर्व० ३८ लक्ष्यलक्षणभावंचदृश्यद
र्शनदृश्यता अत्यंताभावमेवेतिसर्वदानुभवंमहत् सर्वगुह्यंमंत्रशास्त्रंसत्यंस्तोत्रंकलेवरं मरणंजननंकार्यकारणंपावनंशुभं ४० कामक्रोधोलोभ
मोहोमदमात्सर्यमेवहि द्वैतदोषंभयंशोकंसर्वंनास्त्येवसर्वदा ४१ इदंनास्त्येवनास्त्येवनास्त्येवसकलंसुखं इदंब्रह्मेतिमननंअहंब्रह्मेतिचिंतनं
४२ अहंब्रह्मेतिमननंत्वंब्रह्मत्वविनाशनं सत्यत्वंब्रह्मविज्ञानंअसत्यत्वंनबाध्यते ४३ एकएवपरोह्यात्माएकत्वभ्रांतिवर्जितः सर्वंब्रह्मसदाब्रह्मतद्ब्र
ह्माहंनसंशयः ४४ जीवरूपाजीवभावाजीवशब्दत्रयंनहि ईशरूपंचेशभावंईशशब्दंचकल्पितं ४५ नाक्षरंनचसर्वंवानपदंवाच्यवाचकौ हृदयंम
न्त्रंतंत्रंवाचित्तंबुद्धिर्नकिंचन ४६ मूढोज्ञानिर्विवेकीवाशुद्धइत्यपिनास्तिहि निश्चयंप्रणवंतारंआत्मार्थंगुरुशिष्यकं ४७ तूष्णींतूष्णींमहातूष्णीं
मौनंवामौनभावनं प्रकाशनंप्रकाशंचआत्मानात्मविवेचनं ४८ ध्यानयोगंराजयोगंयोगमष्टांगलक्षणं सर्व० अस्तित्वभाषणंवापिनास्ति
त्वस्यचभाषणं ४९ पंचाशद्वर्णरूपंवाचतुष्षष्टिकलात्मकः सर्व० ५० ब्रह्मैवाहंप्रसन्नात्माब्रह्मैवाहंचिदव्ययः शास्त्रज्ञानविदूरोहंवेदज्ञानवि
दूरगः ५१ उक्तंसर्वंपरंब्रह्मनास्तिसंदेहलेशकः सर्वंब्रह्मनसंदेहोतद्ब्रह्माहंनसंशयः ५२ इत्येवंब्रह्मसन्मात्रंतंत्रंतुभ्यंप्रियंततः यस्तुबाध्येतसततं
सर्वंब्रह्मनसंशयः ५३ नित्यंशृण्वंतियेमर्त्याःतेचिन्मात्रमयामलाः मंदेहसंदेहकरोयमास्यकैःकरादिसंदोहजगद्विकासिभिः यावीतमोहंनकरो
तिदुर्हृदंविदेहमुक्तिंशिवहृत्प्रभावतः ५४ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशे त्रिंशोध्यायः ३०॥ ऋभुरुवाच वक्ष्येरहस्यमत्यंतंसाक्षाद्ब्रह्मप्र
काशकं सर्वोपनिषदामर्थंसर्वलोकेषुदुर्लभं १ प्रज्ञानंब्रह्मनिश्चित्यपदद्वयसमन्वितं महावाक्यंचतुर्वाक्यंऋग्यजुःसामसंभवं २ ममप्रज्ञैव
ब्रह्माहंज्ञानमात्रमिदंजगत् ज्ञानमेवजगत्सर्वंज्ञानादन्यन्नविद्यते ३ ज्ञानस्यांतरंसर्वंदृश्यंतज्ज्ञानरूपतः ज्ञानस्यब्रह्मणश्चापिममैवहिपृथङ्
नहि ४ जीवःप्रज्ञानशब्दस्यब्रह्मशब्दस्यचेश्वरः ऐक्यमस्मीत्यखंडार्थंअखंडैकरसंततं ५ अखंडाकारवृत्तिस्तुजीवन्मुक्तिरितीरितं अखंडैकरसं

वस्तुविदेहोमुक्तिरुच्यते ६ ब्रह्मैवाहंनसंसारीसच्चिदानंदमस्म्यहं निर्गुणोहंनिरंशोहंपरमानंदवानहं ७ नित्योहंनिर्विकल्पोहंचिदहंचिदहंसदा अखं
अ०३१ डाकारवृत्तारवंचित्तंब्रह्मात्मनास्थितं ८ लवणंतोयमात्रेणयथैकत्वमखंडितं अखंडैकरसंवक्ष्येविदेहोमुक्तिलक्षणं ९ प्रज्ञापदंपरित्यज्यब्रह्मै
वपदमेवहि अहमस्मिमहानस्मिसिद्धोस्मीतिपरित्यजन् स्मरणंचपरित्यज्यभावनंचित्तकर्तृकं सर्वमंतःपरित्यज्यसर्वशून्यपरास्थितिः ११ तू
३५ ष्णींस्थितिश्चसंत्यज्यततोमौनविकल्पनं यत्तचित्तंविकल्पाशमनसाकल्पितंजगत् १२ देहोहमित्यहंकारंद्वैतवृत्तिरितिस्थितं सर्वसाक्षिरहंब्रह्म
इत्येवंदृढनिश्चयं १३ सर्वदासंशयंब्रह्मसाक्षिवृत्तिरितीरितं द्वैतवृत्तिःसाक्षिवृत्तिअखंडाकारवृत्तिकं १४ अखंडैकरसंचेतिलोकेवृत्तिद्वयंभवेत्॥
प्रथमेनिश्चितेद्वैतेचतृतीयेसाक्षिसंशयः १५ तृतीयेपदभागेहिदृढंनिश्चयमीरितं एतत्त्रयार्थसंशोध्यतंपरित्यज्यनिश्चिनु १६ अखंडैकरसाकारो
नित्यंतन्मयतांव्रज अभ्यासवाक्यमेतत्तुसदाभ्यासस्यकारणं १७ मननस्यपरंवाक्यंयोयंचंदनवृक्षवत् युक्तिभिश्चिंतनंवृत्तंपदत्रयमुदाहृतं १८
अहंपदस्यजीवार्थईशोब्रह्मपदस्यहि आस्मीतिपदभागस्यअखंडाकारवृत्तिकं १९ पदत्रयंपरित्यज्यविचार्यमनसासह अखंडैकरसंप्रा
प्यविदेहोमुक्तिलक्षणं अहंब्रह्मास्मिनित्योस्मिशांतोस्मिपरमोस्म्यहं निर्गुणोहंनिरीहोस्मिनिरीशोस्मिसदास्मृतः २१ आत्मैवास्मिनसंदेहःअ
खंडैकरसोस्म्यहं एवंनिरंतरंतज्ज्ञोभावयेत्परमात्मनि २२ यथाचानुभवंवाक्यंतस्मादनुभवेसदा अभयंद्वितीयानुस्मृतंअभ्यासवाक्यतः २३ तृ
तीयंतत्वमस्येतिवाक्यंसामान्यनिर्णयं तत्तत्पदंत्वपदंतस्यपदत्रयमुदाहृतं २४ तत्पदस्येश्वरोह्यर्थोजीवार्थःत्वपदस्यहि ऐक्यभावपदस्या
र्थमखंडैकरसस्मृतं २५ द्वैतवृत्तिःसाक्षिवृत्तिःअखंडाकारवृत्तिकः अखंडसच्चिदानंदंतत्वमेवासिनिश्चयः २६ त्वंब्रह्मासिनसंदेहःत्वमेवासि
चिदव्ययः त्वमेवसच्चिदानंदःत्वमेवाखंडनिश्चयः २७ इत्येवमुक्तेगुरुणासएवपरमोगुरुः अहंब्रह्मेतिनिश्चित्यसच्छिष्यपरमात्मवान् २८ ना
न्योगुरुर्नान्यशिष्यःत्वंब्रह्मासिगुरुःपरः सर्वमंत्रोपदेष्टारःगुरवःसगुरुःपरः २९ त्वंब्रह्मासीतिवक्तारंगुरुरेवेतिनिश्चिनु तथातत्वमसिब्रह्मत्व
मेवासिचसद्गुरुः ३० सद्गुरोर्वचनंयस्तुनिश्चयंदृढनिश्चयं करोतिसततंमुक्तोनात्रकार्याविचारणा ३१ महावाक्यंगुरोर्वाक्यंतत्वमस्यादिवाक्यकं राम

शृणोतिश्रवणंचिंतनान्मच्छ्रवणमुच्यते ३२ महावाक्यंगुरुर्वाक्यंतत्वमस्यादिवाक्यकं सर्ववेदांतवाक्यानामद्वैतेब्रह्मणिस्थितिः ३३ इत्येवंचगुरो
र्वक्त्राच्छ्रुतंब्रह्मेतितत्श्रवः गुरोर्नामोमंत्रवादीएकएवहिसद्गुरुः ३४ त्वंब्रह्मासीतियेनोक्तएषएवहिसद्गुरुः वेदांतश्रवणंचेतन्नान्यच्छ्रवणमी
रितं ३५ युक्तिभिश्चिंतनंचैवमननंपरिकथ्यते एषचंदनवृक्षोपिश्रुतोपिपरिशोध्यते ३६ त्वंब्रह्मासीतिचोक्तेपिसंशयंपर्यवस्यति संशोध्यनिश्चि
नोत्येवमात्मानंपरिशोध्यते ३७ युक्तिर्नामवदाम्यत्रदेहोनाहंविनाशतः स्थूलदेहंसूक्ष्मदेहंस्थूलसूक्ष्मंचकारणे ३८ त्रयंचतुर्येनास्तीतिसर्वंचि
न्मात्रमेवहि एतत्सर्वंजडत्वाच्चदृश्यत्वात्घटवन्नहि ३९ अहंचैतन्यमेवात्रदृग्रूपत्वाद्द्वयंनहि सत्यंज्ञानमनंतंयत्आत्मनःसहजोगुणः ४०
अनृतंजडदुःखादिजगतःप्रथितोगुणः तस्मादहंब्रह्मएवइदंसर्वमसत्यकं ४१ एवंचमननंनित्यंकरोतिब्रह्मवित्तमः वक्ष्येनिधिध्यासनंचउभयं
त्यागलक्षणं ४२ त्वंब्रह्मासीतिश्रवणंमननंचाहमेवहि एतत्यागंनिदिध्यासंसजातीयत्वभावनं विजातीयपरित्यागस्स्वगतत्वविभावनं सर्वत्यागप
रित्यज्यतुरीयत्वंचवर्जनं ४४ ब्रह्मचिन्मात्रसारत्वंसाक्षात्कारंप्रचक्षते उपदेशमहावाक्यंअस्तित्वमितिनिर्णयः ४५ तथैवानुभवंवाक्यंअहंब्रह्मा
स्मिनिश्चयं प्रज्ञानंब्रह्मवाक्योत्थअभ्यासार्थमितीरितं ४६ अयमात्मेतिवाक्योत्थदर्शनंवाक्यमीरितं अयमेकपदंचैकंआत्मेतिब्रह्मचत्रयं ४७ अ
यंपदस्यजीवोर्थआत्मनोईश्वरःपरः तथाब्रह्मपदस्यार्थःअखंडाकारवृत्तिकं ४८ अखंडैकरसंसर्वंपदत्रयलयंगतं अखंडैकरसोह्यात्मानित्य
शुद्धविमुक्तकं अयंपदस्यजीवोर्थआत्मेतीश्वरईरितं ५१ यस्यार्थोस्मीत्यखंडार्थमखंडैकरसंपदं द्वैतवृत्तिःसाक्षिवृत्तिःअखंडाकारवृत्तिकः
अखंडैकरसंपश्चात्सोहमस्मीतिभावय इत्येवंचचतुर्वाक्यंतात्पर्यार्थसमीरितं ५३ उपाधिसहितंवाच्यंकेवलंलक्ष्यमीरितं किंचित्त्वादिजीवस्
सर्वज्ञत्वादिचेश्वरः ५४ जीवोपरोक्षचैतन्यंईश्वरोहंपरोक्षकः सर्वंशून्यमितित्यज्यब्रह्मास्मीतिविनिश्चयं ५५ अंब्रह्मनसंदेहःसच्चिदानंदविग्रहः
एवमेकपरंगत्वास्वस्वभावोभवोत्तम ५६ एतत्सर्वंमहामिथ्यानास्तिनास्तिनसंशयः सर्वंनास्तिनसंदेहःसर्वंब्रह्मनसंशयः ५७ एकाकारमखंडार्थं
तदेवाहंनसंशयः ब्रह्मेदंविततकारंतद्ब्रह्माहंनसंशयः ५८ सूतउवाच भवोद्भवमुखोद्भवंभवहराद्यहृद्यंभुविप्रकृष्टवरभावतःप्रथितबोधवृत्तंभव

भजंतिभसितांगकाभरितमोदभाराद्राभुजंगवरभूषणंभुवनमध्यवृंदावनं ५९ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेएकत्रिंशोध्यायः३१॥ ऋभुरुवाच
अ॰३२ वक्ष्येपुनरसत्यांगंब्रह्मनिश्चयमेवच यस्यश्रवणमात्रेणसद्योमुक्तोभवेन्नरः १ चित्तसत्तामनःसत्ताब्रह्मसत्तात्मसास्थिता सर्वंमिथ्यानसंदेहोब्रह्मै
वाहंनसंशयः २ देहसत्तालिंगसत्ताभावसत्ताक्षरास्थिता सर्वंमित्यान॰३ दृश्यंचदर्शनंद्रष्टाकर्ताकारयिताक्रिया एकंद्वित्वंपृथग्भावंअस्तिना
३६ स्तीतिनिर्णयः सर्वंमिथ्यानसंदेहो॰४ शास्त्रभेदंवेदभेदंमुक्तीनांभेदभावनं ५ जातिभेदंवर्णभेदंश्रुत्याशास्त्रविनिर्णयः सर्वंमिथ्या॰६ अखंडाका
रवृत्तिश्चअखंडैकरसंपरं परापरविकल्पश्चपुण्यपापविकल्पनं सर्वंमि॰ कलनाकल्पनाद्वैतभानोकल्पनभावनं शुद्धंसाध्यंसाधनंचनाशनंब्र
ह्मभावनं सर्वंमि॰९ आत्मज्ञानंमनोधर्ममनोभावेकुतोभवेत् सर्वंमि॰१० अज्ञानंचमनोधर्मःतदभावेचतत्कुतः सर्वंमि॰११ शमोदमोमनोध
र्मःतदभावेतितत्कुतः बंधमोक्षोमनोधर्मौतदभावेकुतोभवेत् सर्वंमि॰ सर्वंमिथ्याजगन्मिथ्यादेहोमिथ्याजडत्वतः ब्रह्मलोकंसदामिथ्याबु
द्धिरूपंतदेवहि सर्वंमि॰१४ विष्णुलोकःसदामिथ्याशिवमेवहिसर्वदा रुद्रलोकःसदामिथ्याअहंकारस्वरूपतः सर्वंमि॰ चंद्रलोकंसदामिथ्या
मनोरूपविकल्पनं दिशोलोकःसदामिथ्याश्रोत्रशब्दसमन्वितः सर्व॰१७ त्वचालोकःसदामिथ्यावायोःस्पर्शसमन्वितः सूर्यलोकःसदामि
थ्यानेत्ररूपसमन्वितं सर्व॰ वरुणस्यसदालोकोजिह्वासर्वसमन्वितः अश्विनोःघ्राणलोकश्चगंधहेतुसमन्वितः सर्व॰२१ अग्नेर्लोकःसदामि
थ्यावागेववचनेनतत् इंद्रलोकःसदामिथ्यापाणिपादेनसंयुतः सर्वंमि॰ उपेंद्रस्यमहर्लोकोगमनेनपदेयुतं मृत्युरेवसदानास्तिवायुरेववि
सर्गकं सर्वंमिथ्यानसंदेहोब्रह्मैवाहंनसंशयः२४ प्रजापतेर्महर्लोकोगुह्यमानंदसंयुतं सर्व॰२५ तितिक्षाश्चसमाचारश्चत्याचाचार्यभा
षणे मुमुक्षुत्वंचमोक्षश्चमोक्षार्थेममजीवने २६ चतुःसाधनसंपन्नःसोधिकारीतिनिश्चयः जीवब्रह्मैक्यसद्भावंवियद्ब्रह्मेतिनिश्चयः२७
वेदांतब्रह्मणोबोध्यंबोधकंबंधमुच्यते सर्वाज्ञाननिवृत्तिश्चदानंदावाप्तिकंफलं २८ इत्येवमादिभिःशब्दैःप्रोक्तंसर्वमसत्सदा सर्वशब्दार्थ
रूपंचनिश्चयंभावनंसदा २९ ब्रह्ममात्रंपरंसत्यंअन्यत्सर्वमसत्सदा अनेकशब्दश्रवणंअनेकार्थविचारणंसर्वंमिथ्या॰ नानुध्यायान्ब्रह्मश रामः

वान्इत्युक्त्वाहमहानसान् ३१ ब्रह्मोपदेशकालेतुसर्वंचोक्तंनसंशयः ब्रह्मैवाहमिदंद्वैतंचित्तसत्ताविभावनं चिन्मात्रोहमिदंद्वैतंजीवब्रह्मेतिभावनं
अहंचिन्मात्रमंत्रंवाकार्यकारणचिंतनं ३३ अक्षयानंदविज्ञानंअखंडैकरसाद्वयं परंब्रह्मइदंब्रह्मशांतंब्रह्मस्वयंजगत् ३४ सर्वंमिथ्या अंतरिंद्रिय
विज्ञानंवाह्येंद्रियनिरोधनं सर्वोपदेशकालंचसाम्यंशेषंमहोदयं भूमिरापोनलोवायुःखंमनोबुद्धिरेवच कारणंकार्यभेदोचशास्त्रमार्गैककल्पनं
अहंब्रह्मइदंब्रह्मसर्वंब्रह्मेतिशब्दतः ३७ सत्यरूपंक्वचिन्नास्तिसत्यनामकदाचनहि संशयंचविपर्यासंसंकल्पःकारणंभ्रमः ३८ आत्मनोन्य
त्क्वचिन्नास्तिसर्वंमिथ्यानसंशयः महतांस्वधतेमंत्रीमेधाप्युत्थीशुभाशुभं ३९ देशभेदंवस्तुभेदंनचचैतन्यभेदकं आत्मनोन्यत्पृथग्भावंआत्मनो
न्यन्निरूपणं ४० आत्मनोन्यन्नामरूपंआत्मनोन्यच्छुभाशुभं आत्मनोन्यंवस्तुसत्ताआत्मनोन्यजगत्त्रयं आत्मनोन्यत्सुखंदुःखंआत्मनोन्यद्विचिंतनं
आत्मनोन्यत्प्रपंचानांआत्मनोन्यज्जयाजयौ ४२ आत्मनोन्यद्देवपूजाआत्मनोन्यच्छिवार्चनं आत्मनोन्यंमहद्ध्यानंआत्मनोन्यत्कलाक्रमं ४३ सर्वं
मिथ्यानसंदेहोब्रह्मसर्वंनसंशयः सर्वमुक्तंभगवतानिजध्यासंस्तुसर्वदा ४४ सकृच्छ्रवणमात्रेणहृदयग्रंथिरंतिमं कर्मनाशंचमूढानांमहतांमु
क्तिरेवहि ४५ अनेककोटिजननंपातकंभस्मसाद्भवेत् सत्यंसत्यंपुनःसत्यंसत्यंसर्वंविनश्यति ४६ सद्योमुक्तिर्नसंदेहोनास्तिमंगलमंगलं क्वभेद
भानदर्शनंनैवशोकमोहहृत्प्रपश्यतांश्रुतिशिखाविशेषमैक्यभावनात् यतोभवेज्जगादतंमहेशयेनजीवितंयदेतराविशत्तदायथोर्णनाभितंतु
वत्तु ४७ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेद्वात्रिंशोध्यायः ३२॥ ऋभुरुवाच वक्ष्येपरंब्रह्ममात्रंअनुत्पन्नमिदंसदा सच्चिदानंदमात्रोहंअनुत्प
न्नमिदंजगत् १ आत्मैवाहंपरंब्रह्मनान्यत्संसारदृष्टयः सच्चिदानंदमात्रोहमनुत्पन्नमिदंजगत् २ सत्यज्ञानंदमात्रोहंचित्परानंदविग्रहं अहमेवा
हमेवैकंअहमेवपरात्परः ३ सच्चिदानंदमेवैकंअहंब्रह्मैवकेवलं अहमस्मिसदाभामिएवंरूपंकुतोप्यसत् ४ त्वमित्येवपरंब्रह्मचिन्मयानंदरूपवान्
चिदाकारंचिदाकाशंचिदेवपरमंसुखं ५ आत्मैवाहमसंनाहंकूटस्थोहंगुरुःपरः कालंनास्तिजगन्नास्तिकल्मषत्वानुभावनं ६ अहमेवपरंब्रह्म
अहमेवसदाशिवः शुद्धचैतन्यएवाहंशुद्धसत्वान्नभावनः ७ अद्वयानंदमात्रोहंमयोहमहमानहं सर्वंब्रह्मैवनान्योस्तिसर्वंब्रह्मैवनिर्मलः ८ सर्वं

शिवरहस्य ६ ब्रह्मैवसततंसर्वंब्रह्मैवचेतनः सर्वप्रकाशरूपोहंसर्वप्रियमनोहरं ९ एकांतैकप्रकाशोहंसिध्यासिध्यविवर्जितः सर्वांतर्यामिरूपोहंसर्वसाक्षि
त्वलक्षणं शमोविचारसंतुष्टंवंतत्वातीतमहोत्सवं सच्चिदानंदब्रह्मैवपरमाकाशमाततं ब्रह्मैवसर्वमेवेदंशुध्यबुध्यमलेपकं सप्रकाशात्मरूपकं
अ०३३ ब्रह्मनिश्चयंचात्मकारणं १२ ब्रह्मैवसर्वमेवेदंस्वयमेवप्रकाशते १३ ब्रह्मैवसर्वमेवेदंभ्रांताधिष्ठानरूपकं ब्रह्मैवसर्वमेवेदंसर्वंनास्तिनमेस्थितं १४
३७ वाचामगोचरंब्रह्मसच्चिदानंदविग्रहः सच्चिदानंदरूपोहंअनुत्पन्नमिदंजगत् १५ ब्रह्मैवेदंसदासत्यंनित्यमुक्तंनिरंजनं सच्चिदानंदब्रह्मैवएकएव
सदासुखं १६ सच्चिदानंदब्रह्मैवपूर्णात्पूर्णतरंमहत् सच्चिदानंदब्रह्मैवसर्वव्यापकमीश्वरः सच्चिदानंदब्रह्मैवनादरूपप्रभास्वरं १७ सच्चिदानंदब्र
ह्मैवसर्वाधारंसनातनं सच्चिदानंदब्रह्मैवअनंतादित्यनिर्मलं १७ सच्चिदानंदब्रह्मैवपरमानंददायकं सच्चिदानंदब्रह्मैवसन्मात्रंसदसत्परं १८ सच्चि
दानंदब्रह्मैवसर्वेषांपरमभयं सच्चिदानंदब्रह्मैवमोक्षरूपंशुभाशुभं १९ सच्चिदानंदब्रह्मैवपरिछिन्नंनहिक्वचित् ब्रह्मैवसर्वमेवेदंशुध्यबुध्यमलेपकं
२० सच्चिदानंदरूपोहंअनुत्पन्नमिदंजगत् एतत्प्रकरणंसत्यंसद्योमुक्तिप्रदायकं २१ सर्वदुःखक्षयकरंसर्वविज्ञानदायकं नित्यानंदकरंसत्यंशांति
दांतिप्रदायकं २२ यस्त्वेतत्कांतकमहेश्वरपादपद्मलोलंवरप्रभहृदापरिशीलकश्चित् हृदारुहृंदविनतामलदिव्यपादोभावोभवोद्भवकृपावशतोभ
वेन २३ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेत्रयस्त्रिंशोध्यायः ३३॥ ऋभुरुवाच श्रृणुष्वब्रह्मविज्ञानंअद्भुतंअतिदुर्लभं एकैकश्रवणेनैवकैवल्यंप
रमश्नते १ सत्यंसत्यंजगन्नास्तिसंकल्पकलनादिकं नित्यानंदमयंब्रह्मविज्ञानंसर्वदास्वयं २ आनंदमव्ययंशांतंएकरूपमनामयं चित्तप्रपंचनैवास्ति
नास्तिकार्यंचतत्वतः आवहारंचनैवास्तिनास्तिकार्यंचतत्वतः ३ प्रपंचभावनानास्तिदृश्यरूपंनकिंचन असत्यरूपंसंकल्पंतत्कार्यंचजगन्नहि सर्वमि
त्येवनास्त्येवकालमित्यवमीश्वरः वंध्याकुमारेभीतिश्चेत्तदधीनमिदंजगत् गंधर्वनगरेसत्येहृदग्रेदृश्यतेक्वचित् मृगतृष्णाजलंपीत्वातृप्तिश्चेदस्ति
दंजगत् ६ नगशृंगेनवाणेननष्टंपूरुषमस्तिदं गंधर्वनगरेसत्येजगद्भवतुसर्वदा ७ नगरेनीलिमासिध्योजगत्सत्यंभविष्यति संतोषरूपोहमिति
निश्चयः ८ परमात्मापरंज्योतिः परापरविवर्जितः परिपूर्णस्वरूपोहंपरमात्माहमच्युतः ९ सर्वदासस्वरूपोहंसर्वशास्त्रस्यनिर्णयः लोकानंदस्वरू एमः
३७

पोहंमुख्यानंदमयःस्वयं १० सर्वंब्रह्मैवभूर्नास्तिसर्वंब्रह्मैवशासनं सर्वंब्रह्मैवनाकार्यंसर्वंब्रह्मस्वयंपरः ११ नित्याक्षरोहंनित्योहंसर्वकल्याणकारकं
सत्यज्ञानप्रकाशोहंमुख्यविज्ञानविग्रहः १२ तुर्यातुर्यप्रकाशोहंसिद्धासिद्ध्यादिवर्जितः सर्वंब्रह्मैवसततंसर्वंब्रह्मनिरंतरं १३ सर्वंब्रह्मचिदाकाशंनित्यं
ब्रह्मनिरंजनं सर्वंब्रह्मगुणातीतंसर्वंब्रह्मैवकेवलं १४ सर्वंब्रह्मैवइत्येवंनिश्चयंकुरुसर्वदा ब्रह्मैवसर्वमित्येवंसर्वदादृढनिश्चयः १५ सर्वंब्रह्मैवइ
त्येवंनिश्चयंकुरुसर्वदा सर्वंब्रह्मेतिनिश्चयित्वासुखीभव सर्वंब्रह्मनसंदेहोभावाभावौचिदेवहि १६ द्वैताद्वैतविवादोयंनानानास्तिनसंशयः सर्ववि
ज्ञानमात्रोहंसर्वंब्रह्मेतिनिश्चयी १७ गुह्याद्गुह्यतरंसोहंगुणातीतोहमद्वयं अन्वयव्यतिरेकंचकार्याकार्यंविशोधय १८ सच्चिदानंदरूपोहंअनु
त्पन्नमिदंजगत् ब्रह्मैवसर्वमेवेदंचिदाकाशमयंजगत् १९ ब्रह्मैवपरमानंदंआकाशसदृशोविभुः ब्रह्मैवसच्चिदानंदंसदावाचामगोचरं २० ब्रह्मैव
सर्वमेवेदं अस्तिनास्तीतिकिंचन आनंदभावनाकिंचित्सदासन्मात्रएवहि २१ ब्रह्मैवसर्वमेवेदंसदासन्मात्रमेवहि ब्रह्मैवसच्चिदानंदंचिद्घनानंदविग्र
हं २२ ब्रह्मैवसंचसत्यंचसनातनमहंमहत् ब्रह्मैवसच्चिदानंदोओतप्रोतेचतिष्ठति २३ ब्रह्मैवसच्चिदानंदंसर्वाकारंसनातनं ब्रह्मैवसच्चिदानंदपर
मानंदमव्ययं २४ ब्रह्मैवसच्चिदानंदमायातीतंनिरंजनं ब्रह्मैवसर्वमेवेदंसत्तामात्रंसुखासुखं २५ ब्रह्मैवसच्चिदानंदंचिन्मात्रैकस्वरूपकं ब्रह्मैवसर्व
मेवेदंसर्वभेदविवर्जितं २६ सच्चिदानंदब्रह्मैवनानाकारइवास्थितं ब्रह्मैवसर्वमेवेदंवार्ताचावसरोस्तिहि २७ सच्चिदानंदब्रह्मैवपरंज्योतिस्वरूपकं
ब्रह्मैवसच्चिदानंदंनित्यंनिश्चलमव्ययं २८ ब्रह्मैवसर्वमेवेदंब्रह्मणोन्यन्नकिंचन ब्रह्मैवसर्वमेवेदंवाचावधिरसावयं २९ ब्रह्मैवसच्चिदानंदस्वयमे
वस्वयंसदा ब्रह्मैवपरमानंदंनकरोतिनतिष्ठति ३० ब्रह्मैवसर्वमेवेदंनगच्छतिनतिष्ठति ब्रह्मैवसच्चिदानंदनस्थूलंनचकृष्णकं ३१ ब्रह्मैवपरमानंद
सर्वाधिष्ठानमव्ययं ब्रह्मैवसच्चिदानंदंनतूष्णींनविभाषणं ३२ ब्रह्मैवपरमानंदंतत्वंनाहंनकिंचन ब्रह्मैवसच्चिदानंदंपरात्परतरंभवेत् ३३ शुक्तिका
रजतंसत्यंभूषणंचेज्जगद्भवेत् रज्जुसर्पेणनस्पृश्येत्तन्नरोभवतिसंसृतिः ३४ जातिरूपेणवाणेनज्वालाग्रेनास्तितेसति रंभास्तंभेनकाष्ठेनपाकसिद्ध्यंज
गद्भवेत् ३५ नित्यानंदमयंब्रह्मकेवलंसर्वदास्वयं सद्यःकुमारिकारूपैःपाकसिध्येजगद्भवेत् ३६ नित्यानंदामयंसर्वंचित्रदीपैस्तमोनाशंजगद्भव

शिवरहस्य०६ त्तुसर्वदा ३७ नित्यानंदमयंसर्वं० मिथ्यात्माबायसान्नंअस्तिचेज्जगदुद्भवं ३८ मूलारोपणमंत्रस्यप्रीतिश्चेद्भाषणंजगत् मासात्पूर्वंमृतोमर्त्यः आगत
अ०३४ श्चेज्जगद्भवेत् ३९ तक्रंक्षीरस्वरूपंचेत्क्वचित्किंचिज्जगद्भवेत् गोस्तनादुद्भवंविश्वंपुनरारोहणंजगत् ४० भूरजसाव्दमुत्पन्नंजगद्भवतुसर्वदा नित्या
नंदमयंब्रह्मकेवलंसर्वदास्वयं ४१ कूर्मरोमणाजगद्बाध्येजगदस्तुमदोत्करे मृणालतंतुनामेरुश्चलितश्चेज्जगद्भवेत् ४२ नित्यानंद० तरंगमालया
सिंधुः वंधश्चेदस्तिदंजगत् ४३ ज्वालाग्निमंडलेपद्मवुद्धिश्चेज्जगदिदंभवेत् महच्छैलेंद्रनिलयंसंभवश्चेदिदंभवेत् ४४ नित्यानंद० मीनआगत्य
३८ पद्मासेस्थितश्चेदस्तिदंजगत् ४५ निगीर्णश्चेद्भृंगस्तुः मेरुफलवदस्तिदं मशके नाशितेसिंहे हतेभवतुकल्पने ४६ अणुकोटिरविस्तीर्णैस्त्रैलो
क्यंचेज्जगद्भवेत् स्वप्नेतिष्ठतियद्वस्तुजागरेचेज्जगद्भवेत् ४७ नदीवेगोनिश्चलश्चेज्जगद्भवतुसर्वदा जात्यंधेरत्नविषयःसुज्ञातश्चेज्जगद्भवेत् ४८
सद्योजातातुकन्यावासंभोगोस्तुजगद्भवेत् काकेविवाहंसंगंचजगद्भवतुनिश्चयः ४९ महीरवरोवासिंहोवायुस्थंचेज्जगदुद्भवं चंद्रसूर्यादिकंत्य
क्त्वाराहुश्चेद्दृश्यतेजगत् ५० नित्यानंदमयंभ्रष्टंवीजेनउत्पन्नेवृक्षश्चेच्चित्तसंभव महानपुंसकस्यवपुत्रश्चेत्स्त्रीसुखंचवा ५१ ललितंशशश्रृंगेन
रथारूढोस्तिचेज्जगत् नित्यानंदमयंब्रह्मकेवलंसर्वदास्वयं ५२ वंध्यागर्भस्ततःसंज्ञानतत्तदस्तिदंजगत् महादरिद्रैराढ्यानांसुखज्ञानेतदाज
गत् नित्यानंद० शुनोवीर्येणसिंहस्तुजातेसतिजगत्तदा ज्ञानिनोहृदयंमूढैर्ज्ञानंचेत्कल्पनंतदा ५४ गुणरूपेरसेद्वंद्वेमुक्तेजगदिदंभवेत् तोय
नलवणेयुक्तेनलिनेभुवनंतदा ५५ नित्यानंदमयंब्रह्म० श्वानेनसागरेपीतेविशेषणमनोभवेत् ५६ शिलादारुमयेःरूपैःदग्धानोभक्षितुंजगत्
श्रस्याकाशमनुष्येषुपतितश्चेत्तदाजगत् ५७ भूमौवापतितंव्योमतिष्ठतिश्चेद्भवेजगत् नित्यानंद० ५८ महाकर्दमसंचारसंक्रमेकदाचेन्मनः
नित्यानंद० ५९ दुग्धंदुग्धगंक्षीरंपुनरारोहणंपुनः केवलंदर्पणेनास्तिप्रतिविंवंतदाजगत् ६० नित्यानंद० यथाशून्यगतंव्योमप्रतिविंवंनवेजगत्
६१ अजकुक्षौगजोनास्तिआत्मकुक्षौजगन्नहि यथातांत्रेसमुत्पन्नंतथाब्रह्ममयंजगत् ६२ कार्पासकेनिदग्धेभस्मनास्तितथाभवेत् नित्यानं
दमयंब्रह्म० ६३ मनोवेगेनचरतोनद्याअपिनचिंतकं नित्यानंदम० ६४ परंब्रह्मपरंज्योतिपरस्तात्परतःपरः सर्वदाभेदकलनंद्वैताद्वैतंनविद्यते ६५ रामः
३८

चित्तवृत्तिर्जगद्दुःखंअस्तिचेत्किलनाशनं मनःसंकल्पकंबंधंअस्तिचेत्त्यागभावनं ६६ मायाकारीदंबंधंअस्तिचेद्ब्रह्मभावनं नित्यानं०
अस्तिविद्याकार्यदेहादिअस्तिचेद्द्विध्यभावनंनित्यानंदमयंब्रह्मकेवलंसर्वदास्वयं चित्तमेवमहारोगोव्याप्तश्चेद्ब्रह्मभेषजं अहंशत्रुर्यदिभवे
दहंब्रह्मैवभावनं नित्यानंद० ६९ देहोहमितिदुःखंश्चेद्ब्रह्माहमितिनिश्चिनु हृदयग्रंथिरस्तिचेत् नित्यानंद० चेतनेब्रह्मचक्रकंसंशयश्चेत्पिशा
चश्चेत्तद्ब्रह्ममात्रेणनाशय द्वैतभूतादिहरणेअद्वैतंभस्ममाश्रयः ७१ अनात्मत्वपिशाचश्चेत्तत्आत्ममंत्रेणबंधय नित्यानंदमयंब्रह्मकेवलं
सर्वदास्वयं ७२ चतुःषष्टिकदृष्टांतैःएवंब्रह्मैवसाधितं यःशृणोतिनरोनित्यंसमुक्तोनात्रसंशयः ७३ कृतार्थएवसततंनात्रकार्याविचारणा
मनोवचोविदूरगतंस्वरूपगंधविवर्जितं हृदंभकोकसंततंविजानतांमुदेसदा सुहृद्युदुज्ज्वलप्रभादिकांतिशेशसद्युतिप्रकाशदंमहस्त्वदीयपादपं
कजं ७४ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेचतुस्त्रिंशोध्यायः ३४॥ श्रीऋभुरुवाच निदाघशृणुगुह्यंमेसद्योमुक्तिप्रदंनृणां आत्मैवनाम
देवेदंपरमात्माहमक्षतं १ अहमेवपरंब्रह्मसच्चिदानंदविग्रहः अहमस्मिमहानस्मिशिवोस्मिपरमोस्म्यहं २ अहंरूपंपरमंब्रह्मनान्यदस्तिच
भावतः सर्वंनास्त्येवनास्त्येवअहंब्रह्मैवकेवलं ३ शांतंब्रह्मपरंचास्मिसर्वदानित्यनिर्मलः सर्वं० ४ सर्वसंकल्पमुक्तोस्मिसर्वसंतोषवर्जितः
कालकर्मजगद्द्वैतदृष्टदर्शनविग्रहः ५ आनंदोस्मिसदानंदकेवलोजगतांप्रियं समरूपोस्मिसत्योस्मिभूतभव्यमजोजयः चिन्मात्रोस्मिसदा
मुक्तोजीवोबंधोनविद्यते श्रवणंषड्विधंलिंगंनैवास्तिजगदीदृशं ७ चित्तसंसारहीनोस्मिचिन्मात्रत्वंजगत्सदा चित्तमेवहितंदेहअविचा
रःपरोरिपुः ८ अविचारोजगद्दुःखंअविचारोमहद्भयं सद्योस्मिसर्वदातृप्तःपरिपूर्णःपरोमहान् ९ नित्यशुद्धोस्मिबुद्धोस्मिचिदाकारोस्मि
चेतनः आत्मैवनामदेवेदंपरमात्माहमक्षतः १० सर्वदोषविहीनोस्मिसर्वत्रविततोस्म्यहं वाचातीतस्वरूपोस्मिपरमात्मा० ११ चित्तातीतं
परंद्वंद्वंसंतोषसमभावनं अंतर्बहिरनाद्यंतंसर्वभेदविनिर्णयं १२ अहंकारबलंसर्वंकामक्रोधंपरिग्रहं ब्रह्मेंद्रविष्णुर्वरुणोभावाभावविनि
श्चयः १३ जीवसत्ताजगत्सत्तामायासत्तानकिंचन गुरुशिष्यादिभेदंचकार्याकार्यविनिश्चयः १४ सर्वंनास्त्येवनास्त्येवअहंब्रह्मैवकेवलं

शिवरहस्य० ३६ त्वंब्रह्मासीतिवक्ताचअहंब्रह्मास्मिसंभवः सर्ववेदांतविज्ञानंसर्वाम्नायविचारणं इदंपदार्थसद्भावमहंरूपेणसंभवं १६ वेदवेदांतसिद्धांत
अ०३५ जगद्वैदंनविद्यते सर्वंना० १७ सर्वंब्रह्मनसंदेहः सर्वमित्येवनास्तिहि केवलंब्रह्मशांतात्माअहमेवनिरंतरं १८ शुभाशुभविभेदंचदोषादोषंन
मेनहि चित्तसत्ताजगत्सत्तावुद्धिवृत्तिविजृंभणं सर्वं० ब्रह्मैवसर्वदानान्यन्नसत्यंसत्यंनिजंपदं आत्माकारमिदंद्वैतंआत्मैवनपरःपुमान् २०
३९ सच्चिदानंदमात्रोहंसर्वंकेवलमव्ययं ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः २१ सर्वंब्र० मनोजगदहंभेदंचित्तवृत्तिंजगद्भयं २२ सर्वानंदम
हानंदंआत्मानंदमनंतकं अत्यंतस्वल्पमल्पंवाप्रपंचनास्तिकिंचन २३ प्रपंचमितिशब्दोवास्मरणंवानविद्यते सर्वं० अंतरस्थप्रपंचंवाक्व
चिन्नास्तिक्वचिद्बहिः २४ यत्किंचिदेवंतूष्णींवायच्चकिंचित्कदाक्ववा सर्वं० २५ येनकेनयदाकिंचित्तयस्यकस्यनकिंचन सिद्धंमलिनरूपंवा
ब्रह्मवाक्यमबोधकं २६ सर्वं० ईदृशंतादृशंचेतिनकिंचिद्वक्तुमर्हति २७ ब्रह्मैवसर्वंसततंब्रह्मैवसकलंमनः सर्वंब्र० २८ आनंदंपरमानंदंनित्या
नंदंसदाद्वयं चिन्मात्रमेवसततंनास्तिनास्तिपरोस्म्यहं २९ सर्वंनास्त्येवनास्त्येवअहंब्रह्मैवकेवलं प्रपंचंसर्वदानास्तिप्रपंचंचित्तमेवच ३०
चित्तमेवहिसंसारंनान्यत्संसारमेवहि सर्वं० ३१ मनएवहिसंसारोदेहोहमितिरूपकं संकल्पमेवसंसारंतन्नाशेसोविनश्यति ३२ संकल्पमेवज
ननंतन्नाशेसोविनश्यति सर्वं० ३३ संकल्पमेवदारिद्र्यंतन्नाशः संकल्पमेवपरमंतन्नाशेसोविनश्यति ३४ संकल्पमेवमननंअहमेवमहाक्षरं
आत्मैवनान्यदेवेदंपरमात्माहमक्षतः ३५ नित्यमात्ममयंबोधंअहमेवसदामहान् आत्मैवनान्यदेवेदंपरमात्माहमक्षतः ३६ इत्येवंभाव
यन्क्षिप्रंनित्यमुक्तोनसंशयः त्वमेवब्रह्मरूपात्मा त्वमेवब्रह्मविग्रहः ३७ सर्वं० एवंचपरमानंदंध्यात्वाध्यात्वासुखीभव सुखमात्रंजगत्सर्वं
प्रियमात्रंप्रपंचकं सर्वं० ३९ जडमात्रमयंलोकंब्रह्ममात्रमयंसदा ब्रह्मैवमात्रमेवेदंपरमात्माहमव्ययः ४० एकःसदाएषएकःएकएव
निरंतरं एकएवपरंब्रह्मएकएवचिदव्ययः ४१ एकएवगुणातीतःएकएवसुखावहं एकएवमहानात्माएकएवनिरंतरं ४२ एकएवचिदा
कारंएकएवात्मनिर्णयः ब्रह्मैवनान्यदेवेदंपरमात्माहमक्षतः ४३ परमात्माहमन्यंनपरमानंदमंदिरं इत्येवंभावयेनित्यंसदाचिन्मयएवहि ४४ एभः
३९

सूतउवाच विरिंचिवंचनानंतप्रपंचपंचबाणाभितसुकांचनाद्रिधारिणंकुलिंचिनापतिंभजे अकिंचिनेपिसिंचिकेजलेनलिंगमस्तकेविमुच
त्तिक्षणादधंनकिंचिदत्रशिष्यते ४५ इतिश्रीशिवरहस्येशंकरास्येषष्ठांशेऋभुनिदाघसंवादेपंचत्रिंशोध्यायः ३५॥ ऋभुरुवाच शृणुवक्ष्या
मिविप्रेंद्रसर्वंब्रह्मैवनिर्णयः यस्यश्रवणमात्रेणसद्योमुक्तिमवाप्नुयात् १ इदमेवसदानास्तित्वहमेवहिकेवलं आत्मैवसर्वदाचास्तिआत्मैवसु
खलक्षणं २ आत्मैवपरमंतत्वंआत्मैवजगतांगणः आत्मैवगगनाकारंआत्मैवचनिरंतरं ३ आत्मैवसत्यंब्रह्मैवआत्मैवगुरुलक्षणं आत्मैव
चिन्मयंनित्यंआत्मैवाक्षरनिश्चयं ४ आत्मैवास्थिरूपंवाआत्मैवात्मानसंशयः आत्मैवजगदाकारंआत्मैवात्मास्वयंस्वयं आत्मैवशांतिकल
नंआत्मैवमनसावियत् आत्मैवसर्वंयत्किंचितआत्मैवपरमंपदं ६ आत्मैवभुवनाकारंआत्मैवप्रियमव्ययं आत्मैवान्यन्नचक्वापिआत्मैवा
न्यमनोमयं ७ आत्मैवसर्वविज्ञानंआत्मैवपरमंधनं आत्मैवभूतरूपंवाआत्मैवभ्रमणंमहत् ८ आत्मैवनित्यशुद्धंवाआत्मैवगुरुरात्मनः
आत्मैवह्यात्मनःशिष्यःआत्मैवलयमात्मनि ९ आत्मैवह्यात्मनोध्यानंआत्मैवगतिरात्मनः आत्मैवगतिरात्मैवआत्मैवस्नानमात्मनः १०
आत्मैवह्यात्मनोहोमःआत्मैवजपमात्मनः आत्मैवतृप्तिरात्मैवह्यात्मनोन्यन्नकिंचन ११ आत्मैवह्यात्मनोमूलंआत्मैवह्यात्मनोव्रतं आत्मज्ञा
नव्रतंनित्यंआत्मज्ञानपरंसुखं १२ आत्मज्ञानपरानंदंआत्मज्ञानपरायणं आत्मज्ञानपरंब्रह्मआत्मज्ञानंमहाव्रतं १३ आत्मज्ञानंस्वयंवेद्यंआ
त्मज्ञानंमहाधनं आत्मज्ञानंपरंब्रह्मआत्मज्ञानंमहासुखं आत्मज्ञानंमहानात्माआत्मज्ञानंजनास्पदं १४ आत्मज्ञानंमहातीर्थंआत्मज्ञानंज
यप्रदं आत्मज्ञानंपरंब्रह्मइत्येवदृढनिश्चयः १५ आत्मज्ञानंमनोनाशंआज्ञानंपरोगुरुः आत्मज्ञानंचित्तनाशंआत्मज्ञानंविमुक्तिदं १६ आत्म
ज्ञानंभयंनाशंआत्मज्ञानंसुखावहं आत्मज्ञानंमहातेजःआत्मज्ञानंमहाशुभं १७ आत्मज्ञानंसत्तारूपंआत्मज्ञानंसतांप्रियं आत्मज्ञानंसतो
मोक्षंआत्मज्ञानंविवेकजं १८ आत्मज्ञानंपरोधर्मःआत्मज्ञानंसदाजपः आत्मज्ञानमहंश्रेष्ठःआत्मज्ञानंमहाफलं १९ आत्मज्ञानस्यस
दृशंआत्मविज्ञानमेवहि आत्मज्ञानसमंकिंचित्नभूतंनभविष्यति २० आत्मज्ञानंपरंमंत्रंआत्मज्ञानंपरंतपः आत्मज्ञानंहरिःसाक्षादात्मज्ञा

शिवरहस्यष देंनं शिवः परं २१ आत्मज्ञानं परो धाता आत्मज्ञानं स्वसंमतं आत्मज्ञानं स्वयं पुण्यं आत्मज्ञानं विशोधनं २२ आत्मज्ञानं महातीर्थं आत्मज्ञानं शमादिकं
आत्मज्ञानं प्रियं मंत्रं आत्मज्ञानं स्वपावनं २३ आत्मज्ञानं तु किं नाम अहं ब्रह्मेति निश्चयं अहं ब्रह्मेति विश्वासं अहं ब्रह्म महोदयं २४ अहं ब्रह्मास्मि
अ० ३६ नित्योस्मि शुद्धोस्मीति च भावनं आनंदोहं परानंदः शुद्धोहं नित्यमव्ययः २५ चिदाकाशस्वरूपोस्मि सच्चिदानंदशाश्वतं निर्विकारोस्मि शांतोहं
समतोहं निरंतरं २६ सर्वदा सुखरूपोस्मि सर्वदोषविवर्जितः सर्वसंकल्पहीनोस्मि सर्वदा स्वयमस्म्यहं २७ सर्वं ब्रह्मेत्यनुभवं विनाशं त्वं परं स्वहं
४० कोप्यश्वमेधेयत्पुण्यं क्षणात्तत्पुण्यमाप्नुयात् २८ अहं ब्रह्मेति निश्चित्य मेरुदानफलं लभेत् ब्रह्मैवाहमिति स्थित्वा सर्वभूदानमप्यणु २९ ब्रह्मै
वाहमिति स्थित्वा कोटिशो दानमप्यणु ब्रह्मैवाहमिति स्थित्वा सर्वानंदत्णायते ३० ब्रह्मैव सर्वमित्येव भावितस्य फलं स्वयं ब्रह्मैवाहमिति स्थित्वा
समानं ब्रह्म एव हि ३१ तस्मान्नित्यं च स्वप्नेपि सर्वं संत्यज्य यत्नतः अहं ब्रह्म न संदेहो अहमेव गतिर्मम ३२ अहमेव सदा नान्यत् अहमेव जगद्गुरुः
अहमेव परो ह्यात्मा अहमेव न वा परः ३३ अहमेव गुरुश्श्रेष्ठ अहमेवेति निश्चिनु इदमित्येव निर्देशो परिच्छिन्नो जगन्न हि ३३ न भूमिर्न जलं
नाग्निः न वायुर्न च खं सदा सर्वं चैतन्यमात्रत्वान्नान्यत्किंचिन्न विद्यते ३५ इत्येवं भावनपरो देहमुक्तः सुखी भव अहमात्मा इदं नास्ति सर्वं चै
तन्यमात्रतः अहमेव हि पूर्णात्मा आनंदा स्थिरनामयः इदमेव सदा नास्ति जडत्वादसदेव हि ३७ इदं ब्रह्म सदा ब्रह्म इदं नेति सुखी भव तुरंग
शृंगसंनिभः श्रुतिप्ररोचनाविशेषकामवासनाविनिश्चितात्मवृत्तितः नरासुरामुनीश्वराः असंगसंगसंगमप्युमापतिं न ते भजंति केचन ३८
इति श्रीशिवरहस्ये शंकराख्ये षष्ठांशे षट्त्रिंशोध्यायः ३६ ॥ ऋभुरुवाच निदाघ शृणु वक्ष्यामि रहस्यं परमाद्भुतं श्लोकैकश्रवणेनैव सद्यो
मोक्षमवाप्नुयात् १ इदं दृश्यं परं ब्रह्म दृश्यवद्भाति चिन्नतः सर्वं चैतन्यमात्रत्वान्नान्यत्किंचिन्न विद्यते २ इदमेवेह नास्त्येव अयमित्यपि नास्ति
हि एक एवाप्यणुर्वापि नास्ति नास्ति न संशयः ३ व्यवहारमिदं क्वापि वार्त्तामात्रमपि क्वचा बंधरूपं बंधवार्त्ता बंधकार्यं परं च वा ४ सर्वं चैतन्यमा
सन्मात्रकार्यं सन्मात्रं अहं ब्रह्मेति निश्चयं ५ दुःखं सुखं वा बोधो वा साधकं साध्यनिर्णयः आत्मेति परमात्मेति जीवात्मेति पृथक्कृ न हि ६ देहो एमः
५०

हमितिभूतोहंज्ञानविज्ञानवानहं सर्वंचैतन्यमात्रत्वान्नान्यत्किंचिन्नविद्यते ९ कार्यकारणरूपोहंअंतःकारणकार्यकंएकमित्येवमात्रंवा
नास्तिनास्तीतिभावय ८ सर्वंचै॰ सर्वसंकल्पमात्रेतिसर्वंब्रह्मेतिवाजगत् तत्वज्ञानंपरंब्रह्मओंकारार्थंसुखंजयं सर्वंचै॰ सर्वंचै॰ १० द्वैताद्वै
तंसदाद्वैतंतथामानावमानकं अत्मानंदमहंब्रह्मप्रज्ञानंब्रह्मएवहि ११ इदंरूपमहंरूपंप्रियाप्रियविचारणं सर्वंचै॰ १२ यद्यत्संभाव्यतेलोके
यद्यत्साधनकल्मषं यद्येतद्रहितंब्रह्मभावनंचित्तनिर्मितं १३ सर्वंचैतन्यमात्रत्वात्सर्वमेवनविद्यते स्थूलदेहोहमेवात्रसूक्ष्मदेहोहमेव हि १४
बुद्धेर्भेदंमनोभेदंअहंकारंजडंचतत् सर्वंचै॰ १५ श्रवणंमननंचैवसाक्षात्कारविचारणं आत्मैवाहंपरंचैवनाहंसोहमयंस्वयं १६ ब्रह्मैवसर्वमेवेदं
ब्रह्मैवपरमंपदं ब्रह्मैवकारणंकार्यंब्रह्मैवजगतांजयं १७ सर्वंचै॰ ब्रह्मैवसर्वंचैतन्यंब्रह्मैवमनसायते १८ ब्रह्मैवजीववद्भातिब्रह्मैवज्ञानमात्रकं
ब्रह्मैवचित्तवद्भातिब्रह्मैवदृश्यते १९ ब्रह्मैवशिववद्भातिब्रह्मैवप्रियमात्मनः ब्रह्मैवशांतिवद्भातिब्रह्मणोन्यंनकिंचन २० नाहंनचान्यंने
वान्यंनोत्पन्नंचपरात्परं नवेदंनचशास्त्रार्थंनमीमांस्यंनचोद्भवं २१ नलक्षणंनवेदादिनापिचिंतनमेमनः नमेनायंनेदमिदंनवुद्धिर्निश्च
यंसदा २२ कदाचिदपिनास्त्येवसत्यंसत्यंनकिंचन नैकमात्रंनचायंवानांतरंनवहिर्नहि २३ ईषन्नमात्रंनद्वैतंनजन्यंनचदृश्यकं
नभावनंनस्मरणंनविस्मरणमण्वपि २४ नकालंदेशकलनंनसंकल्पंनवेदनं नविज्ञानंनदेवान्यंनवेदोहंनसंसृतिः २५ नमेदुःखंनामोक्ष
वानगतिर्नचदुर्गतिः नात्मानाहंनजीवोहंनकूटस्थोनजायते नदेहोहंनचस्तोत्रंनलिंगेंद्रियदेवता सर्वंचैतन्यमात्रत्वात्सर्वंनास्त्येवसर्वदा
२७ अखंडाकाररूपत्वात्सर्वंनास्त्येवसर्वदा हंकारस्यावकाशोवाहुंकाजननंचवा २८ नास्त्येवनास्त्येवनास्त्येवनास्तिनास्तिकदाचन अन्य
पदार्थमन्यंवाअन्यदेवान्यभाषणं २९ आत्मनोन्यदसत्यंवासत्यंवाभ्रांतिरेवा नास्त्येवनास्तिनास्त्येवनास्तिशब्दोपिनास्तिहि ३० सर्वंचैतन्य
मात्रत्वात्सर्वंनास्त्येवसर्वदा सर्वंब्रह्मनसंदेहोब्रह्मैवाहंनसंशयः वाक्यंचवाचकंसर्वंवक्ताचत्रिकुटिद्वयं ज्ञाताज्ञानेज्ञेयभेदोमात्रमान
मतिप्रियं ३२ यद्यच्छास्त्रेणनिर्णीतंयद्यद्वेषुननिश्चितं सर्वंनास्तिसदानास्तिसदानास्तिसदानहि ३३ सर्वंचै॰ परापरमतीतंचअतीतोहमेवेदं

शि शिवरहस्यषष्ठं गुरुं गुरूपदेशश्च गुरुत्वस्येन कस्यचित् सर्वं चै० ३५ गुरुरूपा गुरुश्रध्या सदा नास्ति गुरुस्स्वयं आत्मैव गुरुरात्मैव अन्याभावान्नसंशयः सर्वं चै० ३६
अ० ३७ आत्मनः शुभमात्मैव अन्याभावेनसंशयः ३७ आत्मनो मोहमात्मैव आत्मानास्तिनकिंचन आत्मनः सुखमात्मैव अन्यंनास्तिनसंशयः ३८ आत्म
मेवात्मनः शक्तिः आत्मन्येवात्मनः प्रियः आत्मन्येवात्मनः स्नानं आत्मन्येवात्मनोरतिः ३९ आत्मज्ञानं परंश्रेयः आत्मज्ञानंसुदुर्लभं आत्मज्ञा
४१ नंपरं ब्रह्म आत्मज्ञानंसुखात्सुखं ४० सर्वं चै० आत्मज्ञानात्परंनास्ति आत्मज्ञानात्स्मृतिर्नहि ४१ ब्रह्मैवात्मानसंदेहो आत्मैव ब्रह्मणः स्वयं स्वयमेवहि
सर्वत्र स्वयमेवहि चिन्मयः ४२ स्वयमेव चिदाकाशः स्वयमेव निरंतरं स्वयमेव न चानात्मा स्वयमेव न चापरः ४३ स्वयमेव गुणातीतः स्वयमेव महत्सुखं
स्वयमेवहि शांतात्मा स्वयमेवहि निष्कलः ४४ स्वयमेव चिदानंदः स्वयमेव महत्प्रभुः स्वयमेव सदा साक्षी स्वयमेव सदाशिवः ४५ स्वयमेव हरीः सा
क्षात्स्वयमेव प्रजापतिः स्वयमेव परंब्रह्म ब्रह्म एव स्वयं सदा ४६ सर्वं ब्रह्म स्वयं ब्रह्म स्वयं ब्रह्म नसंशयः दृढनिश्चयमेवं त्वं सर्वदा कुरु सर्वदा ४७ विचार
यन्स्वयं ब्रह्मा ब्रह्ममात्रं स्वयंभवेत् एतदेव परंब्रह्म अहंब्रह्मेतिनिश्चयं ४८ एतदेवहि निर्वाणं अहंब्रह्मेतिनिश्चयं एष एव कृतार्थस्त्वं एष एव सु
खं सदा ४९ अहंब्रह्म स्वयंब्रह्म० अहंब्रह्म एतदेव एतदेव महाप्रजाः ५० एतदेव सदाज्ञानं स्वयंब्रह्म स्वयंमहत् ५० अहंब्रह्म एतदेव सदा
ज्ञानं स्वयंमहत् ५१ अहंब्रह्म एतदेव स्वभावं सततं निजं अहंब्रह्म एतदेव सदानित्यस्स्वयंसदा अहंब्रह्म एतदेवं बंधनाशं नसंशयं ५२ अहं
ब्रह्म एतदेवं सर्वसिध्यांत निश्चयं एतद्वेदांतसिध्यांतं अहंब्रह्म नसंशयः सर्वोपनिषदामर्थं सर्वानंदमयं जगत् महावाक्यस्य सिध्यांतं अहंब्र
ति ह्मेति निश्चयं ५४ साक्षाच्छिवस्य सिध्यांतं अहंब्रह्मेति निश्चयं नारायणस्य सिध्यांतं अहंब्रह्मेति निश्चयं ५५ चतुर्मुखोपि सिध्यांत महंब्रह्मास्मि नि
श्चयं ऋषीणां हृदयं ह्येतन्देवानामुपदेशकं ५६ सर्वदेशिक सिध्यांतं अहंब्रह्मेति निश्चयं यच्चयावच्च भूतानां अहोपदेशमेवतत् ५७ अहंब्रह्म
महामोक्षं परं चैतदहं स्वयं अहंमहानुभवं चैनत्तमहागोप्यमिदं च तत् ५८ अहंब्रह्म एतदेव सदाज्ञानं स्वयंमहत् महाप्रकाशमेवैतत् तदहं
ब्रह्म एवतत् ५९ एतदेव महामंत्रं एतदेव महास्नानं अहंब्रह्म० ६० अहंब्रह्म एतदेव एतदेव महाप्रजाः अहंब्र० ६१ एतदेव महातीर्थं अहंब्रह्मेतिनि एमः
४१

श्चयं एषएवमहागंगाअहंब्रह्मेतिनिश्चयं ६२ एषएवपरोधर्मोअहंब्रह्मेतिनिश्चयः एषएवमहानाशंअहंब्रह्मेतिनिश्चयः ६३ एषएवपरोधर्मो
अहंब्रह्मेतिनिश्चयः एतदेवहिविज्ञानंअहंब्रह्मास्मिकेवलं ६४ सर्वसिध्दांतमेवैतदहंब्रह्मेतिनिश्चयः सूतउवाच सम्यासम्भयाद्यवरात्हृदयागोप
हहार्यस्त्रियोपश्पतंवुजमित्रमंडलगतंशंभुंहिरण्यात्मकं सर्वत्रप्रसृतैःकरैर्जगदिदंपुष्णातिमुष्णन्घनैःदृष्टंचोषधिजालमंवुनिकरैःविश्वास्थधू
तंहरः ६५ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेसप्तत्रिंशोध्यायः ३७॥ ऋभुरुवाच वक्ष्येत्पृद्भुतंव्यक्तंसच्चिदानंदमात्रकं सर्वप्रपंचशून्यत्वंसर्वं
मात्मेतिनिश्चितं १ आत्मरूपप्रपंचंवाआत्मरूपप्रपंचकं सर्वप्रपंचंनास्त्येवसर्वंब्रह्मेतिनिश्चयं २ नित्यानुभवमानंदंनित्यंब्रह्मेतिभावनं चित्तरू
पप्रपंचंवाचित्तसंसारमेववा ३ सर्वंब्रह्म॰ बुध्धिनिश्चयसंसारंबुध्धिरस्तिरिदंजगत् ४ सर्वंब्रह्मैवसंदेहोब्रह्मैवाहंनसंशयः इदमस्तीतिसत्तात्वंअ
हमस्मीतिवाजगत् ५ सर्वंब्र॰ स्वांतकरणदोषेवास्वांतःकरणकार्यकं ६ स्वस्यजीवभ्रमःकश्चित्स्वस्यनाशंस्वजन्मना सर्वंब्रह्मे॰ ७ ईश्वरःकश्चिद
स्तीतिजीवोहमितिवैजगत् मायासत्तामहासत्ताचित्तसत्ताजगन्मयं ८ यद्यच्चदृश्यतेशास्त्रेःयद्यद्दैचैवभाषणं एकमित्येवनिर्देशंद्वैतमित्येवभाषणं
९ सर्वंब्र॰ शिवोस्मीतिभ्रमःकश्चिद्ब्रह्मास्मीतिचविभ्रमः विष्णुरस्मीतिविभ्रांतिःजगदस्तीतिविभ्रमः ईश्वरस्तीतिवाभेदंइश्वरस्तीतिवाद्वयं १०
सर्वमस्तीतिनास्तीतिसर्वंब्रह्मेतिनिश्चयः आत्मध्यानप्रपंचंवाआत्मरूपप्रपंचकं ११ वार्तारूपप्रपंचंवास्मरणादिप्रपंचकं सर्वंब्र॰ १२ दुःख
रूपप्रपंचंवासुखरूपप्रपंचकं द्वैताद्वैतप्रपंचंवासत्यासत्यप्रपंचकं १३ सर्वंब्र॰ जाग्रत्प्रपंचमेवापितथास्वप्नप्रपंचकं १४ सुप्तिज्ञानप्रपं
चंवागुणज्ञानप्रपंचकं गुणागुणप्रपंचंवादोषादोषविनिर्णयं १५ वेदज्ञानप्रपंचंवाशास्त्रज्ञानप्रपंचकं पापबुध्धिप्रपंचंवापुण्यभेदप्रपंचकं
गुणागुणप्रपंचंवादोषादोषविनिर्णयं १५ वेदज्ञानप्रपंचंवाशास्त्रज्ञानप्रपंचकं पापबुध्धिप्रपंचंवापुण्यभेदप्रपंचकं १६ ज्ञानरूपप्रपं
चंवानिर्गुणसत्प्रपंचकं सत्यासत्यविचारंवाचराचरविचारणं १७ एकआत्मेतिसद्भावंमुख्यआत्मेतिभावनं सर्वप्रपंचनास्त्येवसर्वंब्र
ह्मेतिनिश्चयं १८ द्वैताद्वैतसमुद्भूतंनास्तिनास्तीतिभाषणं असत्यंजगदेवेतिसत्यंब्रह्मेतिनिश्चयं १९ कार्यरूपंकारणंचनानाभेदविजं

 भणं सर्वमंत्रप्रदातारं दूरेदूरंतथानथा २० सर्वसंत्यज्यसततंस्वात्मन्येवस्थिरोभव मौनभावंमौनकार्यंमौनयोगंमनोप्रियं २१ पंचाक्षरोपदे
ष्टारंतथाचाष्टाक्षरप्रदं सर्वंत्र॰ २२ यद्यदद्यत्वरंशास्त्रंयद्यद्वेदोगुरोपिवा सर्वदासर्वलोकेषुसर्वसंकल्पकल्पनं २३ सर्वंत्र॰ सर्ववाक्यप्रपंचंहिसर्वचित्त
 प्रपंचकः २४ सर्वदोषप्रपंचश्चदुःखदुःखप्रपंचकं सर्वंत्र॰ २५ सर्वाकारविकल्पश्चसर्वकारणकल्पनं सहादेयमुपादेयंग्राह्यंत्याज्यंचभाषणं २६
सर्वंत्र॰ विचार्यजन्ममरणंवासनाचित्तरूपकं २७ कामक्रोधंलोभमोहंसर्वंदंभचहंकृतिं सर्वंत्र॰ २८ त्रैलोक्यसंभवद्वैतंत्र्यह्मेंद्रवरुणादिकं ज्ञानेंद्रियं
 चशब्दादिदिग्वाय्वर्कादिदैवतं २९ सर्वंत्र॰ कर्मेंद्रियादिसद्भावंविषयंदेवतागणं ३० अंतःकरणवृत्तिंचविषयंचाधिदैवतं सर्वंत्र॰ ३१ चित्तवृत्तिविभे
दंचबुद्धिवृत्तिनिरूपणं मायामात्रमिदंद्वैतंसदासत्त्वाविनिर्णयं ३२ सर्वंब्रह्मैवसंदेहोब्रह्मैवाहंनसंशयः किंचिद्द्वैतंवहुद्वैतंजीवद्वैतंसदाप्यसत् ३३
जगदुत्पत्तिमोहंचगुरुशिष्यत्वनिर्णयं गोपनंतत्पदार्थस्यपदार्थस्यतुमेलनं ३४ तथाचास्मिपदार्थस्यऐक्यवुध्यानुभावनं सर्वंत्र॰ ३५ भेदेषुभेदा
भेदंचनान्यत्किंचिन्नविद्यते एतत्प्रपंचंनास्त्येवसर्वंब्रह्मेतिनिश्चयं ३६ सर्वंचैतन्यमात्रत्वात्केवलंब्रह्मएवसः आत्माकारमिदंसर्वंआत्मनोस्तिनकिं
चन ३७ तुर्यातीतंब्रह्मणोन्यतत्सत्यासत्यंनविद्यते सर्वंत्यक्त्वातुसततंस्वात्मन्येवस्थिरोभव ३८ चित्तंकालंवस्तुभेदंसंकल्पंभावनंस्वयं सर्वसं
त्यज्यसततंसर्वंब्रह्मैवभावनं ३९ यद्यद्वेदपरंशास्त्रंयद्यद्वेदपरंमनः सर्वसंत्यज्यसततंस्वात्मन्येवस्थिरोभव ४० मनोकल्पितकल्पंवाआ
त्मकल्पनविभ्रमं अहंकारंपरिच्छेदंदेहोहंदेहभावनं ४१ सर्वसंत्यज्यसततंआत्मन्येवस्थिरोभव प्रपंचस्यचसद्भावंप्रपंचोद्भवमन्यकं ४२
वंधसद्भावकलनंमोक्षसद्भावभाषणं सर्वसंत्यज्य॰ ४३ देवताभावसद्भावंदेवपूजाविनिर्णयं पंचाक्षरेतियद्वैतंअष्टाक्षरस्यदेवतं ४४
सर्वंत्र॰ प्राणादिपंचकास्तित्वंउपप्राणादिपंचकं ४५ पृथिवीभूतभेदंचगुणायत्कंवनादिकं सर्वंत्र॰ ४६ वेदांतशास्त्रसिद्धांतंशैवागमनमेवच
लौकिकंवास्तवंदोषंप्रवृत्तिंचनिवृत्तिकं ४७ सर्वसंत्य॰ आत्मज्ञानंपरंब्रह्मअनात्मज्ञानदूषणं ४८ रेचकंपूरकंकुंभंषडाधारविशो
धनं सर्वसंत्य॰ ४९ द्वैतवृत्तिश्चदेहोहंसाक्षिवृत्तिस्वदर्शकं अखंडाकारवृत्तिंचअखंडाकारसंभवं ५० अनंतानुभवंचापि एमः

अहंब्रह्मेतिनिश्चयं उत्तमंमध्यमंचापितथाचैवाधमाधमं ५१ सर्वंब्रह्मैवसंदेहोब्रह्मैवाहंनसंशयः दूषणंभूषणंचैवसर्ववस्तुविनिंदनं ५२
अहंब्रह्मइदंब्रह्मसर्वंब्रह्मेतितत्वतः अहंब्रह्मास्मिमुग्धोस्मिवृद्धोस्मिसदसत्परः ५३ वैश्वानरोविराटश्चस्थूलंप्रपंचमितिभावनं आनंदस्फु
रणेवाहंपरापरविवर्जितः ५४ नित्यानंदमयंब्रह्मसच्चिदानंदविग्रहः दृक्रूपंदृश्यरूपंचमहासत्तास्वरूपकं ५५ कैवल्यंसर्वनिधनंस
र्वभूतांतरंगतं भूतंभव्यंभविष्यंचवर्त्तमानमसत्सदा ५६ कालभावंदेहभावंसत्यासत्यविनिर्णयं प्रज्ञानघनएवाहंशांताशांतनिरंजनं ५७
प्रपंचवार्तास्मरणंद्वैताद्वैतविभावनं शिवागमसमाचारंवेदांतश्रवणंपदं ५८ अहंब्रह्मास्मिशुद्धोस्मिचिन्मात्रोस्मिसदाशिवं सर्वंब्रह्मेति
संत्यज्यस्वात्मन्येवस्थिरोभव ५९ अहंब्रह्मनसंदेहोइदंब्रह्मनसंशयः स्थूलदेहंसूक्ष्मभेदंकारणंदेहमेवच ६० एवंज्ञात्वाचसततंब्रह्मै
वेदंक्षणेक्षणे शिवोहमात्माशिवोजीवःशिवोब्रह्मनसंशयः ६१ एतत्प्रकरणंयस्तुसकृद्वासर्वदापिवा पठेद्वाशृणुयाद्वापिसचमुक्तोनसंशयः
६२ क्षणमात्रमपिश्रुत्वासाक्षान्मुक्तोनसंशयः निमिषंनिमिषार्धंवाश्रुत्वैतद्ब्रह्मवाक्भवेत् ६३ लोकालोकजगत्स्थितिप्रविलसत्प्राग्भावसत्तालि
काभित्तिःशंकरनामरूपमसकृद्व्याकुर्वतेकेवलं सत्यासत्यनिरंकुशश्रुतिवचोवीचिभिरामृश्यतेयस्त्वेतदितीवतद्वचनैर्मीमांस्यतेपं
शिवः ६४ इतिश्रीशिवरहस्येशंकराख्येषष्ठांशेऋभुनिदाघसंवादोनामअष्टत्रिंशोध्यायः ३८ ॥ ऋभुरुवाच परंब्रह्मप्रवक्ष्यामिनिर्विक
ल्पंनिरामयं तदेवाहंनसंदेहःसर्वंब्रह्मैवकेवलं १ चिन्मात्रममलंशांतंसच्चिदानंदविग्रहं आनंदपरमानंदंनिर्विकल्पंनिरंजनं २ तदेवा
हंनसंदेहःस० गुणातीतंजनातीतंअवस्थातीतमव्ययं ३ एवंभावयचैतन्यंअहंब्रह्मास्मिसोस्म्यहं सर्वातीतस्वरूपोस्मिसर्वशब्दार्थवर्जितं
